श्रीमते रामानुजाय नमः ॥ अखिलभुवनजन्मस्थेमभंगादिलीले विनतविविधभूतव्रातरक्षैकदीक्षे श्रुतिशिरसि विदी-
प्ते ब्रह्मणि श्रीनिवासे भवतु मम परस्मिन् शेमुषी भक्तिरूपा १ पाराशर्यवचःसुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां संसाराग्निवि-
दीपनव्यपगतप्राणात्मसंजीवनीम् पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थितामानीतां तु निजाक्षरैः सुमनसो भौमाः
पिबन्त्वन्वहम् २ भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिपुस्तन्मतानुसारेण सूत्राक्षराणि व्याख्या-
स्यन्ते ॥ श्री अथातो ब्रह्मजिज्ञासा श्री अत्रायमथशब्द आनन्तर्ये भवति अतःशब्दो वृत्तस्य हेतुभावे अधीतसांगसशिर-
स्कवेदस्याधिगताल्पास्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाभिलाषस्यानन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभावि-
नी ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा ब्रह्मण इति कर्मणि षष्ठी कर्तृकर्मणोः कृतीति विशेषविधानात् यद्यपि संबंधसामान्यपरि-
ग्रहेपि जिज्ञासायाः कर्मापेक्षत्वेन कर्मार्थत्वसिद्धिः तथाप्याक्षेपतः प्राप्तादभिधानिकस्यैव ग्राह्यत्वात् कर्मणि षष्ठी गृह्य-
ते न च प्रतिपदविधाना च षष्ठी न समस्यत इति कर्मणि षष्ठ्याः समासनिषेधः शंकनीयः कृद्योगा च षष्ठी समस्यत इति
प्रतिप्रसवसद्भावात् ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषोनवधिकातिशयासंख्येयकल्याणगुणगणः पुरुषोत्तमो-
च
भिधीयते सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोस्य मुख्योर्थः स च सर्वेश्वर एव अतो
ब्रह्मशब्दस्तत्रैव मुख्यवृत्तस्तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः अनेकार्थकल्पनायोगात् भगवच्छब्दवत् तापत्रयातु-
रैरमृतत्वाय स एव जिज्ञास्यः अतः सर्वेश्वरो जिज्ञासाकर्मभूतं ब्रह्म ज्ञातुमिच्छा जिज्ञासा इच्छाया इष्यमाणप्रधानत्वादिष्यमा-
णं ज्ञानमिह विधीयते मीमांसापूर्वभागज्ञातस्य कर्मणोल्पास्थिरफलत्वादुपरितनभागावसेयस्य ब्रह्मज्ञानस्यानंताक्षय-
फलत्वाच्च पूर्ववृत्तात् कर्मज्ञानादनंतरं तत एव हेतोर्ब्रह्म ज्ञातव्यमित्युक्तं भवति तदाह वृत्तिकारः वृत्तात्कर्माधि-

निष्पन्नात् कर्माधिगमात् १

येनेति छान्दसः पथेत्यर्थः ३

एवमेवामुत्र पुण्यचितो लोकः क्षीयते अंतवत्वेनास्य तद्भवति नह्यध्रुवैः प्राप्यते ध्रुवं कर्मभिः प्लवा ह्येते अदृढाः यज्ञरूपाः परीक्ष्य लोकान् क-
र्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं तस्मै स विद्वा-
नुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यां ब्रह्मविदाप्नोति परं न पुनर्मृत्यवे
तदेकं पश्यति न पश्यो मृत्युं पश्यति स स्वराड्भवति तमेव विद्वानमृत इह भवति तमेव विदित्वातिमृत्युमेति नान्यः पन्था अयनाय विद्यते पृ-
थगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेतीत्यादीनि ननु च सांगवेदाध्ययनादेव कर्मणां स्वर्गादिफलत्वं स्वर्गादीनां
च क्षयित्वं ब्रह्मोपासनस्यामृतत्वफलत्वं च ज्ञायत एव अनंतरं मुमुक्षुर्ब्रह्मजिज्ञासायामेव प्रवर्त्तताम् किमर्थो धर्मविचारापेक्षा एवं तर्हि
शारीरकमीमांसायामपि न प्रवर्त्तताम् सांगाध्ययनादेव कृत्स्नस्य ज्ञातत्वात् सत्यं आपाततः प्रतीतिर्विद्यत एव तथापि मीमांसानुगृही-
तस्य वाक्यस्यार्थनिश्चायकत्वादापाततः प्रतीतोप्यर्थः संशयविपर्ययौ नातिवर्त्तते अतस्तन्निर्णयाय वेदान्तवाक्यविचारः कर्त्त-
व्य इति चेत् तथैव धर्मविचारोपि कर्त्तव्य इति पश्यतु भवान् ननु च ब्रह्मजिज्ञासायां देवनियमेनापेक्ष्यते तद्वत्पूर्ववृत्तं किंचिद्वक्तव्यं
न धर्मविचारापेक्षा ब्रह्मजिज्ञासायाः अधीतवेदान्तस्यानधिगतकर्मणोपि वेदान्तवाक्यार्थविचारोपपत्तेः कर्मांगाश्र-
या एव हि उपासनान्यत्रैव चिन्त्यन्ते तदनधिगतकर्मणो न शक्यं कर्तुमिति चेत् अनभिज्ञोसि भगवान् शारीरकशास्त्रविज्ञानस्य
अस्मिन् शास्त्रेनाद्यविद्याकृतविविधभेददर्शननिमित्तजन्मजरामरणादिसांसारिकदुःखसागरनिमग्नस्य निखिलदुःखमूलभू-
तमिथ्याज्ञाननिबर्हणायात्मैकत्वविज्ञानं प्रतिपिपादयिषितं अस्य हि भेदावलंबिकर्मज्ञानं नोपयुज्यते प्रत्युत विरुद्धमेव उद्गी-
थादिविचारस्तु कर्मशेषभूत एव ज्ञानरूपत्वाविशेषादिहैव क्रियते क्रतुसामान्यात्संगतः मनोयत्प्रधाने शास्त्रे तदपेक्षितमेव पूर्ववृ-
त्तं किमपि वक्तव्यं वाढं तदपेक्षितं च कर्मविज्ञानमेव कर्मसमुच्चिता ज्ञानादपवर्गश्रुतेः वक्ष्यति च सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति
अपेक्षिते च कर्मण्यज्ञाते केन समुच्चयः केन नेति विभागो न शक्यते ज्ञातुं अतस्तदेव पूर्ववृत्तं नैनमुक्तं सकलविशेषप्रत्यनीकचि

गमादन्नेतरं ब्रह्मविविदिषेति वक्ष्यति च कर्मब्रह्ममीमांसयोरैकशास्त्रीयं संहितमेतच्छारीरके जैमिनीयेन षोडशलक्षणेनेति शा
स्त्रैकत्वसिद्धिरिति अतः प्रतिपिपादयिषितार्थभेदेन षड्भेदवदध्यायभेदवच्च पूर्वोत्तरमीमांसयोर्भेदः मीमांसाशास्त्रमथातो ध
र्मजिज्ञासा इत्यारभ्यानावृत्तिः शब्दादनावृत्तिः शब्दादित्येवमंतं संगतिविशेषेण विशिष्टक्रमम् तथा हि प्रथमं तावत्स्वाध्या
योऽध्येतव्य इत्यध्ययनेनैव स्वाध्यायशब्दवाच्यवेदाख्याक्षरराशेर्ग्रहणं विधीयते तच्चाध्ययनं किंरूपं कथं च कर्त्तव्यमित्यपेक्षा
यां अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयेदित्यनेन श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधियुक्तश्छंदांस्यधीयीत मासा
न्विप्रोऽर्द्धपंचमानित्यादिव्रतनियमविशेषोपदेशैश्चापेक्षितानि विधीयंते एवं सत्संतानप्रसूतसदाचारनिष्ठात्मगुणोपेतवेदविदाचा
र्योपनीतस्य व्रतनियमादिविशेषयुक्तस्याचार्योच्चारणानूच्चारणमक्षरराशिग्रहणफलमध्ययनमित्यवगम्यते अध्ययनं च
स्वाध्यायसंस्कारः स्वाध्यायोऽध्येतव्य इति स्वाध्यायस्य कर्मत्वावगमात् संस्कारो हि नाम कार्यांतरयोग्यताकरणं संस्कार्यत्वं च
स्वाध्यायस्य युक्तं धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनावबोधित्वात् जपादिना स्वरूपेणापि तत्साधनत्वाच्च एवमध्य
यनविधिर्मंत्रवन्नियमवदक्षरराशिग्रहणमात्रपर्यवस्यायि अध्ययनगृहीतस्य स्वाध्यायस्य स्वभावत एव प्रयोजनवदर्थावबो
धित्वदर्शनात् गृहीतात्स्वाध्यायादवगम्यमानान् प्रयोजनवतोऽर्थानापाततो दृष्ट्वा तत्स्वरूपप्रकारविशेषनिर्णयफलवेदवाक्यविचा
ररूपमीमांसायां वेदाधीतवेदः पुरुषः स्वयमेव प्रवर्त्तते तत्र कर्मविधिस्वरूपेण निरूपिते कर्मणामल्पास्थिरफलत्वं दृष्ट्वा अध्ययन
गृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चामृतत्वरूपानंतस्थिरफलापातप्रतीतेस्तन्निर्णयफलवेदान्तवाक्यविचाररूपशारीरकमीमांसा
यामधिक्रियेति तथा च वेदांतवाक्यानि केवलकर्मफलस्यानित्यत्वं ब्रह्मज्ञानस्य चानंतफलत्वं दर्शयंति तद्यथेह कर्मचितो लोकः क्षीयते

श्री. भा. ३

४ लघुसिद्धांतः

कः । एवं च मलोः पारमार्थिकत्वादेव ज्ञानेनैव निवर्त्यते निवर्तकं च ज्ञानं न तत्त्वमस्यादिवाक्यजन्यं तस्यैतत्स्य वाक्यजन्यज्ञानस्य
स्वरूपे तदुत्पत्तौ कार्य्ये वा कर्म्मणो नोपयोगः विविदिषायामेव तदुपयोगः स च पापमूलरजस्तमोनिवर्हणद्वारेण सत्त्वविवृ
द्धा भवतीति तमेतमुपयोगमभिप्रेत्य ब्राह्मणा विविदिषंतीत्युक्तमिति अतः कर्म्मज्ञानस्यानुपयोगादुक्तमेवमाधनचतुष्टयं पू
र्ववृत्तमिति वक्तव्यं अत्रोच्यते यदुक्तमविद्यानिवृत्तिरेव मोक्षः सा च ब्रह्मविज्ञानादेव भवतीति तदभ्युपगम्यते अविद्या
निवृत्तये वेदांतवाक्यैर्विधित्सितं ज्ञानं किंरूपमिति विवेचनीयं किं वाक्याद्वाक्यार्थज्ञानमात्रं उत तन्मूलकमुपासनात्मकं
ज्ञानमिति न तावद्वाक्यजन्यं ज्ञानं तस्य विधानमंतरेणापि वाक्यादेव सिद्धेः तावन्मात्रेणाविद्यानिवृत्त्यनुपलब्धेश्च न च
वा[illegible]भेदवासनायामनिरस्तायां वाक्यमविद्यानिवर्तकं ज्ञानं न जनयति जातेपि सर्वस्य सहसैव भेदज्ञाननिवृत्तिर्दे
घाय चंद्रैकत्वे ज्ञातेपि द्विचंद्रज्ञानानिवृत्तिवदनिवृत्तमपि छिन्नमूलत्वेन न बंधाय भवतीति सत्यां सामग्र्यां ज्ञानानुत्पत्त्य
नुपपत्तेः सत्यामपि विपरीतवासनायामाप्तोपदेशलिंगादिभिर्बाधकज्ञानोत्पत्तिदर्शनात् सत्यपि वाक्यार्थज्ञानेऽनादिवास
ना मात्रया भेदज्ञानमनुवर्तते इति भवतानशक्यं तेवक्तुं भेदज्ञानसामग्र्याम्रपि वासनायाः मिथ्यारूपत्वेन ज्ञानोत्पत्ते
वनिवृत्तत्वात् ज्ञानोत्पत्तावपि मिथ्यारूपायास्तस्या अनिवृत्तौ निवर्तकांतराभावात् कदाचिदपि नास्या वासनाया
निवृत्तिः वासनाकार्य्यभेदज्ञानं छिन्नमूलं अथ चानुवर्तत इति बालिशभाषितं द्विचंद्रज्ञानादेस्तु बाधकसन्निधावपि
मिथ्याज्ञानहेतोः परमार्थतिमिरादिदोषस्य ज्ञानबाध्यत्वाभाविनाविनष्टत्वान्मिथ्याज्ञाना निवृत्तिरविरुद्धप्रबलप्रमाण
बाधितत्वेन भयादिकार्य्यं तु निवर्तते अपि च भेदवासनानिरसनद्वारेण ज्ञानोत्पत्तिमभ्युपगच्छतां कदाचिदपि ज्ञानोत्पत्तिर्न
सेत्स्यति भेदवासनायाश्चानादिकालोपचितत्वेनापरिमितत्वात् तद्विरुद्धभावनायाश्चाल्पत्वादनया तन्निरासानुपपत्तेः
अतो वाक्यार्थज्ञानादन्यदेव ध्यानोपासनादिशब्दवाच्यं ज्ञानं वेदांतवाक्यैर्विधित्सितं तथा च श्रुतयः विज्ञाय प्रज्ञां कुर्वीत

ज्ञानरूपया विरोधिभावनया २=

3

धीर १

न्मात्रब्रह्मविज्ञानादेवाविद्यानिवृत्तेः अविद्यानिवृत्तिरेव हि मोक्षः वर्णाश्रमविशेषसाध्यसाधनेतिकर्त्तव्यताद्यनंत
विकल्पास्पदं कर्म्म सकलभेददर्शननिवृत्तिरूपाज्ञाननिवृत्तेः कथमिव साधनं भवेत् अतएव च कर्म्मणामनित्यफलत्वे
न मोक्षविरोधित्वं ज्ञानस्यैव मोक्षसाधनत्वं दर्शयंति अंतवदेवास्य तद्भवति तद्यथेह कर्म्मचितो लोकः क्षीयत एवमेवामुत्र पु
ण्यचितो लोकः क्षीयते ब्रह्मविदाप्नोति परं ब्रह्म वेद ब्रह्मैव भवति तमेव विदित्वातिमृत्युमेतीत्याद्याः यदपि चेदमुक्तं यत्तादृक
र्म्मापेक्षा विद्येति तदस्तु विरोधाच्छ्रुत्यक्षरपर्य्यालोचनया चांतःकरणनैर्मल्यद्वारेण विविदिषोत्पत्तावुपयुज्यते न फलोत्पत्तौ
विविदिषंतीति श्रवणात् विविदिषायां जातायां ज्ञानोत्पत्तौ शमादीनामेवांतरंगोपायत्वं श्रुतिरेवाह शांतो दांतः उपरतस्ति
तिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति तदेवं जन्मान्तरशतानुष्ठितानभिसंहितफलविशेषकर्म्ममृदितकषायस्यावि
विदिषोत्पत्तौ सत्याम् सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं सत्यं ज्ञानमनंतं ब्रह्म निष्कलं निष्क्रियं शांतं निरवद्यं निरंज
नं अयमात्मा ब्रह्म तत्त्वमसीत्यादिवाक्यजन्यज्ञानादविद्यानिवृत्तेर्वाक्यार्थज्ञानोपयोगीनि च श्रवणमनननि
दिध्यासनानि श्रवणं नाम वेदांतवाक्यान्यात्मैकत्वविद्याप्रतिपादकानीति तत्त्वदर्शिन आचार्य्यात् न्याययुक्तार्थस्मरणं
एवमाचार्य्योपदिष्टस्यार्थस्य स्वात्मन्येवमेव युक्तमिति हेतुतः प्रतिष्ठापनं मननं एतद्विरोध्यनादिभेदवासनानिरसनायाऽ
स्यार्थस्यानवरतभावना निदिध्यासनम् एवं श्रवणमननादिभिर्निरस्तसमस्तभेदवासनस्य वाक्यार्थज्ञानमविद्यां निव
र्त्तयतीत्येवंरूपस्य श्रवणस्याप्यपेक्षितमेव पूर्ववृत्तं वक्तव्यं तच्च नित्यानित्यवस्तुविवेकः शमदमादिसाधनसंपत्
इहामुत्र च फलभोगविरागो मुमुक्षुत्वं चेत्येतत्साधनचतुष्टयं अनेन विना जिज्ञासानुपपत्तेः अर्थस्य च भावादेवेदमेव पूर्ववृ
त्तमिति ज्ञायते एतदुक्तं भवति ब्रह्मस्वरूपाच्छादिकाविद्यामूलम् अपारमार्थिकं भेददर्शनमेव बंधमूलम् बंधश्चापारमार्थि ।

तस्यैव वेदनस्योपासनरूपस्यासकृदावृत्तस्य ध्रुवानुस्मृतित्वमुपवर्णितं सेयं स्मृतिर्दर्शनरूपा प्रतिपादिता दर्शनरूपता
च प्रत्यक्षतापत्तिः एवं प्रत्यक्षतापन्नामपवर्गसाधनभूतां स्मृतिं विशिनष्टि नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना
श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वामिति अनेन केवलश्रवणमनननिदिध्यासनानामात्मप्राप्त्य
नुपायत्वमुक्त्वा यमेवैष आत्मा वृणुते तेनैव लभ्य इत्युक्तं प्रियतम एव हि वरणीयो भवति यस्यायं निरतिशयप्रियः स एवास्य
प्रियतमो भवति यथायं प्रियतम आत्मानं प्राप्नोति तथा स्वयमेव भगवान् प्रयतत इति भगवतैवोक्तं तेषां सततयुक्तानां भ
जतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयान्ति ते इति प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः इति च अतः साक्षात्काररू
पा स्मृतिः स्मर्यमाणात्यर्थप्रियत्वेन स्वयमप्यत्यर्थप्रिया यस्य स एव परेणात्मना वरणीयो भवतीति तेनैव लभ्यते परमा
त्मेत्युक्तं भवति एवंरूपा ध्रुवानुस्मृतिरेव भक्तिशब्देनाभिधीयते उपासनपर्यायत्वाद् भक्तिशब्दस्य अत एव श्रुतिस्मृतिभि
रेवमभिधीयते तमेवं विदित्वातिमृत्युमेति तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते नाहं वेदैर्न तपसा न दानेन
न चेज्यया भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्य
येति एवंरूपायाः ध्रुवानुस्मृतेः साधनानि यज्ञादीनि कर्माणि यज्ञादिश्रुतेरश्ववदित्यभिधास्यते यद्यपि विविदिषन्तीति य
ज्ञादयो विविदिषायां विनियुज्यन्ते तथापि तस्यैव वेदनस्य ध्यानरूपस्याहरहरनुष्ठीयमानस्याभ्यासाधेयातिशयस्याप्रया
णादनुवर्तमानस्य ब्रह्मप्राप्तिसाधनत्वात्तदुत्पत्तये सर्वाण्याश्रमकर्माणि यावज्जीवमनुष्ठेयानि वक्ष्यति च आप्रयाणात्तत्रापि
हि दृष्टम् अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् सहकारित्वेन च इत्यादिषु वाक्यकारश्च ध्रुवानुस्मृतेर्विवेकादिभ्य एव निष्पत्तिमाह
तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः सम्भवान्निर्वचनाच्चेति विवेकादीनां स्वरूपं चाह जात्याश्रयनिमित्ताद

तस्याः ध्रुवानुस्मृतेः साधनानि ७

शब्दप्रमा ॥ ७

जात्याश्रयदुष्टं जनो दिव्याश्रयदुष्ट
पतितादान्नं निमित्तदुष्टं श्वकाकादि

ध्यानं करोति १   श्रोतः प्राप्तत्वात् ५

अनुविद्य विजानाति ओमित्येवात्मानं ध्यायथ निचाय्य तं मृत्युमुखात् प्रमुच्यते आत्मानमेव लोकमुपासीत आत्मा
वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्य इत्येवमाद्याः अत्र निदिध्यासितव्य इत्या
दिनैकार्थ्यात् अनुविद्य विजानाति विज्ञाय प्रज्ञां कुर्वीतेत्येवमादिभिर्वाक्यार्थज्ञानं ध्यानोपकारिकत्वात् तदनुविद्य विज्ञायेत्यनूद्य
प्रज्ञां कुर्वीत विजानातीति ध्यानं विधीयते श्रोतव्य इति चानुवादः स्वाध्यायस्यार्थपरत्वेनाधीतवेदः पुरुषः प्रयोजनवदर्था
वबोधित्वदर्शनात् तन्निर्णयाय स्वयमेव श्रवणे प्रवर्त्तते इति श्रवणस्य प्राप्तत्वात् श्रुतस्य प्रतिष्ठार्थत्वान्मननस्य मन्तव्य इति
चानुवादः तस्माद्ध्यानमेव विधीयते आवृत्तिरसकृदुपदेशादिति तदिदं अपवर्गोपायतया विधित्सितं वेदनमुपा
सनमित्यवगम्यते विद्यमुपास्य व्यतिरेकेणोपक्रमोपसंहारदर्शनात् मनो ब्रह्मेत्युपासीत यत्र भाति च तपति च कीर्त्या यशसा
सायुज्यं ब्रह्मवर्चसेन य एवं वेद नम्र तेन अल्पस्त्वोऽह्येषः आत्मेत्येवोपासीत यस्तद्वेद यत्स वेद स मयैतदुक्त इत्यत्र अनु म एतां भगवो दे
वतां शाधि यां देवतामुपास्स इति ध्यानं च तैलधारावदविच्छिन्नस्मृतिसंतानरूपं ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः
इति ध्रुवायाः स्मृतेरपवर्गोपायत्वश्रवणात् सा च स्मृतिर्दर्शनसमानाकारा भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चा
स्य कर्माणि तस्मिन् दृष्टे परावरे इत्यनेनैकार्थ्यात् एवं चाह आत्मा वा अरे द्रष्टव्य इत्यनेन निदिध्यासनस्य दर्शनरूपता विधीय
ते भवति च स्मृतेर्भावनाप्रकर्षाद्दर्शनरूपता बाधकारणेन तत्सर्वं प्रपंचितं वेदनमुपासनं स्यात् तद्विषये श्रवणादिति सर्वासूपनि
षत्सु मोक्षसाधनतया विहितं वेदनमुपासनमित्युक्तं सकृत्प्रत्ययं कुर्यात् शब्दार्थस्य कृतत्वात् प्रयाजादिवदिति पूर्वपक्षं कृत्वा
सिद्धान्तः उपासनशब्दादिति वेदनमसकृदावृत्तं मोक्षसाधनमिति निर्णीतं उपासनं स्यात् ध्रुवानुस्मृतिः दर्शनान्निर्वचनाच्चेति ॥

असकृचिन्ता २   निर्णीतं च यदात्मैव परतस्मिन्नुरर मतं र कृते प्रपतत्समयं भवति
प्रमाणः एतस्मिन्नुपासने ... स्वत्वं ...
... तेऽप्यतत्सम भवमवतीति निर्वचनं तु माह निम्नसह ...

श्रुतिर्लिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् ... योग वर्तमान रत्ना २८

श्री
भा.
५

उ. भामत्यादीनां

स्म कर्ममीमांसावसेयमिति सैवापेक्षिता ब्रह्ममीमांसायाः पूर्ववृत्ता वक्तव्या अपि च नित्यानित्यवस्तुविवेकादय ब्रह्ममीमांसाश्रवणात्प्रा
गेऽनेन संपत्स्यन्ते फलकरणेतिकर्तव्यताधिकारिविशेषनिश्चयाद्धि कर्मस्वरूपतत्फलतास्थिरत्वास्थिरत्वानि सत्वादीनो दु
रवबोधत्वात् एषां साधनत्वं च विनियोगावसेयं विनियोगश्च श्रुतिलिङ्गादिभिः स च तार्तीयः उद्गीथाद्युपासना निःकर्मसमृद्ध्यर्थान्य
पि ब्रह्मदृष्टिरूपाणि ब्रह्मज्ञानापेक्षाणीति हि चिन्तनीयानि नान्यपि कर्मण्युपनिबद्धानि तत्फलानि ब्रह्मविद्योत्पादनानीति तत्साफल्याया
दनायैतानि सुतरामिह वसंगतानि तेषां च कर्मस्वरूपाधिगमापेक्षा सर्वसंमता यद्ध्याहुः शेषविशेषप्रत्यनीकचिन्मात्रं ब्रह्मैव परमा
र्थः तदतिरिक्तनानाविधज्ञातृज्ञेयतत्कृतज्ञानभेदादि सर्वं तस्मिन्नेव परिकल्पितं मिथ्याभूतं सदेव सोम्येदमग्र आसीदेकमेवा
द्वितीयं अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं
तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः सत्यं ज्ञानमनन्तं ब्रह्म निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं यस्यामतं तस्य मतं मतं यस्य
न वेद सः अविज्ञातं विजानतां विज्ञातमविजानतां न दृष्टेर्द्रष्टारं पश्येर्न मतेर्मन्तारं मन्वीथाः आनन्दो ब्रह्म इदं सर्वं यदयमात्मा नेह
नानास्ति किंचन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्के
न कं पश्येत्तत्केन कं विजानीयात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं
भवति न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ प्रत्यस्तमितभेदं यत्सत्तामात्रमगोच
रं वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितं ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितं परमार्थ
स्त्वमेवैको नान्योऽस्ति जगतः पते यदेतद्दृश्यते मूर्तमेतज्ज्ञानात्मनस्तव भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ज्ञानस्वरूपम
खिलं जगदेतदबुद्धयः अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत् ज्ञानात्मकं प्रपश्यन्ति त्वद्रू
पं परमेश्वर तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत् विज्ञानं परमार्थो हि द्वैतिनोऽतथ्यदर्शिनः यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम ॥
तदैषोऽहमयं चान्य इति वक्तुमेवमपीष्यते वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः अभेदव्यापिनो वायोस्तथासौ परमात्मनः सोऽहं सो

मतं ८

पाणेहोमश्चातिथीनांसपर्यातर्पणंबलिः एतेपञ्चमहायज्ञादेवयज्ञादिसंज्ञकाः ३ —
पाठांतरं आलेवनं २ आदिरः पादपर्यन्तभगवध्यानं २ असदूक्तमप्यचिन्तनं ४

दुष्टादन्नात्कायशुद्धिर्विवेकइति अत्रनिर्वचनं आहारशुद्धौसत्वशुद्धिः सत्वशुद्धौध्रुवानुस्मृतिरिति विमोकः कामानभिष्वङ्गइति
शांतउपासीतेतिनिर्वचनं आरंभणंसंशीलनंपुनःपुनरभ्यासइतिनिर्वचनं स्मात्तमुदाहृतंभाष्यकारेण सदातद्भावभावितइति
२४ पंचमहायज्ञानुष्ठानंशक्तितःक्रियेतिनिर्वचनं क्रियावानेषब्रह्मविदांवरिष्ठः तमेववेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेन
तपसानाशकेनेतिच सत्यार्जवदयादानाहिंसानभिध्याःकल्याणानीति निर्वचनं सत्येनलभ्यस्तपसाह्येषआत्मेत्येवविरजोब्रह्मलोकइत्या
दि देशकालवैगुण्याच्छोकवस्त्वाद्यनुस्मृतेश्चतज्जन्यंदैन्यमभास्वरत्वंमनसोवसादइतितद्विपर्ययोनवसादः निर्वचनं नायमा
त्मावलहीनेनलभ्यइति तद्विपर्ययजाहृष्टिरुद्धर्षइति तद्विपर्ययोनुद्धर्षइति अतिसंतोषश्चविरोधीत्यर्थः निर्वचनमपि शांतो
दांतइति एवंनियमयुक्तस्याश्रमविहितकर्मानुष्ठानेनैवविद्यानिष्पत्तिरित्युक्तंभवति तथाचश्रुत्यंतरं विद्यांचाविद्यांचयस्
कर्मणा तद्वेदोभयंसह अविद्ययामृत्युंतीर्त्वाविद्ययामृतमश्नुतइति अत्राविद्याशब्दाभिहितंवर्णाश्रमविहितंकर्म अविद्याकर्म
णामृत्युंज्ञानोत्पत्तिविरोधिप्राचीनंकर्मतीर्त्वाविद्ययाज्ञानेनामृतंब्रह्माश्नुतेप्राप्नोतीत्यर्थः मृत्युतरणोपायतयाप्रतीतः
विद्याविद्येतरविहितंकर्मैव यथाकं इत्याजसोविस्मृत्यवान् ज्ञानमपाश्रयः ब्रह्मविद्यामधिष्ठायततुंमृत्युमविद्ययेति ज्ञान
विरोधिचकर्मपुण्यपापरूपंब्रह्मज्ञानोत्पत्तिविरोधित्वेनानिष्टफलतयोभयोरपिपापशब्दाभिधेयत्वं अस्यज्ञानविरोधित्वंज्ञानोत्पत्तिहे
तुभूतशुद्धसत्वविरोधिरजस्तमोविवृद्धिद्वारेणपापस्यचज्ञानोत्पत्तिविरोधि[illegible]त्वं एषएवासाधुकर्मकारयतितंयमधोनिनीषतीतिश्रु
त्याकाम्यते रजस्तमसोर्यथार्थज्ञानावरणहेतुत्वं सत्त्वस्यचयथार्थज्ञानहेतुत्वंभगवतैवप्रतिपादितं सत्वात्संजायतेज्ञानमि
त्यादिना अतश्चज्ञानोत्पत्तयेपापंकर्मनिरसनीयं तन्निरसनंचानभिसंहितफलेनानुष्ठितेनधर्मेण तथाचश्रुतिः धर्मेणपापमप
नुदतीति तदेवंब्रह्मप्राप्तिसाधनभूतंज्ञानं सर्वाश्रमकर्मापेक्षं अतोपेक्षितकर्मस्वरूपज्ञानं केवलकर्मणामल्पास्थिरफलत्वज्ञानं

भागवतेन २

दृष्टं प्रदीपज्वालाभिन्नाप्रत्यक्षेत्तलात्यवर्तितकार्यरूपानेककारणजन्यत्वात् ... कारणामेककारणजन्यपदवत् इत्यनुमानस्य ... माहृत्य ... समताकर्षनाभिति
प्रत्यक्षोपमर्दकत्वं बाध्यबाधकभावे तुल्यत्वसापेक्षत्वनिरपेक्षत्वादीनां प्रयोजकत्वेन संभवति अपेक्षितत्वेनात एवातुल्यत्वेन प्रत्यक्षोपमर्दकत्वासंभवात् ९

मा १

6

दित्वाति मत्तुमेति नान्यः पंथा अयनाय विद्यते इत्याद्याः श्रुतयः अत्र मृत्युशब्देनाविद्याभिधीयते यथाह सनत्सुजातवचनं प्रमादं वै
मृत्युमहं ब्रवीमि सदाप्रमादममृतत्वं ब्रवीमीति सत्यज्ञानमनन्तं ब्रह्मविज्ञानमानंदं ब्रह्मेत्यादिकं बाधकवाक्यावसेयं निर्विशेषचि
न्मात्रस्वरूपब्रह्मात्मैकत्वविज्ञानं च अथ योन्यां देवतामुपास्तेऽन्योऽसावन्योहमस्मीति न स वेद आत्मेत्येवोपासीत तत्त्वमसि अहं ब्रह्मा
स्मि भगवो देवते ऽहं वै त्वमसि भगवो देवते त्वं योऽहं सोऽसौ योऽसौ सोऽहमित्यादिवाक्यसिद्धं वक्ष्यति चैतदेवम् आत्मेति तूपगच्छन्ति ग्राहय
न्ति चेति तथा चाह वाक्यकारः आत्मेत्येव तु गृह्णीयात् सर्वस्य तन्निष्पत्तेरिति अनेन च ब्रह्मात्मैकत्वविज्ञानेन मिथ्यारूपस्य सका
रणस्य बंधस्य निवृत्तिर्युक्ता ननु च सकलभेदनिवृत्तिः प्रत्यक्षविरुद्धा कथमिव शास्त्रजन्यज्ञानेन क्रियते कथं वा रज्जुरेषा न सर्प पर:
इति ज्ञानेन प्रत्यक्षसिद्धसर्पनिवृत्तिः क्रियते तत्र द्वयोः प्रत्यक्षयोर्विरोधः इह तु प्रत्यक्षमूलस्य शास्त्रस्य प्रत्यक्षस्य चेति चेत्तुल्ययोर्विरो
धे कथं बाध्यबाधकभावः पूर्वोत्तरयोर्दुष्टकारणजन्यत्वतदभावाभ्यामिति चेत् शास्त्रप्रत्यक्षयोरपि समानमेतत् एतदुक्तं भवति बाध्य
बाधकभावे तुल्यत्वसापेक्षत्वनिरपेक्षत्वादिरकारणं ज्वालाभेदानुमानेन प्रत्यक्षोपमर्दायोगात् तत्र हि ज्वालैक्यं प्रत्यक्षेणा
वगम्यते एवं च सति द्वयोः प्रमाणयोर्विरोधे यत्संभाव्यमानान्यथासिद्धं तद्बाध्यम् अनन्यथासिद्धमनवकाशमितरद्बाधकमिति बाध्यबाधक
भावनिर्णय इति तस्मादनादिनिधनाविच्छिन्नसंप्रदायासंभाव्यमानदोषगंधानवकाशशास्त्रजन्यनिर्विशेषनित्यशुद्धमुक्तबुद्धस्व
प्रकाशचिन्मात्रब्रह्मात्मभावावबोधेन संभाव्यमानदोषसावकाशप्रत्यक्षादिसिद्धविविधविकल्परूपबंधनिवृत्तियुक्तैव संभाव्यते चाविविध
विकल्पभेदप्रपंचग्राहिप्रत्यक्षस्यानादिभेदवासनादिरूपाविद्याख्यदोषः ननु अनादिनिधनाविच्छिन्नसंप्रदायतया निर्दोषस्यापि शास्त्रस्य ज्यो
तिष्टोमेन स्वर्गकामो यजेतेत्येवमादेर्भेदावलंबिनो बाध्यत्वं प्रसज्येत सत्यं पूर्वापरापच्छेदे पूर्वशास्त्रवन्मोक्षशास्त्रस्य निरवकाश
त्वात्तेन बाध्यत एव वेदान्तवाक्येष्वपि सगुणब्रह्मोपासनपराणां अयमेव न्यायः निर्गुणत्वात्परस्य ब्रह्मणः ननु च यः सर्वज्ञः सर्ववि
त् पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च सत्यकामः सत्यसंकल्प इत्यादि ब्रह्मस्वरूपप्रतिपादनपराणां कथं बाध्यत्वं निर्गुणवा

सर्पप्रत्यक्षरज्जुप्रत्यक्षयोः प्रत्यक्षत्वेन तुल्यत्वं बाध्यबाधकभावे कारणं परस्परनिरपेक्षयोरेव पदशास्त्रयोः इह वनीपशास्त्रयोः निरपेक्षत्वमेव बाध्यबाधकभावे कारणं न हिंस्यात्सर्वा भूतानीति सामान्यशास्त्रस्य अग्निषोमीयं पशुमालभेतेति विशेषशास्त्रेण वा
प्रत्वं समानविषयत्वेन सापेक्षत्वमत्र कारणम्

त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहं इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्टिः विभेदजनके ज्ञाने नाशमा
स्थिते किं गते आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यति अहमात्मा गुडाकेश सर्वभूताशयस्थितः क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रे
षु भारत न तदस्ति विना यत्स्यान्मया भूतं चराचरं इत्यादिभिर्वस्तुस्वरूपोपदेशपरैः शास्त्रैर्निर्विशेषचिन्मात्रं ब्रह्मैव सत्यं अन्यत्सर्वं मिथ्ये
त्यभिधानात् मिथ्यात्वं नाम प्रतीयमानत्वपूर्वकयथावस्थितवस्तुज्ञाननिवर्त्यत्वं यथा रज्ज्वाद्यधिष्ठानसर्पादेः दोषवशाद्वितत्क
ल्पने एवं चिन्मात्रवपुषि परे ब्रह्मणि दोषपरिकल्पितमिदं देवतिर्यङ्मनुष्यस्थावरादिभेदं सर्वं जगद्यथावस्थितब्रह्मस्वरूपावबोधबाध्यं मि
थ्यारूपं दोषश्च स्वरूपतिरोधानविविधविचित्रविक्षेपकरी सदसदनिर्वचनीयानाद्यविद्या अनन्ते न रिः ... एतेषां सत्यानां अनृतम
पिधानम् नासदासीन्नो सदासीत्तदानीं तम आसीत्तमसा गूढमग्रे प्रकेतं माया तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं इन्द्रो मायाभिः पु
रुरूप ईयते मम माया दुरत्यया अनादिमायया सुप्तो यदा जीवः प्रबुध्यत इत्यादिभिः निर्विशेषचिन्मात्रे ब्रह्मैवानाद्यविद्यया सदसद
निर्वाच्यया तिरोहितस्वरूपं स्वगतं नानात्वं पश्यतीत्यवगम्यते यथोक्तं ज्ञानस्वरूपो भगवान्यतोऽसावशेषमूर्तिर्न तु वस्तुभूतः ततो हि शैला
ब्धिधरादिभेदान् जानीहि विज्ञानविजृम्भितानि यदा तु शुद्धं निजरूपि सर्वकर्मक्षये ज्ञानमपास्तदोषं तदा हि संकल्पतरोः फलानि भवन्ति नो वस्तुषु वस्तु
भेदाः तस्मान्न विज्ञानमृतेऽस्ति किंचित्क्वचित्कदाचिद्द्विज वस्तुजातं विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाभ्युपेतं ज्ञानं विशुद्धं वि
मलं विशोकमशेषलोभादिनिरस्तसंगम् एकं सदैकं परमः परेशः स वासुदेवो न यतोऽन्यदस्ति सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यम
सत्यमन्यत् एतत्तु यत्संव्यवहारभूतं तत्रापि चोक्तं भुवनाश्रितं ते इति अस्या अविद्याया निर्विशेषचिन्मात्रब्रह्मात्मैकत्वविज्ञानेन निवृ
त्तिं वदन्ति न पुनर्मृत्यवे तदेकं पश्यति न पश्यो मृत्युं पश्यति यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दतेऽ
थ सोऽभयं गतो भवति भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ब्रह्मवेद ब्रह्मैव भवति तमेव वि
भगवद्धर्मतात्पर्ये [illegible] ...त्यालानतस्य ...केनाप्यनियम्पद्धत्यपिः २

श्री
मा
७

रंजनं निर्गुणमित्यादिनाम्नाविरोधः अतश्चैतल्लक्षणमाकामसंदर्भकरसमेव अपादयति ननु च सत्यज्ञानादिपदानां स्वार्थप्रहाणेन स्वार्थविरो
धित्याच्च वस्तुस्वरूपविपस्थापनपरत्वे लक्षणास्यान्नैव दोषः अभिधानवृत्तेरपि तात्पर्यवृत्तेर्बलीयस्त्वात् सामानाधिकरण्यस्य लोके ए
व तात्पर्यमिति सर्वसंमतं ननु च सर्वपदानां लक्षणा न दृष्टचरीततः किं वाक्यतात्पर्याविरोधेन लेकस्यापि न दृष्टा सम
भिव्याहृतपदसमुदायस्यैतत्तात्पर्यमिति निश्चिते सति द्वयोः त्रयाणां सर्वेषां वा तदविरोधायैकस्यैव लक्षणा न दो
षाय तथा च यथा मीमांसकैरभ्युपगम्यते कार्य्यगतस्वार्थवादिभिर्लौकिकवाक्येषु सर्वेषां पदानां लक्षणा समाश्रीयते अपूर्व
कार्य्यत्वलिङ्गादेर्मुख्यत्वन्तत्वाल्लिङादिभिः क्रियाकार्य्यलक्षणया प्रतिपाद्यते कोप्यन्वितस्वार्थाभिधायिनो चेतरे वापि
पदानां अपूर्वकार्य्यान्वित एव मुख्योर्थ इति क्रियाकार्य्यान्वितप्रतिपादने लाक्षणिकमेव अतो वाक्यतात्पर्याविरोधाय सर्व
वेपदानां लक्षणापि न दोषः अतः इदमेवार्थजातं प्रतिपाद्यं वेदान्ताः प्रमाणं प्रत्यक्षादिविरोधे च शास्त्रस्य बलीयस्त्व
मुक्तं सति च विरोधे बलीयस्त्वं न त्वत्र विरोध एव न दृश्यते निर्विशेषसन्मात्रब्रह्मग्राहित्वात्प्रत्यक्षस्य ननु च घटोस्ति
पटोस्तीति नानाकारवस्तुविषयं प्रत्यक्षं कथमिव सन्मात्रग्राहीत्युच्यते विलक्षणग्रहणेः भावे सति सर्वेषां ज्ञानानामे
कविषयत्वेन धारावाहिकविज्ञानवदेकव्यवहारहेतुत्वं स्यात् सत्यं तथैवात्र विविच्यते कथं घटोस्तीत्यत्रास्तित्वं तद्भेदश्च
अवगृह्यते न च द्वयोरपि व्यवहारयोः प्रत्यक्षमूलत्वं संभवति तयोर्भिन्नकालज्ञानपरत्वात् प्रत्यक्षज्ञानस्यैकक्षणव
र्तित्वात् तत्र स्वरूपं भेदो वा प्रत्यक्षस्य विषय इति विवेचनीयं भेदग्रहणस्य स्वरूपग्रहणात् स्मृतियोगिस्मरणस्य व्यवहारः॥
भिन्नं भेदेन नाम कश्चित्पदार्थो न्यायविद्भिर्निरूपयितुं न शक्यते भेदस्तावद्वस्तुनः स्वरूपं वस्तुस्वरूपे गृहीते स्वरूपस्य
प्रतियोगिसव्यपेक्षत्वात् तत्स्मरण
वहारवत्सर्वस्माद्भेदव्यवहारप्रसक्तेः नच वाच्यं स्वरूपे गृहीतेऽपि भिन्न इति व्यवहारस्य

ज्ञानदाननामनावधपीकरोत

पेक्षत्वादेव स्वरूपविषयत्वे मनुष्यत्वप्रयत्नीयमि
न भेदः प्रत्यक्षेण गृह्यते अतो भ्रान्तिमूलत्वमेव भे
त्रुटिः ३

कसामर्थ्यादितिब्रूमः एतदुक्तंभवति अस्थूलमनण्वह्रस्वं सत्यंज्ञानमनंतंब्रह्म निर्गुणंनिरंजनमित्यादिवाक्यानिनिरस्तविशेषकू
टस्थनित्यचैतन्यंब्रह्मेतिप्रतिपादयंती तथापिचसगुणंउभयविधवाक्यानांविरोधेतेनैवापच्छेदन्यायेननिर्गुणवाक्यानांगुणलोपेस्यबलेन
परत्वाद्बलीयस्त्वमितिनकिंचिदवहीनं ननुचसत्यंज्ञानमनंतंब्रह्मेत्यत्रसत्यज्ञानादयोगुणाःप्रतीयंतेनेत्युच्यतेसामानाधिकरण्ये
नैकार्थ्यप्रतीतेः अनेकगुणविशिष्टाभिधानेप्येकार्थत्वमविरुद्धमितिचेत् अनभिधानज्ञोसिदेवानांप्रियः एकार्थत्वेनामसर्वपदानाम
र्थैक्यं विशिष्टपदार्थाभिधानेविशेषणभेदेनपदानामर्थभेदोवर्जनीयः ततश्चैकार्थत्वंनसिध्यति एवंतर्हि सर्वपदानांपर्यायतास्यात्
अविशिष्टार्थाभिधायित्वात् एकार्थाभिधायित्वेप्यपर्यायत्वमवहितमनाःशृणु एकत्वतात्पर्यनिश्चयादेकस्यैवार्थस्यतत्तत्पदार्थ
विरोधिप्रत्यनीकपरत्वेनसर्वपदानामर्थवत्त्वमेकार्थत्वमपर्यायताच एतदुक्तंभवति लक्षणतःप्रतिपत्तव्यंब्रह्मसकलेतरपदार्थवि
रोधिरूपंसर्वमनेनपदत्रयेणफलतोभ्युदस्यते तत्रसत्यपदंविकारास्पदत्वेनासत्याद्वस्तुनोव्यावृत्तब्रह्मपरं ज्ञानपदंचान्याधीनप्रकाश
जडरूपाद्वस्तुनोव्यावृत्तपरं अनंतपदंचदेशतःकालतोवस्तुतश्चपरिच्छिन्नाद्व्यावृत्तपरं नचव्यावृत्तिर्भावरूपोऽभावरूपोवाधर्मः
अपितुसकलेतरविरोधिब्रह्मैव यथाघटेतरप्रकारेः कार्ष्ण्यादिव्यावृत्तिः नतत्पदार्थरूपमेवनधर्मान्तरं एवमेकस्यैववस्तुनस्सकलेतरवि
रोधाकारतामवगमयत्सदर्थवत्तरमेकार्थमपर्यायंचपदत्रयमिति तस्मादेकमेवब्रह्मस्वयंज्योतिःनिर्धूतनिखिलविशेषमित्युक्तंभवति
एवंवाक्यार्थप्रतिपादनेसत्येवसदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमित्यादिभिरैकार्थ्यं यतोवाइमानिभूतानिजायंतेसदेवसोम्येदम
ग्रआसीत् आत्मावाइदमेकएवाग्रआसीत् इत्यादिभिर्जगत्कारणतयोपलक्षितस्यब्रह्मणःस्वरूपमिदमुच्यतेसत्यंज्ञानमनंतंब्रह्मे
ति तत्रसर्वशाखाप्रत्ययन्यायेनकारणवाक्येषुसर्वेषुसजातीयविजातीयव्यावृत्तमद्वितीयंब्रह्मावगतं जगत्कारणतयोपलक्षि
तस्यब्रह्मणोऽद्वितीयस्यप्रतिपिपादयिषितस्यरूपंतदविरोधेनवक्तव्यम् अद्वितीयश्रुतिर्गुणतोपिसद्वितीयतांनसहते अन्यथाचानि

सिद्धाऽनुभूतित्वात् अस्मृतसिद्धेर्घटादिवदननुभूतित्वप्रसंगः किं चानुभवापेक्षा च अनुभूतेर्न शक्या कल्पयितुं स्वसत्तयैव प्रकाशमा-
नत्वात् न ह्यनुभूतिर्वेद्यमाना घटादिवत् अप्रकाशा दृश्यते येन प्रकाशाय तत्प्रकाशाभ्युपगम्येत अर्थवन्मनुषे उभन्नायामप्यनुभूतौ
विषयमात्रमवभासते घटोऽनुभूयत इति नहि कश्चित् घटो यमिति ज्ञानं तत्तदानीमेवाविषयभूतामनिदंभावानुभूतिमप्यनुभवति ॥
तस्मात् घटादिप्रकाशानिष्पत्तौ चक्षुरादिकरणसन्निकर्षवदनुभूतेः सद्भाव एव हेतुः तदनंतरमर्थगतकादाचित्कप्रकाशातिशयलि-
ङ्गेनानुभूतिरनुमीयते एवं तर्ह्यनुभूतेरजडायाः अर्थवज्जडत्वमापद्येत इति चेत् किमिदमजडत्वं नाम न तावत्स्वसत्तायाः प्रकाशा-
भिचारः सुखादिष्वपि तत्संभवात् नहि कदाचिदपि सुखादयः संतो नोपलभ्यंते अतोऽनुभूतिः स्वयमेवानुभूयते अर्थान्तरस्य
घटो यं तुल्यत्वस्य स्वात्मस्पर्शवद्दृष्टत्वादिति तदिदमनाकलितानुभवविभवस्य स्वमतिविजृंभितं अनुभूतिव्यतिरेकि-
णो विषयधर्मस्य प्रकाशस्य रूपादिवदनुपलब्धेः उभयाभ्युपेतानुभूतेर्वा शेषव्यवहारोपपत्तौ प्रकाशाख्यधर्मकल्पनानु-
पपत्तेश्च अतो नानुभूतेरनुमीयते नापि ज्ञानांतरसिद्धा अपि तु सर्वसाधयित्र्यनुभूतिः स्वयमेव सिध्यति प्रयोगश्च अनुभूति-
रनन्याधीनस्वधर्मव्यवहारा स्वसंबंधादर्थांतरे तद्धर्मव्यवहारहेतुत्वात् यः स्वसंबंधादर्थांतरे तद्धर्मव्यवहारहेतुः स तयोः
स्वस्मिन्ननन्याधीनो दृष्टः यथा रूपादिश्चासु चक्षुरादेरूपादिर्दीप्त्यादिः स्वसंबंधाद्घटादिजनयन् स्वस्मिन्नरूपादिसंब-
न्धाधीनश्च ... अतोऽनुभूतिरात्मनः प्रकाशमानत्वे प्रकाशत इति व्यवहारे च स्वयमेव हेतुः सेयं स्वयंप्रकाशानुभूतिर्नि-
त्या च प्रागभावाद्यभावात् तदभावश्च स्वतः सिद्धत्वादेव न ह्यनुभूतेः स्वतःसिद्धायाः प्रागभावः स्वतोऽन्यतो वाऽवगंतुं शक्यते अनु-
भूतिः स्वाभावमवगमयंती सती तावन्नावगमयति तस्याः सत्वविरोधाद्देवतदभावो नास्तीति कथं स्वाभावमवगमयति एवम-
सत्यपि नावगमयति अनुभूतिः स्वयमसती स्वाभावे कथं प्रमाणं भवेत् नाप्यन्यतोऽवगंतुं शक्यते अनुभूतेरनन्यगोचरत्वात् अ-

भावेन तदानीमेव न भेदव्यवहारः स्यादिति स्वरूपमात्रभेदवादिनाऽप्रतियोगिव्यपेक्षा च नेष्यत इति तुल्यमात्मस्वरूपभेदयोः स्वरूपत्वाविशेषा
त् यथा स्वरूपव्यवहारो न प्रतियोग्यपेक्षः भेदव्यवहारोऽपि तथैव स्यात् हस्तः कर इतिवत् घटो भिन्नः इति पर्य्यायत्वं च नापि धर्म्मः
धर्म्मत्वे सति तस्य स्वरूपाद्भेदे वक्तव्याश्रयत्वाद्यः अन्यथाऽस्वरूपमेव स्यात् भेदे तस्यापि भेदस्तद्धर्म्मस्तस्यापीत्यनवस्था किं च जाता
द्धर्म्मविशिष्टवस्तुग्रहणे सति भेदग्रहणं भेदग्रहणे सति जात्यादिधर्म्मविशिष्टवस्तुग्रहणमितरेतराश्रयणं अतो भेदस्या
पि दुर्निरूपत्वात् सन्मात्रस्यैव प्रकाशकं प्रत्यक्षं किंच घटोऽस्ति पटोऽस्ति घटोऽनुभूयते पटोऽनुभूयत इति सर्वे पदार्थाः सत्तानुभूति
घटिता एव दृश्यन्ते अत्र सन्मात्रं सर्वासु प्रतिपत्तिष्वनुवर्त्तमानं दृश्यत इति तदेव परमार्थः विशेषास्तु व्यावर्त्तमानतयाऽपरमार्थाः रज्जु
सर्पादिवत् यथा रज्ज्वधिष्ठानतयाऽनुवर्त्तमाना परमार्थाः सती व्यावर्त्तमानाः सर्पभूदलनाम्बुधारादयोऽपरमार्थाः ननु च रज्जुसर्पा
दौ रज्जुरियं न सर्प इत्यादिरज्ज्वधिष्ठानयाथात्म्यज्ञानेन बाधितत्वात् सर्पादेरपारमार्थ्यं न व्यावर्त्तमानत्वात् रज्ज्वादेरपि पारमार्थ्यं ना
नुवर्त्तमानतया किंत्वबाधितत्वात् अत्र तु घटादीनामबाधितानां कथमपारमार्थ्यमुच्यते घटादेर्दृष्टव्यावृत्तिः सा किंरूपेति विवे
चनीया किं घटोऽस्तीत्यत्र पटाभावः स्वित् तर्हि घटोऽस्तीत्यनेन पटादीनां बाधितत्वं अतो बाधफलभूता विषयनिवृत्तिर्व्यावृत्तिः सा व्या
वर्त्तमानानामपारमार्थ्यं साधयति रज्जुवत् सन्मात्रमबाधितमनुवर्त्तते तस्मात्सन्मात्रातिरेकि सर्वमपारमार्थ्यं प्रयोगश्च भवति
सदपरमार्थः अनुवर्त्तमानत्वात् रज्जुसर्पादौ रज्ज्वादिवत् घटादयोऽपरमार्थाः व्यावर्त्तमानत्वात् रज्ज्वाद्यधिष्ठानसर्पादिवदिति ॥
एवं सत्यनुवर्त्तमानानुभूतिरेव परमार्थः सैव सती ननु च सन्मात्रमनुभूतेर्विषयतया ततो भिन्नं नैवं भेदो हि प्रत्यक्षाविषयत्वात् दु
र्निरूपत्वाच्च पुरस्तादेव निरस्तः अत एव सतोऽनुभूतिविषयभावोऽपि न प्रमाणपदवीमनुसरति तस्मात्सदनुभूतिरेव सा च स्वतःसि

श्री
भा
९

न स्फुटतरप्रकाशो हृदयचरः । यतो हं जानामीति ज्ञातायमहमर्थश्चिन्मात्रात्मनो न परमार्थिको धर्मः । अत एव सुषुप्तिमु
क्तो नान्वेति । तथाहमुल्लेखविरामेन स्वाभाविकानुभवमात्ररूपेणात्मावभासनं । अत एव च सुषुप्तोत्थितः कदाचिन्मामप्यहं
न ज्ञातवानिति परामृशति । तस्मात्परमार्थतो निरस्तसमस्तभेदविकल्पनिर्विशेषचिन्मात्रैकरसकूटस्थनित्यसंविदे
व भ्रान्त्या ज्ञातृज्ञेयज्ञानरूपविविधविचित्रभेदा विवर्त्तत इति तन्मूलभूताविद्यानिवर्हणाय नित्यशुद्धबुद्धमुक्तस्वभा
व ब्रह्मात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इति । तदिदमौपनिषदपरमपुरुषवरणीयताहेतुगुणविशेषविर
हिणामनादिपापवासनादूषिताशेषशेमुषीकानामनधिगतपदवाक्यस्वरूपतदर्थयाथात्म्यप्रत्यक्षादिसकलप्रमा
णवृत्ततदितिकर्तव्यतारूपसमीचीनन्यायमार्गाणां विकल्पासहविविधकुतर्ककल्पकल्पितमिति न्यायानुगृहीतवाक्य
प्रत्यक्षादिसकलप्रमाणवृत्तयाथात्म्यविद्भिरनादरणीयं । तथाहि । निर्विशेषवस्तुवादिभिर्निर्विशेषवस्तुनीदं प्रमाणमि
ति न शक्यते वक्तुं सविशेषवस्तुविषयत्वात्सर्वप्रमाणानां । यत्तु स्वानुभवसिद्धमिति स्वगोष्ठीनिष्ठसमयः सोप्यात्मसाक्षिकस
विशेषानुभवनिरस्तः । इदमहमदर्शमिति केनचिद्विशेषेण विशिष्टविषयत्वात्सर्वेषामनुभवानां सविशेषोप्यनुभूयमानोनुभ
वः केनचिद्युक्त्याभासेन निर्विशेष इति निष्कृष्यमाणः सत्तातिरेकिभिस्स्वासाधारणैस्स्वभावविशेषैर्निष्कृष्ट [illegible] नि
हेतुभूतैस्सत्तातिरेकिभिस्स्वासाधारणैस्स्वभावविशेषैस्सविशेष एवावतिष्ठते । अतः केनचिद्विशेषेण विशिष्टस्यैव वस्तुनोन्यवि
शेषनिरसनं इति न कश्चिन्निर्विशेषवस्तुसिद्धिः । धियो हि धीत्वं स्वयंप्रकाशता च ज्ञातुर्विषयप्रकाशनस्वभावतयोपलब्धेः ।
स्वापमदमूर्च्छासु च सविशेष एवानुभव इति स्वावसरे निपुणतरमुपपादयिष्यामः । स्वाभ्युपगताश्च नित्यत्वादयो ह्यनेकवि
शेषाः सन्त्येव ते च न वस्तुमात्रमिति शक्योपपादनाः । वस्तुमात्राभ्युपगमे सत्यपि विधाभेदविवाददर्शनात् स्वाभिमततद्विधाभेदै
श्च स्वमतोपपादनात् । अतः प्रामाणिकविशेषविशिष्टमेव वस्त्विति वक्तव्यम् । शब्दस्य तु विशेषेण सविशेष एव वस्तुन्यभिधानसामर्थ्यं

प्रकारान्तरेण वादिभिर्निर्विशेषे प्रमाणे त्वयास्वमतोपपादनाय तत्तत्प्रकारविशेषैः सत्यादि
निर्विशेषे [illegible] प्रमाणं तत्तत्प्रकारविशेषमतं [illegible] भावः २

विषयप्रकाशकत्वं

अनुभूतिश्च नाना अनुत्पन्नत्वात् यन्नानानन्तदनुत्पन्नं यथा घटादिनेयं तथा तस्मात्तथा २

अस्तीत्यादयः ३ अनुभवविषयत्वेन ४ ...भावोपलक्षितस्य... प्रत्यक्षो... लक्ष्याभावात् आप्यस्य नाशत्वस्याप्यभाव इतिभावः

स्याः प्रागभावं साधयन् प्रमाणाप्रमनुभूतिमियमिति विषयीकृत्य तदभावं साधयेत् स्वतस्सिद्धत्वेनेयमिति विषयीकारा
नर्हत्वात् नतस्याप्रभावोन्यतः प्रमाणागमः अतोस्याः प्रागभावाद्यभावानुमितिर्न शक्यते वक्तुमिति उत्पत्तिप्रतिबंधा विषया २
भावेपि भावविकारास्तस्या न संति अनुत्पन्नेयमनुभूतिरात्मनि नानात्वमपि न सहते व्यापकविरुद्धोपलब्धेः न ह्यनु
त्पन्नं नाना भूतं दृष्टं भेदादीनामनुभाव्यत्वेन स्वरूपादेर्वानुभूतिधर्मत्वं न संभवति अतोनुभूतेरनुभवस्वरूपत्वाद
वान्योपि कश्चिदनुभाव्योनास्या धर्मः यतो निर्धर्मत्वान्निखिलभेदशून्येति अतएव नास्याः स्वरूपातिरिक्तः आश्रयोना
त्मा कश्चिदस्तीति स्वप्रकाशरूपासैवात्मा अजडत्वाच्च अनात्मत्वमापन्नं जडत्वं संविदि व्यावृत्तमानमनात्मत्वमपि
हि संविदि व्यावर्तयति ननु चाहं जानामीति ज्ञातृतया प्रतीतिसिद्धत्वेनैव संभ्रांतिसिद्धा स्वज्ञातत्वेनैव शुक्तिः सकलस्यानुभूतेः
स्वात्मनि कर्तृत्वायोगात् अतो मनुष्योहमित्यत्रेव हि भू न मनुष्यत्वादिविशिष्टपिंडात्माभिमानवत् ज्ञातृत्वमप्यध्य
स्तं ज्ञातृत्वं हि ज्ञानक्रियाकर्तृत्वं तच्च विक्रियात्मकं जडं विकारि द्रष्टाहंकारग्रंथिस्थमविक्रिये साक्षिणि चिन्मात्रात्मनि
सं कथमिव संभवति इत्थं धीनामसिद्धत्वादेव रूपादेरिव कर्तृत्वादेर्नात्मधर्मत्वं सुषुप्तिमूर्छादावहंप्रत्ययाभावे ह्यात्मानुभवदर्श
नेन नात्मनोऽहंप्रत्ययगोचरत्वं कर्तृत्वे हि प्रत्ययगोचरत्वे चात्मनो भ्युपगम्यमाने देहस्येव जडत्वपराक्त्वाः नात्मत्वादि
प्रसंगो दुष्परिहरः अहंप्रत्ययगोचरात्मकर्तृतया प्रसिद्धो ह्यहंकार इति ज्ञानक्रियाफलस्य स्वर्गादेर्भोक्ता रात्मनोन्यत्वं प्रामाणिकानां प्रसिद्धमेव तथा च
दर्थो ज्ञातुरपि विलक्षणोस्या दीपप्रत्यगात्मेति प्रतिपत्तव्यम् एवमविक्रियानुभवस्वरूपस्यैवाभिव्यंजकोऽहंकारः स्वाश्रय
तया तमभिव्यनक्ति आत्मस्थतयाभिव्यंग्याभिव्यंजकानां स्वभावः दर्पणजलखंडादिर्हि मुखचंद्रबिंबगोत्वादिकमात्मस्थतयाभि
व्यनक्ति तत्कृतोऽयं ज्ञाताहमिति भ्रमः स्वप्रकाशाया अनुभूतेः कथमिवेदमभिव्यंजकजडरूपाहंकारेणाभिव्यंग्यत्वमिति मावोचः
रविकरनिकराभिव्यंग्यकरतलस्फटिकादेरभिव्यंजकत्वदर्शनात् जालकरंध्रनिर्गतदीपमणिकरालोकस्तदभिव्यंग्येनापि करतले

अनुभूतिर्निजा... त्वात् यदजडनानानो अजड यथा घटादिनेयं तथा तस्मात्तथा

श्री भा १०

न तु लाघवाद्व्यक्तिरेव जात्यादिवद्व्यवहारहेतुरस्तु किं जात्याद्यभ्युपगमेनेत्यत आह जात्यादिविशिष्टं वस्त्वेवेति तु व्यवहारः
ह स्यात् इति विशेषः फलपि तु सम्भवात् नादितेरस्यौ पूर्वस्यानवस्थापत्तेर्गौरवाच्च जात्यादिविशिष्टमेव वस्तु जात्यादिरेव च स्व गोत्वादिजातिरूपस्य ७
व्यवहारहेतुरित्यवचारतरमेवं चन्मत्यस्त्वप्रमाणीनवोरवानवस्थ इति भावः

विशेषः पृथक्सिद्धिप्रतिपत्तियोग्यत्वं दण्डादयः गोत्वादयस्तु नियमेन तदनेहोऽपि इति अतो वस्तुविरोधप्रतीतिपराहत इति प्रतीतिप्रकारनि
रूपणे वोच्यते प्रतीतिप्रकारो हि एवमवसेयम् तदेतत् सूत्रकारेणानेकस्मिन्नसम्भवादिति सुव्यक्तमुपपादितः अतः प्रत्यक्ष
स्यापि विशेषविषयत्वेन प्रत्यक्षस्यादिषु सर्वं च विशिष्टविषयत्वादनुमानमपि विशेषविषयमेव प्रमाणसंख्याविवादेऽपि सर्वा\
भ्युपगतप्रमाणानामपि विशेषविषयत्वं इति नैकेनापि प्रमाणेन निर्विशेषवस्तुसिद्धिः वस्तुगतस्वभावविशेषैस्तदेव वस्तु निर्विशेषमि
ति वदन् जननीवन्ध्यात्वप्रतिज्ञावत् स्ववाग्विरोधित्वमपि न जानाति यत्तु प्रत्यक्षं सन्मात्रग्राहित्वेन न भेदविषयं भेदश्च विकल्पा
सहत्वात् दुर्निरूप इत्युक्तं तदपि जात्यादिविशिष्टस्यैव वस्तुनः प्रत्यक्षविषयत्वात् जात्यादेरेव प्रतियोग्यपेक्षया वस्तुनः स्वस्य च भेदव्य
वहारहेतुत्वाच्च दूरोत्सारितं संवेदनवद्रूपादिवच्च परत्र व्यवहारविशेषहेतोः स्वस्मिन्नपि तद्व्यवहारहेतुत्वं युष्माभिरभ्युपेतं भेदस्यापि
सम्भवत्येव अत एव नानवस्थान्योन्याश्रयत्वं च एकक्षण एव त्रित्वेऽपि प्रत्यक्षज्ञानस्य तस्मिन्नेव क्षणे वस्तुभेदरूपतत्संस्थानगोत्वादे
र्गृहीतत्वात् क्षणान्तरग्राह्यं न किंचिदिह तिष्ठति अपि च सन्मात्रग्राहित्वे घटोऽस्ति पटोऽस्तीति विशिष्टविषयाप्रतिपत्तिर्विरुध्यते यदि
च सन्मात्रातिरेकि वस्तुसंस्थानरूपजात्यादिलक्षणो भेदः प्रत्यक्षेण न गृहीतः किमित्यश्वार्थी महिषदर्शने निवर्तते सर्वासु
प्रतिपत्तिषु सन्मात्रमेव विषयश्चेत्तत्तत्प्रतिपत्तिविषयसहचारिणः सर्वे शब्दा एकैकप्रतिपत्तिषु किमिति न समर्थ्यन्ते किं चाश्वहस्ति
नि च संवेदनयोरेकविषयत्वेन उपरितनस्य गृहीतग्राहित्वात् विशेषाभावाच्च स्मृतिवैलक्षण्यं न स्यात् प्रतिसंवेदनं विशेषाभ्युपग
मे प्रत्यक्षस्य विशिष्टार्थविषयत्वमेवाभ्युपगतं भवति सर्वेषां संवेदनानामेकविषयतायामेकेनैव संवेदनेनाशेषग्रहणादन्धबधि
राद्यभावश्च प्रसज्येत न च चक्षुषा सन्मात्रं गृह्यते तस्य रूपरूपिरूपैकार्थसमवेतपदार्थग्राहित्वात् नापि त्वचा स्पर्शवद्वस्तुवि
षयत्वात् श्रोत्राक्षिण्यपि न सन्मात्रविषयाणि किन्तु शब्दरसगन्धलक्षणविशेषविषयाण्येव अतः सन्मात्रस्य ग्राहकं न किंचिदिह दृश्य
ते निर्विशेषसन्मात्रस्य प्रत्यक्षेणाग्रहणे तद्धि यथा आगमस्य प्राप्तविषयत्वे नानुवादकत्वमेव स्यात् सन्मात्रग्रहणेऽप्रमेयभावश्च तेन
जडत्वनाशित्वादयस्त्वयैवोक्ता अतः वस्तुसंस्थानरूपजात्यादिलक्षणभेदविशिष्टविषयमेव प्रत्यक्षं संस्थानातिरेकिणो नैके
ष्वेकाकारबुद्धिर्वा अप्रत्यक्षदर्शनात् तावतैव गोत्वादिजातिव्यवहारोपपत्तेरतिरेकवादेऽपि संस्थानस्य संप्रतिपन्नत्वाच्च संस्थानमे

संस्थानिनः संस्थानस्य

अप्रमेयभावश्चानुभूतिविषयत्वं अनुभूतिविषयस्य जडत्वादयस्त्वयैव प्रतिपादिता इत्येवं
प्रत्यक्षस्येयं निर्णयः भावः ३ संस्थानं गोत्वजातिरिति नैयायिकादेः १

पदवाक्यरूपेण प्रवृत्तेः प्रकृतिप्रत्यययोगेन हि पदत्वं प्रकृतिप्रत्यययोरर्थभेदेन पदस्यैव विशिष्टार्थप्रतिपादनमवर्जनीयं पदभेद
श्चार्थभेदनिबंधनः पदसंघातरूपस्य वाक्यस्यानेकपदार्थसंसर्गविशेषाभिधायित्वेन निर्विशेषवस्तुप्रतिपादनासामर्थ्यान्न निर्वि
शेषवस्तुनि शब्दः प्रमाणं प्रत्यक्षस्य निर्विकल्पकसविकल्पकभेदभिन्नस्य न निर्विशेषवस्तुनि प्रमाणभावः सविकल्पकं जात्याद्यने
कपदार्थविशिष्टविषयत्वादेव सविशेषविषयं निर्विकल्पकमपि सविशेषविषयमेव सविकल्पके स्वस्मिन्ननुभूतपदार्थविशिष्ट
प्रतिसंधानहेतुत्वात् निर्विकल्पकं नाम केनचिद्विशेषेण वियुक्तस्य ग्रहणं न सर्वविशेषरहितस्य तथाभूतस्य कदाचिदपि ग्र
हणादर्शनादनुपपत्तेश्च केनचिद्विशेषेण इदमित्थमिति हि सर्वा प्रतीतिरुपजायते त्रिकोणसास्नादिसंस्थानविशेषेण विना कस्य
चिदपि पदार्थस्य ग्रहणायोगात् अतो निर्विकल्पकमेकजातीयद्रव्येषु प्रथमपिंडग्रहणं द्वितीयादिपिंडग्रहणं सविकल्पकमित्युच्य
ते तत्र प्रथमपिंडग्रहणे गोत्वादेरनुवृत्ताकारता न प्रतीयते द्वितीयादिपिंडग्रहणेष्वेवानुवृत्तिप्रतीतेः प्रथमप्रतीत्यनुसंधि
तवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिधर्मविशिष्टत्वं द्वितीयादिपिंडग्रहणावसेयमिति द्वितीयादिग्रहणस्य सविकल्पकत्वम्:
सास्नादिमत् वस्तुसंस्थानरूपगोत्वादेरनुवृत्तिर्न प्रथमपिंडग्रहणे गृह्यत इति प्रथमपिंडग्रहणस्य निर्विकल्पकत्वं न पुनः सं
स्थानरूपजात्यादेरग्रहणात् संस्थानरूपजात्यादेरपि ऐन्द्रियकत्वाविशेषात् संस्थानेन विना संस्थानिनः प्रतीत्यनुपपत्तेश्च
प्रथमपिंडग्रहणेऽपि ससंस्थानमेव वस्त्वित्थमिति न गृह्यते अतो द्वितीयादिपिंडग्रहणेषु गोत्वादेरनुवृत्तिधर्मविशिष्टता संस्थान
वत्संस्थानिनश्च सर्वदैव गृह्यत इति तेषां सविकल्पकत्वमेव अतः प्रत्यक्षस्य कदाचिदपि न निर्विशेषविषयत्वं अत एव सर्वत्र भिन्ना
भिन्नत्वमपि निरस्तं इदमित्थमिति प्रतीताविदमित्थंभावयोरैक्यं कथमिव प्रत्येतुं शक्यते इत्थंभावः सास्नादिसंस्थानविशेष
स्तद्विशिष्टं द्रव्यमिदमंश इत्यनयोरैक्यप्रतीतिः पराहतैव तथा हि प्रथममेव वस्तु प्रतीयमानं सकलेतरव्यावृत्तमेव प्रतीयते
व्यावृत्तिश्च गोत्वादिसंस्थानविशेषविशिष्टतया इत्थमिति प्रतीतिस्सर्वत्र विशेषणतयैव द्रव्यभावप्रतिपत्तेस्तयोरत्यन्तभेदः प्रतीतेरेव सु
व्यक्तः तत्र दण्डकुण्डलादयः पृथक्संस्थानसंस्थिताः स्वनिष्ठाश्च कदाचित् क्वचित् द्रव्यान्तरविशेषणतया वर्तन्ते गोत्वादयस्तु द्रव्य
संस्थानतयैव पदार्थभूताः सन्तो द्रव्यविशेषणतयैव स्थिता उभयत्रापि विशेषणविशेष्यभावस्समानः अत एव तयोर्भेदः प्रतिपत्तिश्च इत्यस्तु

निर्विकल्पकस्य सविशेषत्वसाधनम्: ८

पादेयः अननुभूतिरतीतानागतविरोधिता तु परं नानाविरोधि ननु तदननुभूतिः पश्चादनुभूतिश्चेत् तथा २

नकुसुमादेरननुभाव्यस्यानुभूतित्वात् गगनकुसुमादेरननुभूतित्वमसत्त्वप्रयुक्तं नाननुभाव्यत्वप्रयुक्तमिति चेत् एवं तर्हि घटादेः
ननुभूतित्वनिबंधनमसत्तानाविरोधित्वमेव नाननुभाव्यत्वमित्यास्थीयतां अननुभूतेरननुभाव्यत्वेऽसत्तानाविरोधित्वमपि तस्या घटादेः
प्रसज्यत इति चेदननुभाव्यत्वेऽपि गगनकुसुमादेरिव सत्तानाविरोधित्वमपि प्रसज्यत एव अतोऽननुभाव्यत्वेनाननुभूतित्वमित्युपपत्तेः
नु संविदः स्वतः सिद्धायाः प्रागभावाद्यभावादनुत्पत्तिर्निरस्यते इत्यनेन प्रदीपवत्प्रागभावस्य ग्राहकाभावाद भावान
न्तरमेव अनुभूत्यैव ग्रहणात् कथमनुभूतिः सती तदानीमेव स्वाभावं विरुद्धमवगमयतीति चेत् न अनुभूतिस्समानकालवर्ति
नमेव विषयीकरोतीत्यस्ति नियमः अतीतानागतयोरविषयत्वप्रसंगात् अथ मन्यसे अनुभूतिप्रागभावादेः सिद्धतत्त्वसमकाल
भावनियमोऽस्तीति किं त्वया क्वचिद् दृष्टं येन नियमं ब्रवीषि हंत तर्हि तत एव दर्शनात्प्रागभावादिः सिद्ध इति न तद्भावनिरूपणं तत्प्रा
गभावे च तत्समकालवर्त्तिनमनुमतः कोऽब्रवीति इन्द्रियजन्मनः प्रत्यक्षस्य ह्येष स्वभावनियमो यत्स्वसमानकालवर्तिनः पदार्थस्य ग्रा
हकत्वं न सर्वेषां ज्ञानानां प्रमाणानां च स्मरणानुमानागमयोगिप्रत्यक्षादिषु कालान्तरवर्त्तिनोऽपि ग्रहणदर्शनात् अत एव च प्रमा
णस्य प्रमेयाविनाभावः न हि प्रमाणस्य स्वकालवर्त्तिनाविनाभावोऽर्थसंबंधः अपि तु यद्देशकालादिसंबंधितया योऽर्थो भासते तस्य त
थाविधाकारमिथ्यात्वप्रत्यनीकता अतद्रूपमपि निरस्तमस्तु तिन्नोवाप विषयानवध्यप्रथमस्मृतिदर्शनात् अथोच्यते न तावत्संविदः प्रा
गभावे व्याप्तिसिद्धलिंगमुपलभ्यते नानुपपत्तिरपि कल्पयित्वा दृश्यते न चागमस्तद्विषयो दृष्टचरः अतस्तत्प्रागभावः प्रमाणाभावादेव न
सेत्स्यतीति यद्येवं स्वतःसिद्धत्वविभवं परित्यज्य प्रमाणाभावः वस्तु यत्तोऽस्यानुपलब्धेर्वा भावः समर्थितः दूषणप्रमाणमनुमवात् किंच प्र
संसत्तानं स्वविषयं घटादिकं स्वसत्ताकाले साधयन् तस्य न सर्वदा सत्तामवगमयद्दृश्यते इति घटादेः पूर्वोत्तरकालसत्त्वानप्रतीयते
तदप्रतीतिश्च संवेदनस्य कालपरिच्छिन्नतयाप्रतीतेः घटादिविषयमेव संवेदनं स्वयंकालानवच्छिन्नं प्रतीतं चेत्तत्संवेदनविषयो घट
दिरपि कालानवच्छिन्नः प्रतीयत इति नित्यः स्यात् नित्यं चेत्संवेदनं स्वतः किं नित्यमित्येव प्रतीयेत न च तथा प्रतीयते एवमनुमानाधी
न संविदोऽपि कालानवच्छिन्नाः प्रतीतास्ते स्वविषयानपि कालानवच्छिन्नान् प्रकाशयंतीति तेन नित्याः सर्वे कालानवच्छिन्नाः स्युः संविदस्तु स्व
त्वाद्विषयाणां न च निर्विषया संवित्काचिदस्ति अनुपलब्धेः विषयप्रकाशनस्वभावत्वे वोपलब्धेरेवं हि संविदः स्वयंप्रकाशता समर्थिता
प्रस्तावशेषः अवर्त्तमानत्वात् न च प्रमाणान्तरावसेयः लिंगाद्यभावात् न हि संवित्प्रागभाव पृ: ०

वजातिः संस्थानं नाम सर्वासाधारणं रूपमिति यथा वस्तुसंस्थानमनुसंधेयं जातिग्रहणेनैव भिन्नमिति व्यवहारसंभवात् सदाथीनत्वादर्शनादर्थी
न्तरवादिनाप्यभ्युपगतत्वाच्च गोत्वादिरेव भेदः ननु च जात्यादिरेव भेदश्चेत् तस्मिन्गृहीते तद्व्यवहारवत् भेदव्यवहारोऽपि स्यात् सत्यं भेदश्च व्यव
ह्रियत एव गोत्वादिव्यवहारात् गोत्वादिरेव हि सकलेतरव्यावृत्तिः गोत्वादौ गृहीते सकलेतरसजातीयबुद्धिव्यवहारयोर्निवृत्तेः भेदग्रहणेनैव
तु भेदनिवृत्तिरस्मादिदं भिन्नमिति तु व्यवहारे प्रतियोगिनिर्देशः स्यात् तदपेक्षत्वात् प्रतियोग्यपेक्षया भिन्नमिति व्यवहार इत्युक्तं यत्तु घटादीनां
विशेषणानां व्यावर्त्तमानत्वेनापारमार्थ्यमुक्तं तदनालोचितबाध्यबाधकभावव्यावृत्त्यनुवृत्तिविशेषस्य ख्यापितं द्वयोर्ज्ञानयोर्हि विरोधे बाध्य
बाधकभावो बाधितस्यैव व्यावृत्तिः अत्र घटपटादिषु देशकालभेदेनैव विरोध एव नास्ति यस्मिन्देशे यस्मिन्काले यस्य सद्भावः प्रतिपन्नस्त
स्मिन्देशे तस्मिन्काले तस्याभावः प्रतिपन्नश्चेत्तत्र विरोधात् बलवतो बाधकत्वं बाधितस्य च निवृत्तिः देशान्तरकालान्तरसंबंधितयानुभू
तस्यान्यदेशकालयोरभावप्रतीतौ न विरोध इति कथमत्र बाध्यबाधकभावः अन्यत्र निवृत्तस्यान्यत्र निवृत्तिर्वा कथमुच्यते रज्जुसर्पा
दिषु तद्देशकालसंबंधितयैवाभावप्रतीतेर्विरोधो बाधकत्वं व्यावृत्तिश्चेति देशकालान्तरदृष्टस्य देशकालान्तरे व्यावर्त्तमानत्वं मि
थ्यात्वव्याप्तं न दृष्टमिति न व्यावर्त्तमानत्वमात्रमपारमार्थ्यहेतुः यच्चानुवर्त्तमानत्वात् सत्यं परमार्थमिति तत्सिद्धमेवेति न साधनमर्हति
अतो न सन्मात्रमेव वस्त्वनुभूतिस्वरूपायाश्च विषयविषयिभावेन भेदस्य प्रत्यक्षसिद्धत्वाद्बाधितत्वाच्चानुभूतिरेव सतीत्येतदपि नि
रस्तं यत्त्वनुभूतेः स्वयंप्रकाशत्वमुक्तं तद्विषयप्रकाशनवेलायां ज्ञातुरात्मनः तदेवमनुभवे न तु सर्वेषां सर्वदा तथैवेति नियमोऽस्ति परानुभवस्य हा
नोपादानादिलिंगकानुमानज्ञानविषयत्वात् स्वानुभवस्याप्यतीतस्य ज्ञासिषमिति ज्ञानविषयत्वदर्शनाच्च अतोऽनुभूतिश्चेत्स्वतः
सिद्ध्येदिति वक्तुं न शक्यते अनुभूतेरनुभाव्यत्वेनाननुभूतित्वमपि दुरुक्तं स्वगतातीतानुभवानां परगतानुभवानां चानुभाव्यत्वेना
ननुभूतित्वप्रसंगात् परानुभवानुमानानभ्युपगमे च शब्दार्थसंबंधग्रहणाभावेन समस्तशब्दव्यवहारोच्छेदप्रसंगः आचार्यप्रणा
नवैत्यमनुभूयत इत्युपसत्तिश्च क्रियते सा चानोपपद्यते न चान्यविषयत्वेनानुभूतित्वं अनुभूतित्वं नाम वर्त्तमानदशायां स्वसत्तयैव
स्वाश्रयं प्रति प्रकाशमानत्वं स्वसत्तयैव स्वविषयसाधनत्वं वा ते चानुभवान्तरानुभाव्यत्वेऽपि स्वानुभवावस्थायां न निवर्तेते इति नाननुभूतित्व
मापादयतः घटादेस्त्वननुभूतित्वमेतत्स्वभावविरहात् नानुभाव्यत्वात् तथाननुभूतेरननुभाव्यत्वेऽप्यननुभूतित्वप्रसंगो दुर्वारः ॥

अप्रभावरूपे २

अनुभूतिमात्रातिरिक्तं आत्मत्वमवद्धृहसत

अविरुद्धं चिदेवोपपदार्थसाधारणव्यवहारानुगुण्यं सर्वकालवर्तमानत्वं हि नित्यत्वं एकत्वमेकसंख्यावच्छेद इति तेषां जडत्वाद्य
भावरूपतायामपि तथाभूतेरपि तेष्वेतन्यधर्मभूतेष्वप्यनैकान्त्यमपरिहार्यं संविदितु स्वरूपातिरेके तेषां जडत्वादिप्रसङ्गो नैकत्वम
स्वभावरूपो भावरूपो वा धर्मो नाभ्युपेतव्येत. तन्निषेधो नत्याद्यमपि नोक्तं भवेत्. अपि च संवित्तिरस्ति वा न वा सिध्यतिचेत्सधर्मतास्या
न्नो चेत् तुच्छता गगनकुसुमादिवत्. सिद्धिरेव संविदिति चेत्कस्य कं प्रतीति वक्तव्यं यदि न कस्यचित्कंचित्प्रति सा तर्हि न सिद्धिः सिद्धिर्हि पुत्रव
मित्रवत् कस्यचित्कंचित्प्रति भवति आत्मानं प्रति चेदात्मा संविदेवेत्युक्तं सत्यमुक्तं दुरुक्तं तु तत्. तथा हि कस्यचित्पुरुषस्य किंचिदर्थं जा
नतः प्रतिसिद्धिरूपतया तत्संबन्धिनी सा संवित्स्वयं कथमिवात्मभावमनुभवेत्. एतदुक्तं भवति अनुभूतिरिति स्वाश्रयं प्रतिस्वसम
न्नावेनैव कस्यचिद्वस्तुनो व्यवहारानुगुण्यापादनस्वभावः ज्ञानं च गतिः संवित्तिरित्यपरनामा सकर्मकोऽनुभवितुरात्मनो धर्मविशेषः
घटमहं जानामीममर्थमवगच्छामि घटमहं संवेद्मीति सर्वेषामात्मसाक्षिकः प्रसिद्धः एतत्स्वभावतया हि तस्याः स्वयंप्रकाशतामवता
त्युपपादिता अस्य सकर्मकस्य कर्तृधर्मविशेषस्य कर्मभावश्च कर्तृत्वमपि दुर्घटमिति तथा हि स्यकर्तुः स्थिरत्वे कर्तृधर्मस्य
संवेदनास्य सुखदुःखादेरिव उत्पत्तिस्थितिनिरोधाश्च प्रत्यक्षमीक्षन्ते करोत्येव तावत्संवेदनं वाऽयमर्थः पूर्वं मयानुभूतमिति प्रत्यभि
ज्ञानात् स्थिरसिद्धिः अहं जानाम्यहमज्ञासिषं ज्ञातारं मामेव जानीमो ज्ञानं न वयमिति संविदुत्पत्त्यादयः प्रत्यक्षसिद्धा इति कुतस्ते … [illegible]
न्याः संविदः आत्मत्वाभ्युपगमे पूर्वं घटं दृष्टवानिदमपरेद्युरिदमहमद्राक्षमिति प्रत्यभिज्ञा च न स्यात् अन्येनानुभूतस्यान्येन प्रत्यभिज्ञानासंभवः
किं चानुभूतेरात्मत्वाभ्युपगमे तस्यानित्यत्वे विशिष्टसंधानासंभवः तदवस्थः प्रतिसंधानं हि पूर्वापरकालस्थायिनमनुभवितारमुपस्थापय
ति नानुभूतिमात्रं अहमेवेदं पूर्वमद्राक्षमिति भवतोऽनुभूतेर्न ह्यनुभवितृत्वसिद्धिः अनुभूतिरनुभूतिमात्रमेव संविन्नाम काचि
न्नित्यानित्यादि विषयावास्यं तानुपलब्धेर्न संभवतीत्युक्तं उभयाभ्युपगता संविदेका नेत्युपलब्धिपराहते अनुभूतिमात्रमेव परमार्थ
इति निष्क्रिय … संविदोऽवभासा श्रुतिर्निराकृताः ननु चाहं जानामीत्यस्य प्रत्ययस्य योऽहंकारः प्रकाशीकरः … आत्मा तस्मिन्संल
भासिततया सुखमर्थं … जानामीति स्थिरश्च महमर्थ … व्यतिरेकी सुखदर्शी एवं नैतदेवं अहं जानामीति धर्मधर्मितया प्रत्यक्ष
प्रतीतिविरोधादेव किंच अहमर्थो न चेदात्मा प्रत्यक् नात्मनोऽभवत् अहं बुद्ध्या पराग्र्थात् प्रत्यगर्थो हि भिद्यते निरस्ताखिलदुःखोऽहमनन्ता

९ संविदः घटमहं … न कर्म चाह

कर्मत्वं यथा दुर्घटं तथा कर्तृत्वमपीत्यर्थः १०

संविदात्मनोरैक्यम् ८

दृष्टिर्न हृश्यधर्मवति दृश्यत्वात् यन्नैवं तन्नैवं यथा घटः न चैवं तथा न तस्मान्नैव तथा।

दृश्यानदृष्टिधर्मा दृश्यत्वात् रूपादिवत् ३ ६ भिन्नस्तोपि प्रतिवादिनिस्वरूपत्वान्न दीपोक्तावेव विशेषं शं

संविदो विषयप्रकाशनसत्तास्वभावविरहेऽपि स्वयंप्रकाशत्वासिद्धेः अनुभूतेरनुभवान्तराननुभाव्यत्वाच्च संविदस्तु एवं तेव स्यात् न च स्याप
सदसूक्ष्मादिषु सर्वविषयशून्या केवलैव संवित् परिस्फुरतीति वाच्यम् योग्यानुपलब्धिपराहतत्वात् तास्वपि दशास्वनुभूतिरनुभूता
चेत्तस्याः प्रबोधसमये नुसंधानं स्यान्न चैतदस्ति ननु नानुभूतस्य पदार्थस्य स्मरणनियमो न हि दृष्टचरः अतः स्मरणाभावः कथमनुभ
वाभावमेव साधयेत् उच्यते निखिलसंस्कारतिरस्कृतिकरदेहविगमादिप्रबलहेतु विरहेऽप्यस्मरणनियमोनुभवाभावमेव
साधयति न केवलमस्मरणनियमादनुभवाभावः सुप्तोत्थितस्य यत्तत्काले न किंचिदहमज्ञासिषमिति प्रसवमर्शेनैव सिद्धेः न च
सत्यप्यनुभवे तदस्मरणनियमो विषयावच्छेदविरहादहंकारविगमाद्वेति शंक्यते वक्तुं अर्थान्तराननुभवस्यार्थान्तराभावस्य चानुभूता
र्थान्तरास्मरणे हेतुत्वाभावात् तास्वपि दशास्वहमर्थोनुवर्तत इति चेत् तर्हि स्वापादिदशास्वपि सविशेषोनुभवोस्तीति पूर्व
युक्तं सति मुक्तेः स्वात्मानुभवः स्विधायामेवेति स्थापयिष्यते अस्तु सकलविषयविरहेणैनिराश्रया चसंविन्निर्विध्यते केवलैव निर्विष
यसंविदात्मानुभव इति चेन्न सा न सा श्रयेति नुपपादयिष्यते अतो नानुभूतिस्सती स्वयं प्रागभावं न साधयतीति प्रागभावासिद्धिर्न शक्यते
वक्तुं अनुभूतेरनुभाव्यत्वसंभवोपपादनेनान्यतोप्यसिद्धिनिरस्ता तस्मान्न प्रागभावासिद्धिः संविदोनुत्पत्तिरुपपन्नेति मतौ यदप्यसा
अनुत्पत्ता विकारांतरनिरसनं तदप्यनुपपन्नं प्रागभावे व्यभिचारात् तस्य हि जन्माभावेपि विनाशोदृश्यते भावेष्विति विशेषणेन तर्क
कुशलतावित्प्रसूता भवति तथा च भवदभिमताविद्यानुत्पन्नैव विविधविकारास्पदात्वतानोदयादेतव्वेति तस्यामनेकास्त
द्विकाराः सर्वे मिथ्याभूता इति चेत्किं भवतः परमार्थभूतोप्यस्ति विकारः येनेतद्धि शेषणमर्थवद्भवति न च सावभ्युपगम्यते
यदप्यनुभूतिरजत्वात्स्वस्मिन्विभागं न सहत इति तदपि नोपपद्यते अजस्यैवात्मनो देहेन्द्रियादिभ्यो विभक्तत्वादनादिकेन चाभ्युप
गतायाः अविद्यायाः आत्मनो व्यतिरेकस्यावश्याश्रयणीयत्वात् स विभागो मिथ्यारूपः इति चेत् जन्म प्रतिबन्धपरमार्थविभागः
किं कचिद्दृष्टस्त्वया अविद्याया आत्मनः परमार्थतो विभागाभावे हि वस्तुतो विद्यैव स्यादात्मा अबाधितप्रतिपत्तिसिद्धदृश्यभेदसमर्थ
नेन दर्शनभेदोपि समर्थितः एवं दृश्यभेदावच्छेदन भेदवत् यदपि नास्याद्दृष्टेर्दृश्यस्वरूपायाः दृश्यः कश्चिदपि धर्मोस्ति दृश्यत्वादेव तेषां
नदृष्टिधर्मत्वमिति च तदपि स्वाभ्युपगतैः प्रमाणसिद्धैर्नित्यत्वस्वयंप्रकाशत्वादिधर्मैरुभयमनैकान्तिकं न चैते संवेदनमात्रस्वरूपमे
वात् स्वसन्तये वस्त्रान्यं प्रतिकस्यात्सिद्धत्वात् ... त्वैव स्वाश्रयाय प्रकाशमानता प्रकाश

संवित् विकारांतरप्रभावत्यनुत्पन्नत्वात् योविकारान्तरवान्तासोनुत्पन्नः यथा घटादिः न चैवं तथा न तस्मान्न तथेति संविदि स्वावच्छिन्ना उत्सवस्तु बाध्य विकारांतरवत्वयति यो

…तस्य सर्वं …तीति त्वाभिप्रायः तेन न हि प्यादे सुदृढसत्ता यामवि
वो ऽत्र पुरुषभावे वेदनाभावः सुरतादस्य स्वसंनाद्यो वेद्यारवेत्यागायः ७

तेजोमीतिः पुरुषएव हि द्रष्टा श्रोता रसयिता घ्राता मंता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः विज्ञातारमरे केन विजानीयात् जानात्येवायं पुरु
षः न पश्यो मृत्युं पश्यति न रोगं नोत दुःखतां स उत्तमः पुरुषः सोपजनं स्मरन्निदं शरीरं एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरु
षायणाः पुरुषं प्राप्यास्तं गच्छंति तस्माद्वा एतस्मान्मनोमयादन्यो ऽन्तर आत्मा विज्ञानमयः स्यात्मा [illegible] एवेति श्रुतेः
स्वयंप्रकाशोयमात्मा ज्ञाते वा न प्रकाशमानत्वे प्रकाशत्वादेवकस्यचिदेव भवत्प्रकाशः प्रदीपादिप्रकाशवत् तस्मान्नात्मा भवितुम
र्हति संवित्संविदनुभूतिर्ज्ञानादिशब्दैः संबंधिशब्दाः इति चपथस्याविदः नहि लोके वेद्यो जानातीत्यादेरकर्मकस्याकर्तृकस्य
च प्रयोगो दृष्टचरः प्रत्युक्तं अजडत्वात्संविद आत्मता तत्रेदं प्रष्टव्यं अजडत्वमिति किमभिप्रेतं स्वसत्ताप्रयुक्तप्रकाशत्वमिति चेत्
तथा सति दीपादिष्वनैकांते संविदतिरिक्तप्रकाशधर्मानभ्युपगमेनासिद्धिर्विरोधश्च अव्यभिचरितप्रकाशसत्ताकत्वमपि सुखादि
व्यभिचाराग्निरस्तं प्रत्युक्तं सुखादिरव्यभिचरितप्रकाशोपि अन्यस्मै प्रकाशमानत्वात् घटादिरिव जडत्वेनानात्मेति ज्ञानं किं स्वस्मै
प्रकाशते तदपि अन्यस्मै वाहमर्थस्य ज्ञातानुभवो भासते अहं सुखीतिवत् जानाम्यहमिति अतः स्वस्मै प्रकाशमानत्वरूपमजडत्वं संविद्यसि
द्धं तस्मात्स्वमात्मानं प्रति सिद्ध्यत्येव किंचिदजडो ऽहमर्थ एवात्मा ज्ञानस्यापि प्रकाशता तत्संबंधायत्तात्तत्कृतमेव हि ज्ञानस्य दुःखा
देरिव स्वाश्रयं चेतनं प्रति प्रकटत्वमितरं प्रति अप्रकटत्वं च अतो न ज्ञप्तिमात्रमात्मा अपितु ज्ञाताहमर्थः अथ यदुक्तमनुभूतिः
परमार्थतो निर्विषया निराश्रया सती भ्रांत्या ज्ञातृतयावभासते रजततये व शुक्तिर्निरधिष्ठानभ्रमानुपपत्तेरिति तदयुक्तं तथा सत्यनु
भवसामानाधिकरण्येनानुभवितारमहमर्थं प्रतीयेत अनुभूतिरहमिति पुरोवस्थितभास्वरद्रव्याकारतया रजतादिरिव अतत्वत एव
वभासमानेयमनुभूतिरर्थांतरमहमर्थं विशिनष्टि दंड इव देवदत्तं तथा ह्यनुभवाम्यहमिति प्रतीतिस्तद्वेमयस्य अहमनुभूतिवि
शिमात्रावलंबनः कथमिव प्रतिज्ञायते यदप्युक्तं स्थूलो ऽहमित्यादिदेहात्माभिमानवदेव ज्ञातृत्वप्रतिभासनात् ज्ञातृत्वमपि मिथ्येति ।।
तदयुक्तं आत्मतयाभिमतायाः अनुभूतेरपि मिथ्यात्वं स्यात् तद्वदेव प्रतीतेः सकलेतरोपमर्द्दितत्वज्ञानाबाधितत्वेनानुभूतेर्न मिथ्या
त्वमिति चेत् हंतैवं सति तद्बाधादेव ज्ञातृत्वं विक्रियात्मकं जडविकारास्पदाहंकारपरिणामाहंकारग्रंथिस्थमिति न ज्ञातृत्वमात्म
नः प्रकाशयन्ननुभवाम्यहमिति प्रत्ययो दंडमात्रे दंडी देवदत्त इति प्रत्ययवद्विशेषणाम् [illegible] प्रत्यगात्मनो ज्ञानक्रियाकर्तृत्वरूपं ज्ञातृत्वं न संभवति अतो ज्ञातृत्वं
तदनात्मवृत्तिः ३ + मायिनाममप्यापदमुक्त आविर्भ…

नेदमा कस्यचनाम्भेवेयमिति मोक्षार्थी श्रवणादौ प्रवर्त्तेत अहमर्थविनाशश्चेन्मोक्षः स्यात् अपसर्पेदेव मोक्षकथाप्रस्तावगंधतः अपि
नष्टेऽपि मयि मत्तोन्या काचिज्ज्ञप्तिरवस्थिता इति तत्प्राप्तये प्रयत्नः कस्यापि न भविष्यति स्वसंबंधितया ह्यस्याः सत्तापि ज्ञप्त्यादि च स्वसंबंधविग
मेतु न स्थिरैव न सिध्यति छेत्तुश्छेद्यस्य चाभावे छेदनादेरसिद्धिवत् अतोऽहमर्थो ज्ञातैव प्रत्यगात्मेति निश्चितं विज्ञातारमरे केन विजानीया
दिति श्रुतिः एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः इति स्मृतिः। नात्माश्रुतेरित्यत्र प्रसंगात् अग्रेऽपि वक्ष्यति ज्ञोऽत एव यतो नात्मा ज्ञप्तिमात्रमिति
स्थितं अहंप्रत्ययसिद्धो ह्यस्मदर्थः तत्राहं जानामीति सिद्धो ज्ञाता युष्मदर्थ इति वचनं जननी मे वंध्येतिवद्व्याहतार्थं च नचा
सौ ज्ञाताहमर्थोन्याधीनप्रकाशः स्वयंप्रकाशत्वात् चैतन्यस्वभावता हि स्वयंप्रकाशता यः प्रकाशस्वभावः सो नान्याधीनप्रकाशः
दीपवत् नहि दीपादेः स्वप्रकाशवत्त्वनिर्भासितत्वेनाप्रकाशितत्वमन्याधीनप्रकाशत्वं च किं तर्हि दीपः प्रकाशस्वभावः स्वयमेव
प्रकाशते अन्यानपि प्रकाशयति प्रभया एतदुक्तं भवति एकमेव तेजोद्रव्यं प्रभाप्रभावद्रूपेणावतिष्ठते यद्यपि प्रभा प्रभावद्द्रव्य
गुणभूता तथापि तेजोद्रव्यमेव न शौक्ल्यादिवद्गुणः स्वाश्रयादन्यत्रापि वर्त्तमानत्वाद्रूपवत्त्वाच्च शौक्ल्यादिधर्मैर्धर्मी प्रकाश
वत्त्वाच्च तेजोद्रव्यमेव नार्थान्तरं प्रकाशवत्त्वं च स्वस्य परस्य चान्येषां च प्रकाशकत्वात् अस्यास्तु गुणत्वव्यवहारो नित्यः तदाश्रयत्व
तदपृथक्त्वनिबंधनः न चाश्रयावयवा एव विशीर्णाः प्रसरंतः प्रभेत्युच्यते मणिद्युमणिप्रभृतीनां विनाशप्रसंगात् दीपस्य चावयवविप्रतिप
त्तेः कदाचिदपि न स्यात् नहि विशरणस्वभावावयवा दीपाश्चतुरंगुलमात्रं नियमेनापिंडीभूता ऊर्ध्वमुद्गच्छंति ततः पश्चाद्युगपदेव ति
र्यगूर्ध्वमधश्च एकरूपा विशीर्णाः प्रसरंतीति शक्यते वक्तुं अतः सप्रभाका एव दीपाः प्रतिक्षणमुत्पन्ना विनश्यंतीति पुष्कलकारण
क्रमोपनिपातात्तद्विनाशे विनाशश्चावगम्यते प्रभायाः स्वाश्रयसमीपे प्रकाशाधिक्यमौज्ज्वल्याधिक्यमित्याद्युपलब्धिव्यवस्थाप्यम्॥
अग्न्यादीनामौष्ण्यादिवत् एवमात्मा चिद्रूप एव चैतन्यगुण इति चिद्रूपता हि स्वयंप्रकाशता तथाहि श्रुतयः स यथा सैंधवघनोऽन
न्तरोऽबाह्यः कृत्स्नो रसघन एव एवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघनः विज्ञानघन एव अत्रायं पुरुषः स्वयंज्योति
र्भवति न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते अथ यो वेदेदं जिघ्राणीति स आत्मा कतम आत्मा योऽयं विज्ञानमयः प्राणेषु हृदि

प्रभापक्षः

दीप

अहमर्थस्य बोधत्वान्नसत्तैव शोध्यते ९

त्मिमहमिति स्वयंप्रकाशानुभवाधीनसिद्धयो हि सर्वे पदार्थास्तत्र तदायत्तप्रकाशोऽपि चिदहंकारोऽनुदितानस्तमितस्वरूपप्रकाशमहो यार्थसिद्धि
हेतुभूतमनुभवमभिव्यनक्तीत्यास विदुः परिहसेति किंचाहंकारानुभवयोः स्वभावविरोधादनुभूतेरननुभूतित्वप्रसंगाच्च न व्यंग्यव्यं
ग्यभावः यदुक्तं व्यंजकत्वं व्यंग्यत्वमन्योन्यं न च स्यात्प्रतिकूलत्वतः व्यंग्यत्वेननुभूतित्वमात्मनि स्यात् यथा घटे इति न च रविकरनि
करतोऽस्याभिव्यंग्यकरतलाभिव्यंग्यत्ववत् संविदभिव्यंग्याहंकाराभिव्यंग्यत्वं संविदः साधीयः तत्रापि रविकरनिकराणां करतलाभि
व्यंग्यत्वाभावात् करतलप्रतिहतगतयो हि रश्मयो बहुलाः स्वयमेव स्फुटतरमुपलभ्यन्ते इति तदाकुल्यमात्रहेतुत्वात् करतलस्याना
भिव्यंजकत्वं किंचास्य संविद्रूपस्यात्मनोऽहंकारनिवर्त्याभिव्यक्तिः किंरूपा न तावदुत्पत्तिः स्वतःसिद्धतया नष्टो तस्या घटत्वाभ्युपगमा
त् नापि तत्प्रकाशनं तस्यानुभवान्तरानुभाव्यत्वात् तत एव च न तदनुभवसाधनानुग्रहः स हि द्विधा विषयेन्द्रियसंबंधहेतुत्वे
न वा यथा ज्ञातिनिजमुखादिग्रहणे व्यक्तिदर्पणादीनां नयनानां दीप्तिप्रयत्नं बंधहेतुत्वेन बोधगतकल्मषापनयनेन वा यथा पर
तत्त्वावबोधसाधनस्य शास्त्रस्य शमदमादीनां यथोक्तकरणानामभूमित्वान्न तत्संबंधहेतुतेति किंचानुभूतेरनुभाव्यत्वाभ्युप
गमेऽप्यहमर्थेन न तदनुभवसाधनानुग्रहः सुवचः स ह्यनुभाव्यानुभवोत्पत्तिप्रतिबंधकनिरसनेन भवेत् यथा रूपादिग्रहणोत्प
त्तिविरोधिसंतमसनिरसनेन च चक्षुर्दोषदीपादिना न चेह तथाविधं निरसनीयं संभाव्यते न तावत्संविदात्मगतं तज्ज्ञानोत्पत्तिविरोधि किं
चिदहंकारापनेयमस्ति अस्ति तत्र ज्ञानमिति चेन्न अज्ञानस्याहंकाराधनोद्यत्वानभ्युपगमात् ज्ञानमेव तत्र ज्ञानस्य निवर्तकं न
च संविदि आश्रयत्वमज्ञानस्य संभवति ज्ञानसमानाश्रयत्वात् समानविषयत्वाच्च ज्ञातृभावविषयभावविरहिते ज्ञानमात्रे साक्षिणि ना
ज्ञानं संभवितुमर्हति यथा ज्ञानाश्रयत्वप्रसक्तिप्रत्यक्षे न घटादेर्नो ज्ञानाश्रयत्वं तथा ज्ञानमात्रेऽपि ज्ञानाश्रयत्वाभावे न नाज्ञानाश्रय
त्वं स्यात् संविदो ज्ञानाश्रयत्वाभ्युपगमेऽप्यात्मनयाभ्युपेतायास्तस्या ज्ञानविषयत्वाभावेन ज्ञानेन न तद्गताज्ञाननिवृत्तिः ज्ञाने हि स्वविष
य एवाज्ञानं निवर्तयति यथा रज्ज्वादौ अतो न केनापि कदाचित् संविदाश्रयमज्ञानमुपस्थाप्यते अस्य च सदसदनिर्वचनीयस्याज्ञानस्य

आत्मानुभवोत्पत्तिप्रतिबंधकस्य ६ निर्विषयत्वात् ८

नः अपि त्वंतःकरणरूपाहंकारस्य कर्तृत्वादिरिह रूपादिवद्दृश्यधर्म्मः कर्तृत्वेहंप्रत्ययगोचरत्वे चात्मनोऽभ्युपगम्यमाने देहस्येवानात्मत्वप
राक्त्वजडत्वादिप्रसंगश्चेति नैतदुपपद्यते देहस्येवाचेतनत्वप्रकृतिपरिणामित्वदृश्यत्वपराक्त्वपरार्थत्वादियोगादंतःकरणरूपस्याहंका
रस्य चेतनासाधारणस्वभावत्वाज्ज्ञातृत्वस्य एतदुक्तं भवति यथा देहादिर्दृश्यत्वपराक्त्वादिभिर्हेतुभिस्तत्प्रत्यनीकद्रष्टृत्वप्रत्यक्त्वादेर्विवि
च्यते एवमंतःकरणरूपाहंकारोपि तत्दृश्यत्वादेव तैरेव हेतुभिस्तस्माद्विविच्यते इति अतो विरोधादेव ज्ञातृत्वमहंकारस्य दृशित्वव
द्यथा दृशित्वं तत्कार्यहंकारस्य नाभ्युपगम्यते न च ज्ञातृत्वं विक्रियात्मकं ज्ञातृत्वं हि ज्ञानगुणाश्रयत्वम् ज्ञानं चास्य नित्यस्य स्वाभाविक
धर्म्मत्वेन नित्यं नित्यत्वं चात्मनो नात्मा श्रुतेरित्यादिषु वक्ष्यति ज्ञोऽत एव इत्यत्र तु ज्ञ इति व्यपदेशेन ज्ञानाश्रयत्वं च स्वाभाविकमिति व
क्ष्यति अस्य ज्ञानस्वरूपस्यैव मणिप्रभृतीनां प्रभाश्रयत्वमिव ज्ञानाश्रयत्वमप्यविरुद्धमित्युक्तं स्वयमपरिच्छिन्नमेव ज्ञानं संको
चविकाशार्हमित्युपपादयिष्यामः अतः क्षेत्रज्ञावस्थायां कर्मणा संकुचितस्वरूपं तत्तत्कर्मानुगुणतरतमभावेन वर्तते तच्चेंद्रिय
द्वारेण व्यवस्थितं तमिममिन्द्रियद्वारज्ञानप्रसरमपेक्ष्योदयास्तमयव्यपदेशः प्रवर्तते ज्ञानप्रसरे तु कर्तृत्वमस्त्येव तच्च
न स्वाभाविकं अपि तु कर्म्मकृतमित्यविक्रियस्वरूप एवात्मा एवंरूपाविक्रियात्मकं ज्ञातृत्वं ज्ञानस्वरूपस्यात्मनः एवेति न कदाचि
दपि जडस्याहंकारस्य ज्ञातृत्वसंभवः जडस्वभावस्याहंकारस्य चित्सन्निधानेन तच्छायापत्त्या ज्ञातृत्वं भव इति चेत् केयं चिच्छायापत्
तिः किमहंकारच्छायापत्तिः संविद उत संविच्छायापत्तिरहंकारस्य न तावत्संविदः अविक्रियत्वानभ्युपगमात् नाप्यहंकारस्य त
स्य जडस्य उक्तरीत्या ज्ञातृत्वायोगात् द्वयोरप्यचाक्षुषत्वाच्च न ह्यचाक्षुषाणां छाया दृष्टा अथाग्निसंपर्कादयःपिण्डस्येव ति
त्संपर्काज्ज्ञातृत्वोपलब्धिरिति नैतत् संविदि वास्तवज्ञातृत्वानभ्युपगमादेव नात्संपर्कादहंकारे ज्ञातृत्वोपलब्धिर्वा यदप्युक्तं उभय
त्र वस्तुतो न ज्ञातृत्वमस्ति अहंकारस्त्वनुभूतेरभिव्यंजकः स्वात्मस्थामेवानुभूतिमभिव्यनक्ति आदर्शादिवदिति तदप्ययुक्तं आत्मनः स्व
यंज्योतिषो जडरूपाहंकाराभिव्यंग्यत्वायोगात् तदुक्तं शांतांगारइवादित्यमहंकारो जडात्मकः स्वयंज्योतिषमात्मानं व्यनक्तीति न यु
ज्यते अहंकारस्य न चेतनं ज्ञातृत्वा
भवादेव सुतरां न तत्संपर्कात् संविदि

तं धार्मं प्रतीयत इति चेत्स्यादनयस्य स्वनयोर्विरोधमपि न जानन्ति भवन्तः अहं मां न ज्ञातवानित्यनुवृत्तिः १

मप्यहं न ज्ञातवानस्मि स्व हमर्थस्यापि तदानीमनुभववचने मामिति किं निषिध्यत इति चेत् साधु पृष्टं त्वया तदुच्यते अहमर्थस्य ज्ञा
तुस्तु न स्वरूपं निषिध्यते अपि तु प्रबोधसमयेऽनुसंधीयमानस्याहमर्थस्य वर्णाश्रमादिविशिष्टता अहं मां न ज्ञातवानित्युक्ते वि
षयो विवेचनीयः जागरितावस्थानुसंहितजात्यादिविशिष्टोऽस्मदर्थो मामित्यंशस्य विषयः स्वापावस्थाप्रसिद्धोऽविशदस्वानु
भवैकतानश्चाहमर्थोऽहमित्यंशस्य विषयः अत्र सुप्तोऽहमीदृशोऽहमिति च मामपि न ज्ञातवानहमित्येव खल्वनुभवप्रकारः किंच सुषु
प्तावात्मा ऽज्ञानसाक्षित्वेनास्तीति भवदीयप्रक्रिया साक्षित्वं च साक्षाज्ज्ञातृत्वमेव न ह्यजानतः साक्षित्वं ज्ञातेव लोकवेदयोः सा
क्षीति व्यपदिश्यते न ज्ञानमात्रं स्मरति च भगवान् पाणिनिः साक्षाद्द्रष्टरि संज्ञायामिति साक्षाज्ज्ञातर्येव साक्षिशब्दः स चायं साक्षी
जानामीति प्रतीयमानोऽस्मदर्थ एवेति कुतस्तदानीमहमर्थो न प्रतीयेत आत्मनेऽपि स्वयमवभासमानोऽहमित्येवावभासत इति स्वापा
द्यवस्थास्वप्यात्मा प्रकाशमानोऽहमित्येवावभासत इति सिद्धं यत्तु मोक्षदशायामहमर्थो नानुवर्त्तत इति तदसत् तथा स
त्यात्मनाश एवापवर्गः प्रकारान्तरेण प्रतिज्ञातः स्यात् न चाहमर्थो धर्ममात्रं येन तद्विगमेऽप्यविद्यानिवृत्ताविव स्वरूपमवति
ष्ठेत प्रत्युत स्वरूपमेवाहमर्थ आत्मनः ज्ञानं तु तस्य धर्मः अहं जानामि ज्ञानं मे जातमिति चाहमर्थधर्मतया ज्ञानप्रतीतेश्च
अपि च यः परमार्थतोऽहमाध्यात्मिकादिदुःखैर्दुःखितमात्मानमनुसंधत्ते अहं दुःखीति सर्वमेतत् दुःखजातमपुनर्भवम
पोह्य कथमहमनाकुलः स्वस्थो भवेयमिति मुक्त्युपायसंजातरागः स एव तत्साधने प्रवर्त्तते स यदि साधनानुष्ठानेन अहमेव न भवि
ष्यामीत्यवगच्छेदपसर्पेदसौ मोक्षकथाप्रस्तावात् ततश्चाधिकार्यभावादेव सर्वं मोक्षशास्त्रमप्रमाणं स्यात् अहमुपलब्धि
तं प्रकाशमात्रमपवर्गेऽवतिष्ठत इति चेत् किमनेन मयि विनष्टेऽपि किमपि प्रकाशमात्रमवतिष्ठत इति मत्वा न हि कश्चिद्बुद्धिपू
र्वकारी प्रयतते अतोऽहमर्थस्यैव ज्ञातृतया सिद्धत्वात् प्रत्यगात्मत्वं स च प्रत्यगात्मा मुक्तावप्यहमित्येव प्रकाशते स्वस्मै स्वयं प्र
काशमानत्वात् यो यः स्वस्मै प्रकाशते स सर्वोऽहमित्येव प्रकाशते यथा तथावभासमानत्वेन उभयवादिसिद्धः संसार्यात्मा यः
पुनरहमिति न चकास्ति नासौ स्वस्मै प्रकाशते यथा घटादिः स्वस्मै प्रकाशते चायं मुक्तात्मा तस्मादहमित्येव प्रकाशते न चाहमिति

रूपमेव बुद्धिरूपमपि सुपरिष्ठं मन्यते ज्ञानग्राह्यभावरूपस्य चाज्ञानस्य ज्ञानेनोत्पत्तिविरोधित्वाभावेन न तन्निरसनेन तज्ज्ञानसाधनं नु य
दः अनेन केनापि प्रकारेणाहंकारेणानुभूतेरभिव्यक्तिः न चास्याश्रयतयाभिव्यंग्याभिव्यंजनमभिव्यंजकानां स्वभावः प्रदीपा
दिष्वदर्शनात् प्रत्यात्मस्थितपदार्थप्रतीत्यनुगुणस्याभाव्याच्च ज्ञानेतत्साधनयोरनुग्राहकस्य च तच्चत्वतः प्रामाण्यन्यायसिद्ध
न च दर्पणादिर्मुखादेरभिव्यंजकः अपितु चाक्षुषतेजः प्रतिफलनरूपदोषहेतुः तद्दोषकृतश्च तत्रान्यथावभासः अभिव्यंजक
स्त्वालोकादिरेव न चेह तथाहंकारेण संविदित्वप्रकाशायोताद्दग्दोषापादनं संभवति अत एव ज्ञातिराकार इति तदाश्रयतया प्र
तीतिः ननु व्यक्तिव्यंग्यत्वात् अन्तःकरणभूताहंकारस्य तया संविदुपलब्धेर्वस्तुतो दोषतो वा न किंचिदिह कारणमिति नाहंका
रस्य ज्ञातृत्वं तथोपलब्धेः तस्मात्स एव ज्ञाता तथा सिद्धश्चाहमर्थ एव प्रत्यगात्मा न ज्ञप्तिमात्रं अहंभावविगमे तु मोक्षेऽपि न प्रसक्ते
स्सिद्धिरित्युक्तं तमोगुणाभिभवात्स्वापगर्भानुभवात् अहमर्थस्य विविक्तस्फुटप्रतिभासाभावेऽप्याप्रबोधादहमित्येकाकारेणात्मनः स्फुरणा
त्सुषुप्तावपि नाहंभावविगमः भवदभिमताया अनुभूतेरपि तथैव प्रथेति वक्तव्यम् नहि सुप्तोत्थितः कश्चिदहंभावविमुक्तार्थमि
प्रत्यनीकाकारात्तमिरहमज्ञानसाक्षितयावतिष्ठत इत्येवंविधां स्वापसमकालामनुभूतिं परामृशति एवं हि सुप्तोत्थितस्य परामर्शः सु
खमहमस्वाप्समित्यनेन प्रत्यवमर्शेन तदानीमप्यहमर्थस्यैवात्मनः सुखित्वं ज्ञातृत्वं च ज्ञायते न च ग्राह्यं यथेदानीं सुखं भवति तथा
तदानीमस्वाप्समित्येषा प्रतिपत्तिरिति अतद्रूपत्वात्प्रतिपत्तेर्न चाहमर्थस्यात्मनः स्थिरत्वेन तदानीमहमर्थस्य सुखित्वानुसंधाना
नुपपत्तिः एतस्मात्सुषुप्तिदशायाः प्रागनुभूतं वस्तु सुप्तोत्थितो मयेदं कृतं मयेदमनुभूतमहमेवेदमवोचमिति परामृशति एतावन्तं कालं न कि
ञ्चिदहमज्ञासिषमिति च परामृशतीति चेत् तत्र किं न किंचिदिति कृत्स्नप्रतिषेध इति चेन्न नाहमवेदिषमिति वेदितुरहमर्थस्यानुवृ
त्तेर्वेद्यविषयो ह्ययं प्रतिषेधः न किंचिदिति निषेधस्य कृत्स्नविषयत्वे भवदभिमतानुभूतिरपि प्रतिषिद्धा स्यात् सुषुप्तिसमयेऽप्यनुसंधीय
मानमहमर्थमात्मानं ज्ञातारमहमिति परामृशन्न किंचिदवेदिषमिति वेदनेनास्य प्रतिषिध्यमाने तस्मिन्काले प्रतिषिध्यमानाया वित्तेः सि
द्धिमनुवर्तमानस्य ज्ञातुरहमर्थस्य चासिद्धिमवगमयेव न किंचिदहमवेदिषमिति परामर्शेन साधयेत् स्वामिममर्थं देवानांप्रिय एव साधयतु मा

सुखमहमस्वाप्समितिवद्बोधानन्तरप्रतीतेः स्वापाश्रितसुखवत्त्वात् रूपत्वात् ६

यन्मूलतया प्रत्यक्षस्यान्यथासिद्धिः । अनादिभेदवासनैव हि दोष इति चेत् भेदवासनायास्तिमिरादिवत् यथावस्थितवस्तुविपरीतज्ञा
नहेतुत्वं किमन्यत्र ज्ञातपूर्वं अनेनैव शास्त्रविरोधेन ज्ञास्यत इति चेन्न अन्योन्याश्रयणात् शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्व
निश्चये सति भेदवासनाया दोषत्वनिश्चयः भेदवासनाया दोषत्वनिश्चये सति शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वनिश्चय इति
दोष [illegible] यदि भेदवासनामूलत्वेन प्रत्यक्षस्य विपरीतार्थत्वं शास्त्रमपि तन्मूलत्वेन तथैव स्यात् अथोच्येत दोषमूलत्वेपि शास्त्रस्य प्रत्यक्षाद्यगा
सकलभेदनिरसनज्ञानहेतुत्वेन परत्वात्तत्प्रत्यक्षस्य बाधकमिति तन्न दोषमूलत्वे ज्ञाते सति परत्वमकिंचित्करं रज्जुसर्पज्ञाननिमित्तभयेस
ति भ्रान्तोपमितिपरिज्ञाते न केनचिन्नायं सर्पो मा भैषीरित्युक्तेपि भयानिवृत्तिदर्शनात् शास्त्रस्य च दोषमूलत्वं श्रवणवेलायामेव
16
ज्ञातं श्रवणावगतनिखिलभेदोपमर्दब्रह्मात्मैकत्वविज्ञानाभ्यासरूपत्वान्मननादेः अपि चेदं शास्त्रमन[illegible]संभाव्यमानदोषं
प्रत्यक्षं तु संभाव्यमानदोषमिति केनावगतं त्वया न तावत्स्वतः सिद्धं निर्धूतनिखिलभेदविशेषानुभूतिरिममर्थमवगमयति तस्याः
सर्वविषयविरक्तत्वोपेक्षास्वपक्षपातविरहाच्च नाप्येन्द्रियकं प्रत्यक्षं दोषमूलत्वेन विपरीतार्थत्वात्तन्मूलत्वादेव नान्यान्यपि प्रमाणानि
अतः स्वपक्षसाधनप्रमाणानभ्युपगमान्न स्वाभिमतार्थसिद्धिः ननु व्यावहारिकप्रमाणप्रमेयव्यवहारोस्माकमप्यस्त्येव को व्यावहारि
को नाम आपातप्रतीतिसिद्धो युक्तिभिर्निरूपितो न तथावस्थित इति चेत् किं तेन प्रयोजनं प्रमाणेन यत्प्रतिपन्नेपि यौक्तिकबाधादेव प्रमा
णकार्याभावात् अथोच्येत शास्त्रप्रत्यक्षयोर्द्वयोरप्यविद्यामूलत्वेपि प्रत्यक्षविषयस्य शास्त्रेण बाधो दृश्यते शास्त्रविषयस्य पश्चाद्दृ
ष्टस्य ब्रह्मणः पश्चात्तनबाधादर्शनेनैव निर्विशेषानुभूतिमात्रं ब्रह्मैव परमार्थ इति तदयुक्तं अबाधितस्यापि दोषमूलस्यापारमा
र्थ्यनिश्चयात् एतदुक्तं भवति यथा सकलेतरकाचादिदोषरहितपुरुषान्तरागोचरगिरिगुहावसतस्तैमिरिकजनस्याज्ञाततत्त्वति
मिरस्य सर्वस्यापि तिमिरदोषविशेषेण द्विचन्द्रज्ञानमविशिष्टं जायते तत्र न बाधकप्रत्ययोस्तीति न तन्मिथ्या न भवतीति तद्विषयभूतं चन्द्र
द्वित्वमपि मिथ्यैव दोषाद्यथार्थज्ञानहेतुः तथा ब्रह्मज्ञानमविद्यामूलत्वेन बाधकज्ञानरहितमपि स्वविषयेन ब्रह्मणा सह मिथ्यै
वेति भवन्ति चात्र प्रयोगाः विवादाध्यासितं ब्रह्म मिथ्या अविद्यावद्दृत्त्यज्ञानविषयत्वात् प्रपंचवत् ब्रह्म मिथ्या ज्ञानविषयत्वात् प्रप
ञ्चवत् ब्रह्म मिथ्या असत्यहेतुजन्यज्ञानविषयत्वात् प्रपंचवदेव [illegible] ह [illegible]दिज्ञानेस्य ब्रह्मस्यापरमार्थ्य [illegible]

म

प्रकाशानत्वे न तस्मात्तत्त्वं संसारित्वादिप्रसंगः मोक्षाविरोधादज्ञत्वाद्यहेतुत्वाच्चाहंप्रत्ययस्य अज्ञानेनाम स्वरूपात्ता न मैथ्यात्ता
नं विपरीतज्ञानं वाहमित्येवात्मनः स्वरूपमिति स्वरूपज्ञानरूपाहंप्रत्ययो नात्मत्वमापादयति कुतः संसारित्वं अपितु तद्वि
रोधित्वात्साशयस्यैव वृत्त्या तम भावापरोक्ष्यसिद्धेः तन्निरवशेषाविद्यानामपि वामदेवादीनामहमित्येवात्मानुभवदर्शनाच्च श्रू
१५ यते हि तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति अहमेव च सर्वं वर्त्तोऽभिभविष्यामीत्यादि सकलेतरज्ञानविशे
षिनः सच्छब्दप्रत्ययमात्रभाजः परस्य ब्रह्मणो व्यवहारोऽप्येवमेव हंताहमिमास्तिस्रो देवताः बहु स्यां प्रजायेय स ऐक्षत लोकानु सृ
जा इति तथा यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः अतोऽस्मिन् लोके वेदे च प्रथितः पुरुषोत्तमः अहमात्मा गुडाकेश नत्वेवाहं जा
तु नासं अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात्
अहं बीजप्रदः पिता वेदाहं समतीतानीत्यादिषु ॥ तदहमित्येवात्मनः स्वरूपकथनं तदहंकारस्य तेजोऽन्तर्भावो भगवतोपदिश्यते
महाभूतान्यहंकारो बुद्धिरव्यक्तमेव चेति उक्तानेन स्वरूपोपदेशेषु सर्वत्राहमित्येवोपदेशात्तथैवात्मस्वरूपप्रतिपत्तेश्चाहमित्येव प्र
त्यगात्मनः स्वरूपं अव्यक्तपरिणामभेदस्याहंकारस्य तेजोऽन्तर्भावो भगवतोपदिश्यते सत्त्वनात्मनि देहेऽहंभावकरणहेतुत्वेनाहंकार
इत्युच्यते अस्य त्वहंकारशब्दस्याभूततद्भावेऽर्थे च्विप्रत्ययमुत्पाद्य व्युत्पत्तिर्द्रष्टव्या अयमेव त्वहंकार उत्कृष्टजनावमानहेतुर्ग
र्वापरनामा शास्त्रेषु बहुशो हेयतया प्रतिपाद्यते तस्माद्बाधकापेताऽहंबुद्धिः साक्षादात्मगोचरैव शरीरगोचरा त्वहंबुद्धिरवि
द्यैव यथोक्तं भगवता पराशरेण श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन अनात्मन्यात्मबुद्धिर्येति यदि ज्ञप्तिमात्रमेवा
त्मा तदा नात्वन्यात्माभिमानेन शरीरे ज्ञप्तिमात्रप्रतिभासः स्यान्न ज्ञातृत्वप्रतिभासस्तस्माज्ज्ञाताहमर्थ एवात्मा तदुक्तं अतः प्रत्य २४
क्षसिद्धत्वादुक्तन्यायागमानुयायात् अविद्यायोगतश्चात्मा ज्ञाताहमिति भासते इति तथा च देहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यसा
धनः नित्यो व्यापी प्रतिक्षेत्रमात्माभिन्नः स्वतः सुखीति अनन्यसाधनः स्वप्रकाशः व्यापी अतिसूक्ष्मतया सर्वाचेतनान्तःप्रवेशस्व
भावः प्रत्युक्ते दोषमूलत्वेनान्यथासिद्धिसंभावनया सकलभेदावलंबिप्रत्यक्षस्य शास्त्रबाध्यत्वमिति केचिदेव प्रत्यवस्थितं

स्य स्य गगनकुसुमवदसत्त्वं। प्रागद्वैतज्ञानात्सद्बुद्धिबोध्यत्वात् अन्तिमज्ञानेऽप्यसत्त्वं शास्त्रस्य न तथा शास्त्रं निरस्तनिखिल
भेदचिन्मात्रब्रह्मज्ञानोपायः पदार्थपायः तदा स्वयं शास्त्रमस्तीति बुद्धिः नैवमसति शास्त्रे ज्ञप्ते शास्त्रमिति बुद्धेर्मिथ्यात्वात्॥
ततः किमिदं तत्तः मिथ्याभूतशास्त्रजन्यज्ञानस्य मिथ्यात्वेन तद्विषयस्यापि ब्रह्मणोऽपि मिथ्यात्वं यथा धूमभ्रमजनितवाष्पज
न्याग्निज्ञानस्य मिथ्यात्वेन तद्विषयस्याग्नेरपि मिथ्यात्वं पश्चात्तनबाधादर्शनेन चासिद्धं शून्यमेव तत्त्वमिति वाक्येन तस्यापि बाध
दर्शनात् ननु भ्रान्तिमूलमिति चेत् एतदपि भ्रान्तिमूलमिति त्वयैवोक्तं पाश्चात्यबाधादर्शनं तु तस्यैवेत्यलम्। अप्रतिष्ठितकुतर्कप
रिहसनेन यदुक्तं वेदान्तवाक्यानि निर्विशेषज्ञानैकरसवस्तुमात्रप्रतिपादनपराणि सदेव सोम्येदमग्र आसीदित्येवमादीनि
नि तदयुक्तं एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनमुखेन सच्छब्दवाच्यस्य परस्य ब्रह्मणो जगदुपादानत्वं जगन्निमित्तत्वं
सर्वज्ञता सर्वशक्तियोगः सत्यसंकल्पत्वं सर्वान्तरत्वं सर्वाधारता सर्वनियमनमित्याद्यनेककल्याणगुणविशिष्टतां जगत्स्वज
गतस्तदात्मकतां च प्रतिपाद्य एवंभूतब्रह्मात्मकत्वमसीति श्वेतकेतुं प्रत्युपदेशाय प्रवृत्तत्वात्प्रकरणस्य प्रपञ्चितश्चायमर्थो
वेदार्थसंग्रहे। आरम्भणाधिकरणे तिष्ठतामुपपादयिष्यामः। अथ परायया तदक्षरमधिगम्यत इत्यत्रापि प्राकृतान्
हेयगुणान्प्रतिषिध्य नित्यत्वविभुत्वसूक्ष्मत्वसर्वगतत्वाव्ययत्वभूतयोनित्वसर्वज्ञत्वादिकल्याणगुणयोगः परस्य ब्रह्मणः
प्रतिपादितः सत्यं ज्ञानमनन्तं ब्रह्मेत्यत्रापि सामानाधिकरण्यस्यानेकविशेषणविशिष्टैकार्थाभिधानव्युत्पत्त्या न निर्विशेषवस्तु
सिद्धिः प्रवृत्तिनिमित्तभेदेनैकार्थवृत्तित्वं हि सामानाधिकरण्यं तत्र सत्यज्ञानादिपदमुख्यार्थैर्गुणैस्तत्तद्गुणविरोध्याकारप्रत्यनी
काकारैर्वा एकस्मिन्नेवार्थे पदानां प्रवृत्तौ निमित्तभेदो वश्याश्रयणीयः इयांस्तु विशेषः एकस्मिन्पक्षे पदानां मुख्यार्थता अपरस्मिंश्च
लक्षणा न चाज्ञानादीनां प्रत्यनीकता वस्तुस्वरूपमेव एकेनैव पदेन स्वरूपं प्रतिपन्नमिति पदान्तरप्रयोगवैयर्थ्यात् तथा सति
सामानाधिकरण्यासिद्धिः एकस्मिन्वस्तुनि वर्तमानानां निमित्तभेदानाश्रयणात्। न चैकस्यैवार्थस्य विशेषणभेदेन विशिष्टताभेदः

अभावरूपताः२ अधिकरणात्मकस्वरूपलोपः स्वरूपमेव२

अज्ञानाद्यभावानामधि१
करणात्मकत्वे सति २

तत्रापि ज्ञानस्याबाधितत्वाद्विषये द्विपादिदोषजमंत्रज्वादौ सर्पादि विज्ञानं सत्समेव भयादि हेतुः त्रुटिः ५

प्रतिपत्तिहेतुभावव द्विद्यामूलत्वेन सत्यस्यापि शास्त्रस्य परमार्थभूत ब्रह्मविषयप्रतिपत्तिहेतुभावो न विरुद्ध इति स्वाभज्ञानस्या
सत्यत्वाभावात् तत्र हि विषयाणामेव मिथ्यात्वं तेषामेव हि बाधोऽपपत्तेर्ज्ञानस्य न हि मयाद्य स्वप्ने हायामनुभूतं ज्ञानमिह नवि
द्यत इति कस्यचिदपि प्रत्ययो जायते दर्शनं तु विद्यते ऽर्थमानसत्तीति बाधकप्रत्ययः मायाविनो मंत्रौषधादिप्रभवं मायाम
प्रीतेः यं ज्ञानं सत्यमेव प्रतीतेर्भयस्य च हेतुः सत्येव दष्टविषात्मनि सर्पशंकिनो मरणात् दष्टबुद्धिः सत्येव शंका विषबुद्धिर्मरणहेतुर्भ
तावस्तुभूत एव जलादौ मुखादि प्रतिभासो वस्तुभूतमुखगत विशेषनिश्चयहेतुः एतेषां संवेदनानामुत्पत्तिमत्त्वादर्थक्रियाका
रित्वाच्च सत्यत्वमवसीयते हस्त्यादीनामभावे कथं तद्बुद्धयः सत्या भवंतीति चेत् नैतद्बुद्धीनां सावलंबनत्वमात्रनियमात् अर्थस्य
प्रतिभासमानत्वमेवालंबनत्वमपेक्षितं प्रतिभासमानता चास्त्येव दोषवशात् सन्तु बाधितो सत्यः त्ववसीयते अबाधिता हि बुद्धिः
सत्येवमुक्तं रेखया वर्णप्रतिपत्तावपि नासत्यात् सत्यबुद्धिः रेखायाः सत्यत्वात् ननु वर्णात्मना प्रतिपन्नात् रेखा वर्णबुद्धिहेतुर्वर्णा
त्मतात्वसत्या नैवं वर्णात्मतायास्तत्र सत्याया उपायत्वाद्योगात् असतो निरूपाख्यस्योपायत्वं न दृष्टमनुपपन्नं च अथ तस्या वर्णा
बुद्धरूपायत्वे एवं तर्हि स्यात्सत्यबुद्धिः स्यात् बुद्धेः सत्यत्वादेवोपायोपेयभावप्रसंगात् उभयोर्वर्णबुद्धित्वाविशेषात् रेखाया
अविद्यमानवर्णात्मनोपायत्वे चैकस्यामेव रेखायामविद्यमानसर्ववर्णात्मकत्वस्य सुलभत्वादेकरेखादर्शनात् सर्ववर्णप्रतिपत्तिः
स्यात् अथापि द्विगुणो देवदत्तादिशब्दसंकेतवशच्चक्षुर्ग्राह्यरेखाविशेषश्रोत्रग्राह्यवर्णविशेषसंकेतवशाद्रेखाविशेषो वर्ण
विशिष्टबुद्धिहेतुरिति हंत तर्हि सत्यादेव सत्यप्रतिपत्तिः रेखायाः संकेतस्य च सत्यत्वात् रेखागवयादपि सत्याद्गवयबुद्धिः साऽप्यनि
बंधनाद्याहरणं च सत्यमेव न चैकरूपस्य शब्दस्य नादविशेषेणार्थविशेषभेदबुद्धिहेतुत्वेऽप्यसत्यात् सत्यप्रतिपत्तिः नानानादाभिव्य
नस्यैकस्यैव शब्दस्य तत्तन्नादाभिव्यंग्यत्वरूपेणार्थविशेषैः सह संबंधग्रहणेन नानार्थभेदबुद्ध्युत्पत्तिहेतुत्वात् शब्दस्यैकरूपत्वमपि
नसाधीयः गकारादेर्बोधकस्यैव श्रोत्रग्राह्यत्वेन शब्दत्वात् अतोऽसत्यात्सत्यशास्त्रात् सत्यब्रह्मविषयप्रतिपत्तिर्दुरुपपादा ननु नसा

देवं भुवनेशमीड्यं न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी
ज्ञानबलक्रिया च एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प इत्याद्याः श्रुतयो ज्ञा
तृत्वमुखान् कल्याणगुणान् ज्ञानस्वरूपस्यैव ब्रह्मणः स्वाभाविकान् वदंति समस्तहेयगुणविरहिततां च निर्गुणवाक्या
नां सगुणवाक्यानां च विषयमपहतपाप्मेत्यादि पिपास इत्यंतेन हेयगुणान् प्रतिषिध्य सत्यकामः सत्यसंकल्प इति ब्रह्मणः क
ल्याणगुणान् विदधातीयं श्रुतिरेव विविनक्तीति सगुणनिर्गुणवाक्ययोर्विरोधाभावादन्यतरस्य मिथ्याविषयताश्रय
णमपि नाशंकनीयं भीषास्माद्वातः पवत इत्यादिना ब्रह्मगुणानारभ्य ते ये शतमित्यनुक्रमेणोत्तरोत्तरानंदातिशयमुक्त्वा
यतो वाचो निवर्तंते अप्राप्य मनसा सह आनंदं ब्रह्मणो विद्वानिति ब्रह्मणः कल्याणगुणानंत्यमत्यादरेण वदतीयं श्रुतिः
सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति ब्रह्मवेदनफलमवगमयद्वाक्यं परस्य विपश्चितो ब्रह्मणो गुणानंत्यं ब्रवीति
विपश्चिता ब्रह्मणा सह सर्वान् कामानश्नुते काम्यंत इति कामाः कल्याणगुणाः ब्रह्मणा सह तद्गुणान् सर्वानश्नुत इत्यर्थः
दहरविद्यायां तस्मिन्यदंतस्तदन्वेष्टव्यमितिवद्गुणप्राधान्यं वक्तुं सहशब्दः फलोपासनयोः प्रकारैक्यं यथाक्रतुरस्मिन्
लोके पुरुषो भवति तथेतः प्रेत्य भवतीति श्रुत्यैव सिद्धं यस्यामतं तस्य मतं अविज्ञातं विजानतामिति ब्रह्मणो ज्ञानाविष
यत्वं उक्तमिति चेन्न ब्रह्मविदाप्नोति परं ब्रह्म वेद ब्रह्मैव भवतीति ज्ञानान्मोक्षोपदेशो न स्यात् असन्नेव स भवति असद्ब्रह्मे
ति वेद चेत् अस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुरिति ब्रह्मविषयज्ञानाभावसद्भावाभ्यामात्मनाशमात्मसत्तां च वदति
अतो ब्रह्मविषयवेदनमेवापवर्गोपायः सर्वश्रुतयो विदधति ज्ञानं चोपासनात्मकं उपास्यं च ब्रह्म सगुणमित्युक्तं यतो वाचो
निवर्तंते अप्राप्य मनसा सहेति ब्रह्मणोऽनंतस्यापरिमितगुणस्य वाङ्मनसयोरेतावदिति परिच्छेदायोग्यत्वश्रवणेन ब्रह्मैताव
दिति ब्रह्मपरिच्छेदज्ञानवतां ब्रह्माविज्ञातममतमित्युक्तम् अपरिच्छिन्नत्वाद्ब्रह्मणः अन्यथा यस्यामतं तस्य मतं अविज्ञात
मविजानतामिति ब्रह्मणोऽमतत्वविज्ञातत्ववचनं तत्रैव विरुध्यते यत्तु न दृष्टेर्द्रष्टारमिति श्रुतिः दृष्टेर्मतेर्ध्यातेरिति किं द्रष्टारं

दनेकार्थत्वं पदानां सामानाधिकरण्यविरोधि एकस्यैव वस्तुनोऽनेकविशेषणविशिष्टताप्रतिपादनपरत्वात् सामानाधिकरण्यस्य
भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः समानाधिकरण्यमिति शाब्दिकाः यदुक्तमेकमेवाद्वितीयमित्यत्राप्य
द्वितीयपदं गुणतो विशिष्टद्वितीयतां न सहते अतः सर्वशाखाप्रत्ययन्यायेन कारणवाक्यानामद्वितीयवस्तुप्रतिपादनपरत्वम
भ्युपगमनीयं कारणत्वोपलक्षितस्याद्वितीयस्य ब्रह्मणो लक्षणमिदमुच्यते सत्यं ज्ञानमनन्तं ब्रह्मेति अतो लक्षणवाक्यमपि
तं ब्रह्मेति निर्गुणमेव अन्यथा निर्गुणं निरंजनमित्यादिभिर्विरोधश्चेति तदनुपपन्नं जगदुपादानस्य ब्रह्मणः स्वव्यतिरिक्ता
धिष्ठानान्तरनिवारणेन विचित्रशक्तियोगप्रतिपादनपरत्वादद्वितीयपदस्य तथैव विचित्रशक्तियोगमेवावगमयति त
दैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्यादि अविशेषेणाद्वितीयामित्युक्ते निमित्तान्तरमात्रनिषेधः कथं ज्ञायत इति चे
त्सिसृक्षो ब्रह्मण उपादानकारणत्वं सदेव सोम्येदमग्र आसीदेकमेवेति प्रतिपादितं कार्योत्पत्तिस्वाभाव्येन बुद्धिस्थं निमि
त्तान्तरमिति तदद्वितीयपदेन निषिध्यत इत्यवगम्यते सर्वनिषेधे हि स्वाभ्युपगतासिसाधयिषिता नित्यत्वादयश्च विशे
षाः स्युः सर्वशाखाप्रत्ययन्यायश्चात्र भवतो विपरीतफलः सर्वशाखानुकारणान्वयिनां सर्वज्ञत्वादीनां गुणानामत्रोपसं
हारहेतुत्वात् अतः कारणवाक्यस्वभावादपि सत्यं ज्ञानमनन्तं ब्रह्मेत्यनेन सविशेषमेव प्रतिपाद्यत इति विज्ञायते न च नि
र्गुणवाक्यविरोधः प्राकृतहेयगुणविषयत्वात् तथा निर्गुणं निरंजनं निष्कलं निष्क्रियं शान्तमित्यादीनां ज्ञानमात्रस्वरूपवा
दिन्योऽपि श्रुतयो ब्रह्मणो ज्ञानस्वरूपतामभिदधति न तावन्निर्विशेषज्ञानमात्रमेव तत्त्वं ज्ञातुरेव ज्ञानस्वरूपत्वात्
ज्ञानस्वरूपस्यैव तस्य ज्ञानाश्रयत्वं मणिद्युमणिप्रदीपादिवदित्युक्तमेव ज्ञातृत्वमेव हि सर्वाः श्रुतयो वदन्ति यः सर्वज्ञः स
र्ववित् तदैक्षत सेयं देवतैक्षत तदैक्षत लोकान्नु सृजा इति नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति का
मान् ज्ञाज्ञौ द्वावजावीशानीशौ तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतं पतिं पतीनां परमं परस्ताद् विदाम

न्तर्हितं स भ्रान्तिः साच विक्षिप्येत्यादि ब्रह्मणो प्रतिष्ठाया अन्तरमवकाशो विष्णोरेव यदुक्तं न स्थानतोपीति सर्वविशेषरहि
तं ब्रह्मेति वक्ष्यतीति तत्र सविशेषं ब्रह्मैव हि तत्र वक्ष्यति मायामात्रं त्विति च स्वाप्नानामप्यर्थानां जागरितावस्थानु
भूतपदार्थवैधर्म्येण मायामात्रत्वमुच्यत इति पारमार्थिकत्वमेव वक्ष्यति स्मृतिपुराणयोरपि निर्विशेषज्ञानमात्र
मेव परमार्थोन्यदपारमार्थिकमिति प्रतीयत इति परमहितं तदसत् यो मामजमनादिं च वेत्ति लोकमहेश्वरं मत्स्था
नि सर्वभूतानि न चाहं तेष्ववस्थितः न च मत्स्थानि भूतानि पश्य मे योगमैश्वरं भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा मत्तः परतरं नान्यत्किंचिदस्ति धनंजय मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव विष्टभ्याहमि
दं कृत्स्नमेकांशेन स्थितो जगत् उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः यस्मात्क्षरमती
तोहमक्षरादपि चोत्तमः अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः स सर्वभूतप्रकृतिं विकारान्गुणादिदोषांश्च मुने व्यतीतः अती
तसर्वावरणोखिलात्मा तेनास्तृतं यद्भुवनान्तराले समस्तकल्याणगुणात्मकोसौ स्वशक्तिलेशाद्धृतभूतसर्गः इच्छागृहीताभि
मतोरुदेहः संसाधिताशेषजगद्धितो सौ तेजोबलैश्वर्यमहावबोधः सुवीर्यशक्त्यादिगुणैकराशिः परः पराणां सकला न यत्र क्ले
शादयः सन्ति परावरेशे स ईश्वरो व्यष्टिसमष्टिरूपोव्यक्तस्वरूपः प्रकटस्वरूपः सर्वेश्वरः सर्वदृक्सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः
संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपं संदृश्यते वाप्यवगम्यते वा तज्ज्ञानमज्ञानमतोन्यदुक्तम् शुद्धे महाविभूत्याख्ये परे ब्र
ह्मणि शब्दिते मैत्रेय भगवच्छब्दः सर्वकारणकारणे संभर्तेति तथा भर्ता भकारोर्थद्वयान्वितः नेता गमयिता स्रष्टा गकारार्थस्त
था मुने ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा वसन्ति तत्र भूतानि भूतात्मन्यखिला
त्मनि स च भूतेष्वशेषेषु वकारार्थस्ततोव्ययः ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः भगवच्छब्दवाच्यानि विना हेयैर्गुणादि
भिः एवमेष महाशब्दो मैत्रेय भगवानिति परमब्रह्मभूतस्य वासुदेवस्य नान्यगः तत्र पूज्यपदार्थोक्तिः परिभाषासमन्वितः शब्दोयं
नोपचारेण त्वन्यत्र ह्युपचारतः समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् समस्तशक्तिरूपाणि

तारं स्वप्रतिपादयतीति तदसंगतं कुचैतन्यगुणयोगितया मानुरज्ञानस्वरूपतां कुतर्कसिद्धां मत्वा न तथा मानं पश्येः न मन्वी
था अपितु द्रष्टारं मंतारं मध्यमानं दृष्टिमतिरूपमेव पश्ये परित्यज्य भिद्यातीति परिहृतं अथवा दृष्टेर्द्रष्टारं मतेर्मंतारं जीवा
त्मानं प्रतिबिंबं सर्वभूतांतरात्मानं परमात्मानमेवोपास्वेति वाक्यार्थः अन्यथा विज्ञातारमरे केन विजानीयादित्यादिना तत्त्वे
प्रकृतिविरोधः अत्र आनंदो ब्रह्मेत्यानंदमात्रमेव ब्रह्मस्वरूपं प्रतीयत इति यदुक्तं तत्र ज्ञानाश्रयस्य ब्रह्मणो ज्ञानस्वरूपमिति
परिहृतं ज्ञानमेव चानुकूलमानंदमित्युच्यते विज्ञानमानंदं ब्रह्मेत्यानंदस्वरूपमेव विज्ञानं ब्रह्मेत्यर्थः अत एव भवतामिकरसता अस्य
ज्ञानस्वरूपस्यैव ज्ञातृत्वमपि श्रुतिशतसमधिगतमित्युक्तं तदेव स एको ब्रह्मण आनंदः आनंदं ब्रह्मणो विद्वानित्यादिभिरतिरे
कनिर्देशाच्च नानंदमात्रं ब्रह्म अपि त्वानंदित्वात्तत्त्वमेव ज्ञानेऽपि त्वेवं पादस्तमुक्तं यत्र हि द्वैतमिव भवति नेह नानास्ति किंचन
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति भेदनिषेधो बहुधा दृश्यत इति तत्र सक
लस्य जगतो ब्रह्मकार्यतया तदंतर्यामिकतया च तदात्मकत्वेनैक्यात्तत्प्रत्यनीकं नानात्वं प्रतिषिध्यते न पुनर्बहु स्यां प्रजाय
येति बहुभवनसंकल्पपूर्वकं ब्रह्मणो नानात्वं श्रुतिसिद्धं प्रतिषिध्यत इति परिहृतं नानात्वनिषेधादियमपरमार्थवि
षयेति चेन्न प्रत्यक्षादिसकलप्रमाणानवगतनानात्वं यदिह ब्रह्मणः प्रतिपाद्यतदेव बाध्यत इत्युपहास्यमिदं यदाह्ये
वैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति ब्रह्मणि नानात्वं पश्यतो भयप्राप्तिरिति यदुक्तं तदसत् सर्वं खल्विदं
ब्रह्म तज्जलानिति शांत उपासीतेति तन्नानात्वानुसंधानस्य शांतिहेतुत्वोपदेशात् तथाहि सर्वस्य जगतः तदुत्पत्तिस्थिति
लयकर्मतया तदात्मकत्वानुसंधाने नात्र शांतिर्विधीयते अतो यथावदवस्थितदेवतिर्यङ्मनुष्यस्थावरादिभेदभि
न्नं जगद्ब्रह्मात्मकमित्यनुसंधानस्य शांतिहेतुतयाऽभयप्राप्तिहेतुत्वेन न भयहेतुत्वप्रसंगः एवं तर्ह्यथ तस्य भयं भवतीति किमुच्यते
यदाह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदते अथ सोऽभयं गतो भवतीत्यभयप्राप्तिहेतुत्वेन ब्रह्मणि ध्या
प्रतिष्ठामिहितात्तस्माद्विच्छेदे भयं भवतीति यथोक्तं महर्षिभिः यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते सा हानिस्त

संततास्मृतिः

वस्तुतस्तु कर्मरूपा विद्यावेत्तिन तीयाशक्तिरत्र पदेन्वयस्य ५ = भिलीत्यस्य २ मुक्तस्यापिईश्वरादेवमुक्तिरेस्वतन्त्रस्यार्थः ३ = अथ अपविशेषेसामान्यतश्चित्तस्थिरकरणोपायं ४

पार्थीकार तयानुसंधानेच प्रतिपादितमिति पर्यवसानविश्लेषणतादिभूतिभूतं जगदपि पारमार्थिकमेवेति ज्ञायते प्रत्यस्तमितभेदमिति
त्रदेवमनुष्यादिप्रकृतिपरिणामविशेषवर्जस्यत्वस्यात्मनः स्वरूपं तज्जतमेवस्थितत्वेन तद्देवादिदेवादिशब्दागोचरं ज्ञानं सत्तैक
लक्षणं स्वसंवेद्यं योगयुञ्जनसौगोचरं इत्युच्यत इत्यनेन न प्रपंचापलापः कोपि सिद्धमवगम्यत इति चेन्न तदुच्यते असिन्निकरणे
संसारेकर्मजनतयायोगमभिधाय योगावयवान् प्रत्याहारपर्यन्तानभिधायधारणासिद्ध्यर्थं शुभाश्रयं वक्तुं परस्य ब्रह्मणो विष्णोः
शक्तिशब्दाभिधेयं रूपद्वयं मूर्तामूर्तविभागेन प्रतिपाद्य तृतीयशक्तिरूपकर्माख्याविद्यावेष्टितमचिदचिद्देहेत्रतो मूर्तस्य विभागं
भावनात्रयान्यथा शुभमित्युक्ताद्वितीयस्यकर्माख्याविद्याविरहिणोचिद्विमुक्तस्य ज्ञानेकाकारस्यामूर्तस्य विभागस्य निष्पन्न
योगिध्येयतयायोगयुञ्जनसौनालंबनतयास्वतः शुद्धिविरहाच्च शुभाश्रयत्वे प्रतिषिद्धेपरशक्तिरूपमिदममूर्तमपरशक्ति
रूपं ...तेवशाश्वतमूर्तंच परशक्तिरूपस्यात्मनः क्षेत्रज्ञतापत्तिहेतुभूततृतीयशक्त्याख्यकर्मरूपाविद्याचेष्टितं ...क्तित्रयाश्र
यंभगवद्धारणासाधारणं ...आदित्यवर्णमित्यादिवेदांतसिद्धमूर्तरूपं शुभाश्रयं इत्युक्तं अत्रपरिशुद्धात्मस्वरूपस्य शुभाश्रयतानर्हतां
वक्तुं प्रत्यस्तमितभेदं यदितीत्याद्युच्यते तथाहि नतद्योगयुजाशक्यं नपचिंतयितुं यतः द्वितीयं विष्णुसंज्ञस्य योगिध्येयं परं पदं
समस्ताः शक्तयश्चैता नृपयत्रप्रतिष्ठिताः तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महदिति तथा चतुर्मुखसनकादीनां जगदंतर्वर्तिनामविद्या
वेष्टितत्वेन शुभाश्रयत्वानर्हतामुक्त्वा ...नामेवपश्चाद्योगेनोद्भूतबोधानांस्वस्वरूपमापन्नानां च स्वतः शुद्धिविरहात् भगवतास्येन
केनशुभाश्रयतानिषिद्धा आब्रह्मस्तंबपर्यंता जगदंतर्व्यवस्थिताः प्राणिनः कर्मजनितसंसारवशवर्तिनः यतस्ततोन तेध्याने
ध्यानिनामुपकारकाः अविद्यांतर्गताः सर्वेतेहि संसारगोचराः पश्चादुद्भूतबोधाश्च ध्यानेनैवोपकारकाः नैसर्गिकोन वैबोधः तेषा
मप्यन्यतोयतः सामान्यं ... निसर्गादेव बोधवदिव्यादिनापरस्य ब्रह्मणो विष्णोः स्वरूपं च साधारणमेव शुभाश्रयं इत्युक्तं प्रतीयमान
भेदापलापः प्रतीयते ज्ञानस्वरूपमित्यत्राप्यत्र ज्ञानमिति ...जातस्यकृत्स्नस्य नमिथ्यात्वं प्रतिपाद्यते ज्ञानस्वरूपस्यात्मनो देवमनुष्या
द्यर्थाकारेणावभासो भ्रान्तिरिति जगतिकृत्स्नस्य जगतो ज्ञानमिथ्याभवति जगद्ब्रह्मणोः सामानाधिकरण्येनैक्यप्रतीतेः ब्रह्मणोज्ञान
स्वरूपस्यार्थाकारताभ्रान्तिरित्युक्ते समस्तजातस्य कृत्स्नस्य मिथ्यात्वमुक्तं स्यादितिचेन्न अस्मिन्नध्याये परस्य ब्रह्मणोविष्णोः स्वरूपत्वा
ताविन्मात्रवचनात् नहिशुक्तिकाकारजनतया ...भासोभ्रान्तिरित्युक्ते शुक्तिः २

प्रत्यस्तमितभेदं य... ज्ञानमात्रमगोचरं वचसामात्मसंवेद्यं तज्ज्ञानं ब्र...
...संज्ञितं १ निमुक्तसर्वं स्वस्वरूपप्रतिपादितस्य योगयुञ्जनसोऽ ... ज्ञो
...त्वेनस्वतः शुद्धिविरहाच्च शुभाश्रयताभावमापादयति नैव
...ब्रह्मस्वरूपप्रतिपादनपरं तदेवतद्याही त्यादिनाप्रतिपाद्यते ६ =

२ ज्ञानस्वरूपमत... ...नतः स्थितम् =

तत्करोति जनेश्वर देवतिर्यङ्मनुष्याख्यचेष्टावंति स्वलीलया जगतामुपकाराय न सा कर्मनिमित्तजा चेष्टा तस्य प्रमेयस्य व्यापिन
व्याहतात्मिका एवंप्रकारममलं नित्यं व्यापकमक्षयं समस्तहेयरहितं विष्ण्वाख्यं परमं पदं परः पराणां परमः परमात्मात्मसंस्थितः
रूपवर्णादिनिर्देशविशेषणविवर्जितः अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः वर्जितः शक्यते वक्तुं यः सदास्तीति केवलं
सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ततः स वासुदेवेति विद्वद्भिः परिपठ्यते तद्ब्रह्म परमं नित्यमजमक्षरमव्ययं एकरूपं च
सदा हेयाभावाच्च निर्मलं तदेव सर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत् तथा पुरुषरूपेण कालरूपेण च स्थितं प्रकृतिर्या मया ख्याता
व्यक्ताव्यक्तस्वरूपिणी पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि परमात्मा च सर्वेषामाधारः परमेश्वरः विष्णुनामा स वेदेषु वेदान्तेषु च
गीयते द्वे रूपे ब्रह्मणस्तस्य मूर्तं चामूर्तमेव च क्षराक्षरस्वरूपे ते सर्वभूतेष्ववस्थिते अक्षरं तत्परं ब्रह्म क्षरः सर्वमिदं जगत् एकदेश
स्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा अ
विद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा संसारतापानखिलानवाप्नोत्यतिसंततान् तया
तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता सर्वभूतेषु भूपाल तारतम्येन वर्तते प्रधानं च पुमांश्चैव सर्वभूतात्मभूतया विष्णुशक्त्या महा
बुद्धे वृतौ संश्रयधर्मिणौ तयोः सैव पृथग्भावकारणं संश्रयस्य च यथा सक्तो जले वातो बिभर्ति कणिकाशतं शक्तिः सापि तथा वि
ष्णोः प्रधानपुरुषात्मनः तदेतदक्षयं नित्यं जगन्मुनिवराखिलं आविर्भावतिरोभावजन्मनाशविकल्पवत् इत्यादिना परं ब्रह्म
स्वभावत एव निरस्तनिखिलदोषगन्धं समस्तकल्याणगुणात्मकं जगदुत्पत्तिस्थितिसंहारान्तःप्रवेशनियमनादिलीलं प्रतिपाद्य क
त्स्नस्य चिदचिद्वस्तुनः सर्वावस्थावस्थितस्य पारमार्थिकस्यैव परस्य ब्रह्मणः शरीरतया रूपतया शरीरत्वशक्तिवि
भूत्यादिशब्दैस्तत्तच्छब्दसामानाधिकरण्येन चाभिधाय तद्विभूतिभूतस्य चिद्वस्तुनः स्वरूपेणावस्थितिं मोचनं च प्रतया तत्तत्
स्वरूपेणावस्थितिं चोक्त्वा क्षेत्रज्ञावस्थायां पुण्यपापात्मककर्मरूपाविद्यावेष्टितत्वेन स्वाभाविकज्ञानरूपत्वानन्तसंख्या नमेत्

स्य ब्रह्मणस्य निर्विशेषज्ञानमात्रमित्येवंरूपमेकमेवोत्तरं स्यात् जगद्ब्रह्मणोरेकद्रव्यत्वपरे च सामानाधिकरण्ये सत्यसंकल्पत्वादिगुणैक
तानन्तानिखिलहेयप्रत्यनीकता च बाध्येत सर्वाशुभास्पदं च ब्रह्म भवेत् आत्मशरीरभावे एवेदं सामानाधिकरण्यं मुख्यवृत्तमिति स्था
प्यते अतो विष्णोः सकाशादुद्भूतं जगत् तत्रैव संस्थितं स्थितिसंयमकर्त्ता सो जगतोऽस्य जगच्च सः इति संग्रहेणोक्तमर्थं परः पराणामित्या र
स्य विस्तरेण वक्तुं परं ब्रह्मभूतं भगवन्तं विष्णुं स्वेनैव रूपेणावस्थितम् विकारायेति श्लोकेन प्रथमं प्रणम्य तमेव हिरण्यगर्भहर्यवतारशंक
रूपत्रिमूर्त्तिप्रधानकालक्षेत्रज्ञसमष्टिव्यष्टिरूपेणावस्थितं च नमस्करोति तत्र ज्ञानस्वरूपमित्यर्धश्लोकः तेनात्मस्या
त्मनावस्थितस्य परमात्मनः स्वभावमाह तस्मान्मात्रनिर्विशेषवस्तुप्रतीतिः यदि निर्विशेषसत्तानरूपचलाधिष्ठानभ्रमप्रतिपाद
न परं धाम्नः तदिति निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यत इति चोद्यशङ्क्य यः सर्वभावानामचि
न्त्यज्ञानगोचराः यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता इति परिहारश्लोकं वदते तथाप
ति ब्रह्मणो निर्गुणस्य कथं सर्गादिकर्तृत्वं ब्रह्मणो न पारमार्थिकः सर्गः अपितु भ्रान्तिकल्पित इति चोद्यपरिहारौ स्याताम् उत्पत्त्यादिकार्य
सत्त्वादिगुणयुक्ताः परिपूर्णमेकमेवाद्वितीयं ब्रह्मेति सत्त्वादिगुणरहितस्य परिपूर्णस्यैकमेवाद्वितीयस्य कथं सर्गादिकर्तृत्व
मभ्युपगम्यत इति चोद्ये स्वगतसकलविसजातीयस्य ब्रह्मणो यथोदितस्वभावस्य जलादिविसजातीयस्याग्न्यादेरौष्ण्यादिशक्ति
योगवत्सर्वशक्तियोगो न विरुध्यत इति परिहारः परमार्थस्त्वमेवैक इत्याद्यपि न कृत्स्नस्यापारमार्थ्यं वक्ति अपितु कृत्स्नस्य तदात्मक
तया तद्व्यतिरेकेणावस्थितस्यापारमार्थ्यं तदेवोपपादयति तवैष महिमा येन व्याप्तमेतच्चराचरमिति येन त्वयेदं चराचरं व्याप्तं अतस्त्व
दात्मकमेवेदं सर्वमिति त्वदन्यः कोऽपि नास्ति अतः सर्वात्मकत्वात्त्वमेवैकः परमार्थः भूतस्त्वम् अतस्तवैष महिमा यत्सर्वव्याप्तिरिति ॥
अन्यथा तवैव भ्रान्तिरिति वक्तव्ये जगतः पतेस्त्वमित्यादिना परतत्त्वलक्षणं च स्यात् लीलया महीमुद्धरतो भगवतो महावराहस्य स्तुतिप्रक
रणविरोधश्च यतः कृत्स्नजगज्ज्ञानात्मना त्वयात्मतया व्याप्तत्वेन तद्रूपं तस्मात्त्वदात्मकत्वानुभवसाधकयोगविरहिणस्तत्केवलं देवमनु
ष्यादिरूपमिति भ्रान्तिज्ञानेन पश्यन्तीत्याह यदेतद्दृश्यत इति न केवलं वस्तुतस्त्वदात्मकं जगत् देवमनुष्याद्यात्मकमिति दर्शनमेव भ्रमः ज्ञानी

यदेतद्दृश्यते मूर्तमेतज्ज्ञानात्मनस्तव भ्रांतिज्ञानेन पश्यंति जगद्रूपमयोगिनः २

21

नादिनिखिलदोषगंधस्य समस्तकल्याणगुणात्मकस्य महाविभूतेः प्रतिपन्नत्वात् तस्य भ्रान्तिदर्शनासंभवात् सामानाधिकरण्ये
नैक्यप्रतिपादनं च बाधासहमविरुद्धं चेष्यते न तत्र भेदोपपादकविषये अतोऽयमपि श्लोको नार्थस्वरूपस्य बाधकः तथा यतो वा
इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति जगज्जन्मादिकारणं ब्रह्मेत्यवसिते सति
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यतीति शास्त्रेणास्यार्थस्येतिहासपुराणाभ्यामुपबृं
हणं कार्यमिति ज्ञायते उपबृंहणं नाम विदितसकलवेदतदर्थानां स्वयोगमहिमसाक्षात्कृतवेदतत्त्वार्थानां वाक्यैः स्वावगतवेद
वाक्यार्थव्यक्तीकरणं सकलशाखानुगतस्य वाक्यार्थस्याल्पभागश्रवणाद्दुरवगमत्वेन तेन विना निश्चयायोगात् उपबृंहणं हि का
र्यमेव तत्र पुलस्त्यवसिष्ठवरप्रदानलब्धपरदेवतापारमार्थ्यज्ञानवतो भगवतः पराशरात्स्वावगतवेदार्थोपबृंहणमिच्छन् मैत्रेयः प
रिपप्रच्छ सोऽहमिच्छामि धर्मज्ञ श्रोतुं त्वत्तो यथा जगत् बभूव भूयश्च यथा महाभाग भविष्यति यन्मयं च जगद्ब्रह्मन् यतश्चैतच्चराचरं
लीनमासीद्यथा यत्र लयमेष्यति यत्र च इत्यादिना तत्र ब्रह्मस्वरूपविशेषतद्विभूतिभेदप्रकारतदाराधनस्वरूपफलविशेषाः प्र
ष्टाः ब्रह्मस्वरूपविशेषप्रश्ने तु यतश्चैतच्चराचरमिति निमित्तोपादानयोः पृष्टत्वात् यन्मयं चेत्यनेन सृष्टिस्थितिलयकर्म
भूतं जगत्किमात्मकमिति पृष्टं तस्य चोत्तरं जगच्च स इति इदं च तादात्म्यमन्तर्यामिरूपेणात्मतया व्याप्तिकृतं ननु व्याप्यव्याप
कयोर्भेदेऽपि कृतं यन्मयमिति प्रश्नस्योत्तरत्वाज्जगच्च स इति सामानाधिकरण्यस्य यन्मयमिति मयडत्र न विकारार्थः पृथक्
प्रश्नवैयर्थ्यात् नापि प्राणमयादिवत् स्वार्थिकः जगच्च स इत्युत्तरानुपपत्तेः तथा हि विष्णुरेव त्वत्तः समभविष्यत् अतः प्राचुर्या
र्थ एव तत्प्रकृतवचने मयडिति मयट् कृत्स्नं च जगत्तच्छरीरतया तत्प्रचुरमेव तस्माद्यन्मयमित्यस्य प्रतिवचनं जगच्च स इति सामानाधि
करण्यं जगद्ब्रह्मणोः शरीरात्मभावनिबंधनमिति निश्चीयते अतो यथा निर्विशेषवस्तुप्रतिपादनपरे शास्त्रेऽभ्युपगम्यमाने सर्वाण्येता
नि प्रश्नप्रतिवचनानि न संगच्छन्ते तथा हि सति प्रपञ्चभ्रमस्य किमधिष्ठानमित्येवंरूपस्यैक

हि २

४२

योऽयं देही अयमयोऽयोजीवतस्य विद्यात्मकानंदं यन्मम मातृरूपत्वेनासंभवात्

पुनरासक्तो यावत्समानेऽहं संपरिष्वज्य ज्ञाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति ऋतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ प
रमे परार्द्धे छायातपौ ब्रह्मविदो वदंति पंचाग्नयो ये च त्रिणाचिकेताः अनयोः अविद्यः शास्त्रज्ञमानी सर्वो मे स्याद्याः अस्मिन्नपि घ्नात्मे
न संसर्वं भवति प्रकृतिविकारानुगुणादिदेहांश्च मुनेरतीतः अतीत सर्वावरणो विलीनात्तेन भूतं यद्भुवनं तमाले समस्तकल्याणगु
णात्मकोऽसौ परः परात्परो यः सकलान्यत्रलक्ष्यादयः स इति परावरेशः अविद्याकर्मसंज्ञान्यातृतीयाशक्तिरिष्यते यया सा क्षेत्रज्ञशक्तिः साव
ष्टितानपसर्वगेति भेदव्यपदेशात् उभयेऽपि हि भेदेनैनमभिधीयते भेदव्यपदेशाच्चान्यः अधिकं तु भेदनिर्देशात् इत्यादिसूत्रैश्च प्र
आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृत
इत्यादिभिरुभयोरन्योन्यप्रत्यनीकाकारेण स्वरूपनिरूपणात् नापि साधनानुष्ठानेन निर्मुक्ताविद्यस्य परेण स्वरूपैक्यसंभवः अवि
द्याश्रयत्वयोग्यस्य तदनर्हत्वासंभवात् यथोक्तं परमात्मात्मनोर्योगः परमार्थ इतीष्यते मिथ्यैतदन्यद्द्रव्यं हि नैति तदद्रव्यतां यतः इति
मुक्तस्य तु तद्धर्मतापत्तिरेवेति भगवतीतासूक्तं इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः सर्गेऽपि नोपजायंते प्रलये न व्यथंति चेति इत्यादि
आत्मभावं नयत्येनं तद्ब्रह्मध्यायिनं मुने विकार्यमात्मनः शक्त्या लोहमाकर्षको यथेति आत्मभावमात्मनः स्वभावं न ह्यात्मैक स्वरूपापत्ति
रूक्षमाणस्य वेदयतिच जगद्व्यापारवर्ज्यं प्रकरणादसन्निहितत्वाच्च भोगमात्रसाम्यलिंगाच्च मुक्तोपसृप्यव्यपदेशाच्चेति इति च ज
गद्व्यापारवर्जं समानो ज्योतिषेति द्विविधः ... देवतासायुज्याच्छरीरस्यापि देवतावत् सर्वार्थसिद्धिः स्यादिति यदा
त्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामान् तेषां सर्वेषु लोकेषु कामचारो भवति ब्रह्मविदाप्नोति परं सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चि
तेति एतमानंदमयमात्मानमुपसंक्रम्य इमांल्लोकान्कामान्नी कामरूप्यनुसंचरन् स तत्र पर्येति रसो वै सः रसं ह्येवायं लब्ध्वानंदी भ
वति यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यं तथा विद्वान्पुण्यपा
पे विधूय निरंजनः परमं साम्यमुपैतीत्याद्याः परविद्यासु सर्वासु सगुणमेव परं ब्रह्मोपास्यं फलं चैकरूपमेव अतो विद्याविकल्प इति सू
त्रकारेणैवानंदादयः प्रधानस्य विकल्पो विशिष्टफलत्वादित्यादिसूत्रैः यावत्कामं तु समुच्चयो वा सगुणोपास्यत्वं विद्याविकल्पश्चोक्तः प्रकृत
मुलाकोपासनेति तिभाष्ये कृता व्याख्या तच्च यथा विपश्चितेत्यादिना ब्रह्म वेद ब्रह्मैव भवतीत्यत्रापि नामरूपाद्विमुक्तः परात्परं पुरुषमु

तस्मात्तत्परदेहेषु सतो व्यक्मयेन्द्रिय ... नास्मि ... यो सो ... येनुज्ञानदिदं शुद्धचेतसस्तेऽखिलं जगत् ... प्रपश्यंति तद्रूपं परेश्वर = २ यद्यन्योस्ति परः कोपि मत्तः पार्थिवसत्तम तदेषो हमयं चान्योव...

...विभेदेन भेदः षड्गादिसंज्ञितः अभेदव्यापि नो ... परमात्मनः = ११ ... वादिनः ४ = ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः अर्थस्वरूपं पश्यंतो भ्राम्यंते मोहसंप्लवे = १ ... दृश्यते = ८

कारणात्मात्मनां देवमनुष्यादिमूर्तीनामात्मत्वदर्शनमपि भ्रमः इत्याह ज्ञानस्वरूपमखिलमिति येतु नर्बुद्धिमंतो ज्ञानस्वरूपात्मविदः सर्वस्य भ
गवदात्मकत्वानुभवसाधनयोगयोग्यपरिशुद्धमनसस्ते देवमनुष्यादिप्रकृतिपरिणामविशेषशरीररूपमखिलं जगत्स्वशरीरा
तिरिक्तज्ञानस्वरूपात्मकत्वेन शरीरं च पश्यंतीत्याह येतु ज्ञानविद इति अन्यथा श्लोकानां पौनरुक्त्यं पूर्वान्तरलोके विरोधः प्र
करणविरोधः शास्त्रतात्पर्यविरोधश्च तस्मात्परदेहेषु सतो व्यक्मयेत्यस्य तु सर्वं ह्यात्मसु ज्ञानैकाकारतया समानेषु सत्सु
देवमनुष्यादिप्रकृतिपरिणामविशेषरूपपिंडसंसर्गकृतमात्मसु देवाद्याकारेण द्वैतदर्शनं मतं तथ्यमित्युच्यते पिंडगतमात्मगतम
पि द्वैतं न प्रतिषिध्यते देवमनुष्यादिविविधविचित्रपिंडेषु वर्तमानेष्वात्मवस्तु सममित्यर्थः यथोक्तं भगवता शुनि चैव श्वपाके
च पंडिताः समदर्शिनः निर्दोषं हि समं ब्रह्मेत्यादिषु तस्मात्परदेहेषु सतोपि नित्यदेहातिरिक्ते वस्तुनि स्वपरविभागस्याकृतत्वात् यद्यन्यो
स्ति परः कोपीत्यत्रापि नात्मैक्यं प्रतीयते यदि मत्तः परः कोप्यन्यः स्यादेकस्मिन्नर्थे परश्चान्यश्चेत्युभयोः प्रयोगायोगात् तत्परशब्द
स्य व्यतिरिक्तात्मवचनः अन्यशब्दः तस्यापि ज्ञानैकाकारत्वेन सत्त्वादन्याकारत्वप्रतिषेधार्थः एतदुक्तं भवति यदि मद्व्यतिरिक्तः
कोप्यात्मा मदाकारभूतज्ञानैकाकारादन्याकारोस्ति तदा हमेवमाकार स्वयं चान्याकार इति शक्यते व्यपदेष्टुं नत्वेवमस्ति सर्वेषां ज्ञा
नैकाकारत्वेन समानत्वादेवेति वेणुरन्ध्रविभेदेन तीव्रत्राप्याकारवैषम्यमात्मनां न स्वरूपे कल्पम् अपि त्वाकारसाम्यमेव तेषां वायुवे
नैकाकाराणां रंध्रभेदनिष्क्रमणकृतो हि षड्जादिसंज्ञाभेद एवमात्मनां देवादिसंज्ञाभेदस्तेजसाप्यपार्थिवद्रव्यांशभूतानां पदार्था
नां तत्तद्दृश्यते केवलमेव न स्वस्वरूपे कल्प तथा मापवीयानामेषामपि स्वरूपभेदो नैव जीवः सो हमस्ववृत्ते मितिस्वधीस्मनापूर्वोक्तज्ञानाकारत
द्रूपेण परामृश्यत स्मामानाधिकरण्येनाहंत्वमित्यादीनामर्थानां ज्ञानमेवाकार इत्युपलक्ष्य तद्देवाद्याकारमेदेनात्मसु भेदमोहं परित्यजेत
इ अन्यथा देहव्यतिरिक्तोपदेशस्वस्वरूपे हस्तं सर्वमेतदात्मस्वरूपमिति भेदनिर्देशोनपपद्यते अहंत्वमादिशब्दानामुपलक्षितेषु सर्वमेतदात्मस्वरूप
मित्यनेन सामानाधिकरण्यादुपलक्षणत्वमपि न संगच्छते सोपि यथोपदेशमवबोधितमित्याह तस्माज्जभेदं परमार्थदृष्टिरिति कृतकृत्यनिर्णि
कं इति चेत् देहात्मविवेकविषयत्वादुपदेशस्य तस्य विंडः पृथग्यतः पुंसः शिरः पाण्यादिलक्षणः इति प्रक्रमात् भेदजनके ज्ञानेऽस्मिन्नात्मस्वरू... वि
भेदपरं नाविज्ञायपरम आत्मस्वरूपैक्यमनयोः प्रतिपादिते परात्मस्वरूपैक्यं च नास्त्यनिर्दिष्टमेव न संभवति तथा चैकत्वं इदं स्पष्टं

= विभेदजनके ज्ञाने नाशमात्यंतिकं गते आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यति २ स्वरूपकृतमपि तु देवादिपिंडप्रवेशकृतमित्युपदिश्यते नात्मैक्यं ... ते चा...

करं प्रवर्तितानावधानेन ... इति

मी
२३

23

तेषु

अविद्या

शब्दोपात्तपर्यन्तवचनः एतः सर्वेषामप्यात्मानतः सर्वेषां तच्छरीरतयाप्युपगतस्यात्मनः प्रतिषिध्यते नेत्यादिति विनाशस्यादि
ति। भगवद्विभूत्युपसंहारप्रायमिति तच्चैवाभ्युपगन्तव्यं ततः इदमुच्यते यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा तत्तदेवावग
च्छ त्वं मम तेजोंऽशसंभवं विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति अतः शास्त्रेण न निर्विशेषवस्तुप्रतिपादनमस्ति।
नाप्यर्थजातस्य मिथ्यात्वप्रतिपादनं नापि चिदचिदीश्वराणां स्वरूपभेदनिषेधः यदप्युच्यते निर्विशेषस्वयंप्रकाशमात्रं निर्दोष
परिकल्पितमविद्याशबलितं व्याप्यमानं तद्विकल्पं सर्वं जगत् दोषश्च स्वरूपतिरोधानं विविधविचित्रविक्षेपकरी सदसदनिर्वचनीया
नाद्यविद्याशाश्वतावश्याभ्युपगमनीया अनृतेन हि प्रत्यूढा इत्यादिभिः श्रुतिभिर्वचनैः तत्त्वमस्यादिवाक्यसामानाधिकर
ण्यावगतजीवैक्यानुपपत्त्या च सा नु न सती भ्रान्तिबाधयोरयोगात् नाप्यसती भ्रान्तिबाधयोरयोगात् अतः कोटिद्वयवि
निर्मुक्तेयमविद्येति तत्त्वविद इति तदयुक्तं सा हि किमाश्रित्य भ्रमं जनयतीति [illegible] न तावज्जीव आश्रयः अविद्यापरिकल्पि
तत्वाज्जीवभावस्य नापि ब्रह्माश्रितत्वं स्वयंप्रकाशज्ञानरूपत्वेनाविद्याविरोधित्वात् सा हि ज्ञानबाध्याभिमता ज्ञानरूपं
परं ब्रह्म तन्निवर्त्यमप्यात्मकं अज्ञाने चेत्तिरस्कृतिः प्रभुः तन्निवर्तने ज्ञानं ब्रह्मेति चेत् ज्ञानमज्ञानस्य निवर्तकं ब्रह्मैव न तत्स्व
प्रकाशान्तरदपि यन्निवर्तकं ज्ञानं ब्रह्मेति विज्ञानमस्ति चेत्स्यादन्यता ब्रह्मणो ननु भतिरत्वनुपत्येव प्रसज्यते ज्ञानस्वरूपं ब्रह्मेति
ज्ञानं तत्त्वाग्राहि [illegible] बाधकं न स्वरूपभूतं ज्ञानमिति चेन्न उभयोरपि ब्रह्मस्वरूपप्रकाशत्वाविशेषादेकस्याविरोधित्वमन्य
तरस्येति विशेषानवगमात् एतदुक्तं भवति ज्ञानस्वरूपं ब्रह्मेत्यनेन ज्ञानेन ब्रह्मणि यः स्वभावोऽवगम्यते स ब्रह्मणः स्व
यंप्रकाशत्वेन स्वयमेव प्रकाशते अतस्तद्विरोधित्वेन कश्चिद्विशेषः स्वरूपतद्विषयज्ञानयोरिति किंच अनुभवस्वरूपस्य
ब्रह्मणोऽनुभवान्तरानुभाव्यत्वेन भवतो न तद्विषयज्ञानमस्ति अतो ज्ञानमज्ञानविरोधि चेत्स्वयमेव विरोधि संभवतीति ना
स्याब्रह्माश्रयत्वसंभवः शुक्त्यादयस्तु स्वयमप्रकाशमर्थाः स्वज्ञानाविरोधिनस्तन्निवर्तकज्ञानान्तर
मपेक्षन्ते ब्रह्म तु स्वानुभवसिद्धं [illegible] ज्ञानविरोधि ततः एव निवर्तकज्ञानान्तरं च नापेक्षते अपोह्य तदतिरिक्त
स्य मिथ्यात्वज्ञानमज्ञानविरोधीति [illegible] ब्रह्मयाथात्म्यज्ञानविरोधि उक्तप्रपंचसमस्तस्य

यैति दिव्यं निरंजनः परमं साम्यमुपैति परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इत्यादि श्रुत्यैकार्थ्यात् प्राकृतनामरूपा
भ्यां विनिर्मुक्तस्य निरस्ततत्कृतभेदस्य ज्ञानैकाकारतया ब्रह्मप्रकारतोच्यते प्रकारैक्ये च तत्त्वव्यवहारो मुख्य एव यथा सोयं गौ
रिति ग्रन्थोपि विज्ञाने प्रापकं प्राप्यं परब्रह्मेति पार्थिव प्रापणीयस्तत्त्वेनात्मा ब्रह्मीणोऽघभावन इति परब्रह्मध्यानात्मापर
ब्रह्मेवत ब्रह्मीणो घघभावनः कर्मभावनाब्रह्मभावनोभयभावनेति भावनात्रयपरिहतः प्रापणीयः त्यमिभाय हेत्वन्तःकरणेना
नेकरणं तस्य वै द्विज निष्पाद्य मुक्तिकार्यं वै कृतकृत्यो निवर्तयेदिति करणस्य परब्रह्मध्यानरूपस्य ब्रह्मीणो घघभावनानामस्वरू
प प्राप्तात्कृतकृत्यत्वेन निवृत्तिवचना घ्यातसिद्धनुष्ठेयमित्युक्तो तद्भावभावमापन्नस्तदासौ परमात्मनाभवत्यभेदी भेद
ज्ञतस्याज्ञानकृतो भवेदिति मुक्तस्य स्वरूपमाह तद्भावो ब्रह्मणो भावः स्वभावः न स्वरूपैक्यं तद्भावभावमापन्नः इति द्वितीयभा
वशब्दानन्वयात् पूर्वोक्तार्थविरोधाच्च यद्वा ब्रह्मणः ब्रह्मीणो घघभावनत्वे तदापत्तिः तद्भावभावापत्तिः यदैवमापन्नः तदायं पर
मात्मनाऽभेदी भवति भेदरहितो भवति ज्ञानैकाकारतया परमात्मनैकप्रकारस्यास्य तदभावे देवादिरूपः तदन्यथा स्वकर्मकृत
ज्ञानमूलः न स्वरूपकृतः सतु देवादिभेदः परब्रह्मध्यानेन मूलभूताज्ञानरूपे कर्मणि विनष्टे देवभावान्निवर्तते इत्यभेदी
भवति यथोक्तं एकस्वरूपभेदस्तु बाह्यकर्मप्रवृत्तिजः देवादिभेदे विध्वस्ते नास्त्येवावरणो हि सः इति एतदेव विवृणोति विभेदज
नके ज्ञाने नाशमात्यंतिकं गते आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यतीति विविधो भेदो विभेदः देवतिर्यङ्मनुष्यस्थावरात्मकः
यथोक्तं शौनकेनापि चतुर्विधोपि भेदोयं मिथ्याज्ञाननिबंधनः इति आत्मनि ज्ञानस्वरूपे देवादिरूपविविधभेदहेतुभूते कर्म
ख्यात्मा ने परब्रह्मध्यानेन नात्यंतिकनाशं गते सति हेत्वभावान्नरं परमात्मकलणः आत्मनो देवादिरूपं भेदं कः करिष्यतीत्यर्थः प्र
विद्याकर्मसंज्ञान्यत्रैवोक्तैस्तैर्नावृत्तिमात्रविदितत्वात् नानर्थाभिरूपेणाः सर्वोप्यात्मतयोक्तविधानं अन्यथा स्वरः सर्वात्मभूता
निरूपणोत्थ उच्यते उत्तमपुरुषस्त्वन्यः परमात्मेत्युदाहृत इत्यादि निर्विशेषः अन्तर्यामिरूपेण सर्वभूतात्मत्वं तेनैव भगवतामिहितं ईश्वरः सर्व
भूतानां हृद्देशेऽर्जुन तिष्ठति सर्वस्य चाहं हृदि सन्निविष्ट इति अहमात्मा गुडाकेश सर्वभूताशयस्थित इति च तदेवोत्तरभूत

र

साक्षिज्ञानप्रागभावोऽहि [illegible]मभावः ८

भावरूपमज्ञानं

ज्ञाननिवर्त्यज्ञानप्रागभावातिरेके तु भावरूपमेवं किंचिद्वस्तु प्रत्यक्षानुमानाभ्यां प्रतीयते तदुपहितप्रत्ययोपादा
नत्वाद्विकारस्य प्रकाशचिन्मात्रावष्टब्धेनैव तिरोहितस्वरूपे प्रत्यगात्मनि अहंकारज्ञानज्ञेयविभागरूपो ध्या
सः तस्यैवावस्थाविशेषेणाध्यासरूपेण जगति ज्ञानबाध्यस्य शुक्तिरजतादिवस्तुनो ज्ञानस्यैवाध्यासो विज्ञायते फलस्य
स्य मिथ्यात्वस्य तदुपादानत्वं च मिथ्या मिथ्याभूतस्यार्थस्य मिथ्याभूतमेव कारणं भवितुमर्हतीति हेतुबला
दवगम्यते कारणं ज्ञानविषयप्रत्यक्षता वस्तुमत्रतामामन्यं च तज्ज्ञानानामीष्यपरोक्षावभासः; अयं तु न ज्ञानप्रागभा
वविषयः साक्षिविषयप्रमाणगोचरः अयं त्वं हेतुरेति विवदपरोक्षः; अभावस्य प्रत्यक्षत्वाभ्युपगमेऽप्ययमनुभवो
नात्मनि ज्ञानाभावविषयः अनुभववेलायामपि ज्ञानस्य विद्यमानत्वात् विद्यमानत्वे ज्ञानाभावप्रतीतेरनुपप
त्तेश्च एतदुक्तं भवति अहमज्ञ इत्यस्मिन्ननुभवे अहमित्यात्मनोऽभावधर्मितया ज्ञानस्य च प्रतियोगितया वग
तिरस्तित्वाज्ज्ञानवान् अस्ति चेद्विरोधादेव ज्ञानाभावानुभवसंभवः नो चेद्धर्मिप्रतियोगिज्ञानसव्यपेक्षज्ञा
नाभावानुभवस्तु नतरां न संभवति ज्ञानाभावस्यानुमेयत्वे भावाख्यप्रमाणविषयत्वेऽप्ययमनुपपत्तिः समा
नस्यात् ज्ञानस्याभावरूपत्वे धर्मिप्रतियोगिज्ञानसद्भावेऽपि विरोधाभावादयमनुभवो भावरूपाज्ञानविषय एवा
भ्युपगन्तव्य इति ननु च भावरूपमज्ञानं वस्तुयाथात्म्यावभासरूपेण साक्षिचैतन्येन विरुध्यते मैवं साक्षिचैतन्य
न वस्तुयाथात्म्यविषयं अपि तु ज्ञानविषयं अन्यथा मिथ्यार्थावभासानुपपत्तेः न हि ज्ञानविषयेण ज्ञानेन ज्ञाना
नं निवर्त्यते इति न विरोधः ननु चेद्भावरूपमज्ञानं विलयविशेषज्ञानं तमेव साक्षिचैतन्यस्य विषयो भवति स
विषयः प्रमाणाधीनसिद्धिरिति कथमिव साक्षिचैतन्येनानावृतत्वेन अस्मज्ज्ञानं विषयीक्रियते नैष दोषः सर्वमेव
वस्तुजातं ज्ञाततया अज्ञाततया वा साक्षिचैतन्यस्य विषय एव तत्र अज्ञातत्वेन ज्ञाततयाऽज्ञातत्वं तदेव प्रमाणान्यवधाना

c 24

अत्र स्वरूपाज्ञानमिति २

पात्मना विरोधीति विवेचनीयं नतावद्ब्रह्मसत्ययाथात्म्यज्ञानं विरोधि प्रपञ्चविषयत्वात् ज्ञानाज्ञानयोरेकविषयत्वे हि विरोधः
प्रपञ्चमिथ्यात्वज्ञानेन सत्यत्वरूपाज्ञानं न विरुध्यते तेन प्रपञ्चसत्यत्वरूपाज्ञानमेव बाध्यते नान्यदिति ब्रह्मस्वरूपाज्ञानेनाम
तिष्ठत्येव ब्रह्मस्वरूपाज्ञानेनामनस्य द्वितीयत्वज्ञानमेव वस्तुतस्तु तिरिक्तस्य मिथ्यात्वज्ञानेन निवर्तते स्वरूपेणत्वानुभवसि
द्धमिति चेत् न ब्रह्मणोऽद्वितीयत्वस्वरूपस्यानुभवसिद्धमिति तन्निवृत्तेर्विरोधिसद्वितीयत्वरूपाज्ञानेन बाधसम्भवात् तां अद्वितीय
त्वं धर्मः इति चेन्नानुभवरूपस्य ब्रह्मणोऽनुभाव्यधर्मविरहस्य भवतैवोपपादितत्वात् अतोऽज्ञानरूपस्य ब्रह्मणो विरोधाद्
॥ वनानाऽत्र पक्षे किं अविद्यायाः प्रकाशैकरूपब्रह्मणि तिरोहितमिति वदतां स्वरूपनाशः एवोक्तः स्यात् प्रकाशतिरोधानं नाम
प्रकाशोत्पत्तिप्रतिबन्धो विद्यमानस्य विनाशो वा प्रकाशस्यानुत्पाद्यत्वाभ्युपगमेन प्रकाशतिरोधाने प्रकाश एव अपि च नाश ॥
र्विषयानिराश्रयाः स्वप्रकाशोपलब्धिः स्वाश्रयदोषवशादनेनाश्रयमनेन तद्विषयमात्मानमनुभवतीत्यत्र किमयं स्वाश्र
यदोषः परमार्थभूतः उतापरमार्थभूत इति विवेचनीयं न तावत्परमार्थः अनभ्युपगमात् नाप्यपरमार्थः तथात्वे स
ति द्रष्टृत्वेन दृश्यत्वेन वा दृष्टित्वेन वाऽभ्युपगमनीयः नतावत् दृष्टिः दृष्टिस्वरूपभेदानभ्युपगमात् प्रमाणविषयत्वान्न भूता
यावत्सादृश्यात् दृष्टेर्मिथ्यामिकल्पप्रसङ्गेनापारमार्थ्यानभ्युपगमाच्च द्रष्टृदृश्ययोस्तत्त्ववद्विज्ञानायाः [illegible] कल्पनिकत्वेन
मूलदोषान्तरापेक्षयाऽनवस्था स्यात् अथ तन्मूलविशेषं यापरमार्थास्पदमनुभूतिरेव ब्रह्मस्वरूपो दोष इति चेत् ब्रह्मैव चेद्दो
षः प्रपञ्चदर्शनस्यैव तन्मूलत्वं स्यात् किं प्रपञ्चतुल्याविद्याकल्पनेन ब्रह्मणो दोषत्वेऽपि तस्य नित्यत्वेनानिर्मोक्षप्रस
ङ्गः अतो मायावादिनस्तत्तादृशपारमार्थिकदोषानभ्युपगमः नतावज्ज्ञानिरूपणादिना भवति अनिर्वचनीयत्वं च किमभिप्रेतं सदसद्वि
लक्षणत्वमिति चेत् तथाविधस्य वस्तुनः प्रमाणाभावात् [illegible] नानिर्वचनीयत्वं स्यात् एतत्तु न भवति सर्वं हि वस्तुजातं प्रतीतिव्यव॥
स्थापनं सती च प्रतीतिः सदसदाकारा सदसदाकाराः प्रतीतिः सदसद्विलक्षणविषयाऽभ्युपगमस्यासम्भवात् [illegible] सर्वप्रतीतेर्विषयः स्यादि
ति [illegible] स्वरूपविशेषाभासकं [illegible] सदसदनिर्वचनीयमविद्याज्ञानादिपदवाच्यं वस्तु वाच्यं स्या

ब्रह्मणोऽज्ञानानुभव अयं न संभवतीति ज्ञानानुभवस्वरूपत्वात् ज्ञानानुभवस्वरूपमपि तिरोहितस्य स्वरूपमज्ञानमनुभ
वतीति चेत् किमिदं तिरोहितस्य स्वरूपत्वं अप्रकाशितस्य स्वरूपमिति चेत् ज्ञानानुभवस्वरूपस्य कथमप्रकाशित
स्वरूपत्वं ज्ञानानुभवस्वरूपस्याप्यन्यतोऽप्रकाशितस्वरूपत्वमापद्यत इति चेत् एवं तर्हि प्रकाशाख्यधर्मानभ्युप
गमेन प्रकाशस्यैव स्वरूपत्वाद्न्यतः स्वरूपनाशः स्यादिति पूर्वमेवोक्तं किंच ब्रह्मस्वरूपतिरोधानहेतुभूतमेतद
ज्ञानं स्वयमनुभूतं सत् ब्रह्म तिरस्करोति ब्रह्म तिरस्कृत्य स्वयं तदनुभवविषयो भवतीत्यन्योन्याश्रयत्वं अनुभू
तमेव तिरस्करोतीति चेत् यद्यतिरोहितस्वरूपमेव ब्रह्माज्ञानमनुभवतीति तिरोधानकल्पना निष्प्रयोजना
स्यात् अज्ञानस्वरूपकल्पना च ब्रह्मणोऽज्ञानदर्शनवद् ज्ञानकार्यतयाभिमतप्रपञ्चदर्शनस्यैव संभवात् किंच
ब्रह्मणोऽज्ञानानुभवः किं स्वतो वान्यतो नाद्यः तदुक्तेऽज्ञानानुभवस्य स्वरूपप्रयुक्तत्वे नानिर्मोक्षः स्यात् अनुभूति
स्वरूपस्य ब्रह्मणोऽज्ञानानुभवस्वरूपत्वेन मिथ्यारजतबाधकज्ञानेन रजतानुभवस्यापि निवृत्तिवन्निवर्त
कज्ञानेना[illegible]नुभूतिरूपब्रह्मस्वरूपानिवृत्तिर्वा अन्यतश्चेत् किंच तदन्यत् अज्ञानान्तरमिति चेत् अनवस्थाऽस्या
त् ब्रह्म तिरस्कृत्यैव स्वयमनुभवविषयो भवतीति चेत् तथा सतीदमज्ञानं कार्यादिवत् स्वसत्तया ब्रह्म तिरस्करोतीति ज्ञान
बाध्यत्वमज्ञानस्य न स्यात् अपि चेदमज्ञानं स्वयमनादि ब्रह्मणः स्वसाक्षित्वं ब्रह्मस्वरूपतिरस्कृतिं च युगपदेव क
रोति अतो नानवस्थादयः दोषा इति चेन्न स्वानुभवस्वरूपस्य ब्रह्मणः स्वरूपतिरस्कृतिमन्तरेण साक्षित्वापाद
नायोगात् हेत्वन्तरेण तिरस्कृतमिति चेत् तर्हि तस्यानादित्वमपार्थं अनवस्था च पूर्वोक्ता अतिरस्कृतस्वरूप
स्यैव साक्षित्वापादने ब्रह्मणः स्वानुभवैकतानत्वं न स्यात् अपि चाविद्यया ब्रह्मणि तिरोहिते तद्ब्रह्म न किञ्चिदपि प्र
काशते उत किञ्चित् प्रकाशते पूर्वस्मिन् कल्पे प्रकाशमात्रस्वरूपस्य ब्रह्मणोऽप्रकाशे तुच्छतापत्तिरसकृदुक्ता॥
उत्तरस्मिन् कल्पे किञ्चिदानन्दैकरसे ब्रह्मणि कोऽयमंशः तिरस्क्रियते को वा प्रकाशते निरंशे निर्विशेषप्रकाश

25

पेक्षा । अज्ञानस्यैव तु प्रत्यगवस्तुनः स्वार्थसिद्धौ अज्ञानप्रमाणापेक्षेति नापेक्षा स्वदेशाज्ञानव्यावर्त्तकत्वेनावभासोऽप्युच्य
ते तस्मादन्यथा पूर्वं हि तेन प्रत्यक्षेण भावरूपमेवाज्ञानं प्रतीयते तदिदं भावरूपमज्ञानमनुमानेनापि सिद्ध्य
ति विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं
अप्रकाशितार्थप्रकाशकत्वात् अंधकारे प्रथमोत्पन्नप्रदीपप्रभावदिति आलोकाभावमात्रं वा रूपदर्शनाभाव
मात्रं वा तमोऽस्तु तत्कथं भावरूपाज्ञानसाधने निदर्शनं योपपन्नमेतदिति चेत् उच्यते बहुलत्वविरलत्वाद्यवस्था
योगेन रूपवत्तया चोपलब्धेर्द्रव्यान्तरमेव तमः इति निरवद्यमिति अत्रोच्यते अस्मन्मते नामसत्त्वं चेन्न ज्ञानाभावत्वोपपत्ति
सहितेन केवलेन च प्रत्यक्षेणानभावरूपमज्ञानं प्रतीयते यत्तु ज्ञानप्रागभावविषयत्वे विरोध उक्तः स हि भावरूपाज्ञा
नेऽपि तुल्यः विषयत्वेनाश्रयत्वेन चाज्ञानस्य व्यावर्त्तकतयाऽपेक्ष्यमाणोऽर्थः प्रतिपन्नोऽप्रतिपन्नो वा प्रतिपन्नश्चेत्तत्
स्वरूपज्ञानं निवर्त्येत तदज्ञानं तस्मिन्प्रतिपन्ने कथमवतिष्ठति अप्रतिपन्नश्चेत् व्यावर्त्तकाश्रयविषयज्ञान
स्वरूपमज्ञानं कथमनुभूयेत अथ विशदस्वरूपावभासोऽज्ञानविरोधी अविशदस्वरूपेण तु प्रतीयतेऽस्याश्रयवि
षयज्ञाने सत्यपि नाज्ञानानुभवविरोध इति हन्त तर्हि ज्ञानप्रागभावोऽपि विशदस्वरूपविषयः आश्रयप्रतियोगि
ज्ञाने त्वविशदस्वरूपविषयमिति न कश्चिद्विशेषः अस्मदभिनिवेशात् भावरूपस्याज्ञानस्यापि ज्ञानमिति
सिध्यतः प्रागभाववत् क्रियाविषयापेक्षत्वमस्त्येव तथाहि अज्ञानमिति ज्ञानाभावः तदन्यः तद्विरोधि वा त्रयाणाम
पि तत्स्वरूपज्ञानापेक्षत्वमवश्यमाश्रयणीयं यद्यपि तमसः स्वरूपप्रतिपत्तौ प्रकाशापेक्षा न विद्यते तथापि प्रकाशविरोधी
स्वेनाकारेण प्रतिपत्तौ प्रकाशप्रतिपत्त्यपेक्षा स्यात् भवदभिमतं त्वज्ञानं न कदाचित्स्वरूपेणावसिध्यति अपि त्वज्ञान
सिद्धैव तथा सति ज्ञानाभावतदन्यतद्विरोधित्वसमानं [illegible] ज्ञानप्रागभाववस्तु मतेनाप्युपगम्यते प्रतीयते चेदुभयत्राप्यवि
ते ज्ञानप्रागभावस्य अप्रसिद्धो [illegible] नामानुपपत्तिः [illegible] इति निश्चितमुक्तस्वप्रकाशचैतन्यैकस्वरूपस्य

भावरूपा
ज्ञानं

ज्ञानस्य स
स्वधीना।

ज्ञानाद्व्यतिरिक्तं किंचिद् ५

विवादाध्यासितमज्ञानं ज्ञानावरणं अज्ञानत्वाच्छुक्तिकाद्यज्ञानवत् विषयावरणं हि तत् त्रुटि ८
प्रतिकूलाः प्रयोगाः सत्प्रतिपक्षाः इति यावत् ७

इन्द्रियाणां ज्ञानोत्पत्तिहेतुत्वमेव न प्रकाशकत्वं प्रदीपप्रभायास्तु चक्षुरिन्द्रियस्य ज्ञानमुत्पादयतो विरोधितमोनिर
सनद्वारेणोपकारकत्वमात्रमेव प्रकाशकत्वं ज्ञानोत्पत्तौ व्याप्रियमाणचक्षुरिन्द्रियोपकारकत्वमपेक्ष्य दीपस्य प्रका
शकत्वव्यवहारः। अस्माभिस्तु न तस्य प्रकाशकत्वाभ्युपगमेन दीपप्रभा निदर्शिता अपि तु ज्ञानस्येव स्वविषया
वरणनिरसनपूर्वकप्रकाशकत्वमङ्गीकृत्येति चेन्न नहि विरोधिनिरसनमात्रं प्रकाशकत्वं अपि त्वर्थपरिच्छेदः
व्यवहारयोग्यतापादनमिति यावत् तत्तु ज्ञानस्येव यच्चोपकारकाणामप्यप्रकाशितार्थप्रकाशकत्वमङ्गीकृतं नहि
इन्द्रियाणामुपकारकत्वमप्यप्रकाशितार्थप्रकाशकत्वमङ्गीकरणीयं तथा सति ते चाक्षुषेति [illegible] तत्र एवं कृत्वा
भावात् हेतोरनैकान्तिकत्वमिति सलमनेन प्रतिप्रयोगाश्च विवादाध्यासितं प्रमाणज्ञानं न ज्ञानमात्रावरणाश्रयं अज्ञानत्वात् शुक्ति
काद्यज्ञानवत् ज्ञानाश्रयं हि तत् विवादाध्यासितं प्रमाणज्ञानं न ज्ञाननिवर्त्यज्ञानविषयानावरणत्वात् यज्ज्ञाननिव
र्त्यमज्ञानं तज्ज्ञानविषयावरणं यथा शुक्तिकाद्यज्ञानं प्रसन्नज्ञानास्पदं ज्ञानत्वविरहात् घटवत् प्रसन्नज्ञाना
वरणं ज्ञानाविषयत्वात् यद् ज्ञानावरणं तज्ज्ञानविषयभूतं यथा शुक्तिकादि विवादाध्यासितं प्रमाणज्ञानं स्वप्रा
गभावातिरिक्तानादिपूर्वकं न भवति प्रमाणज्ञानत्वात् भवदभिमतप्रमाणज्ञानवत् भवदभिमतं प्रमाणसाधन
प्रमाणज्ञानवत् ज्ञानं न वस्तुनो विनाशकं किं विशेषोपदेशविरहे सति ज्ञानत्वात् यद्वस्तुनो विनाशकं तत् [illegible] किं विशे
षोपदंहितं ज्ञानमज्ञानं चरमं यद्वेश्वरयोगिप्रभृतिज्ञानं यथा च मुद्गरादिभावरूपमज्ञानं न ज्ञानविनाश्यं भाव
रूपत्वात् घटादिवदिति अथोच्येत बाधकज्ञानेन पूर्वपूर्वज्ञानीयसन्तानां भयादीनां विनाशो दृश्यत इति चेन्न नहि
ज्ञानेन तेषां विनाशः क्षणिकत्वेन तेषां स्वयमेव विनाशात् कारणनिवृत्त्या च पश्चादनुत्पत्तेः क्षणिकत्वं च तेषां
ज्ञानं च तदुत्पत्तिकारणसन्धानप्रयोगोपलम्भे तेषामनुपपत्त्यैवावगम्यते अक्षणिकत्वे च तेषां भयादीनां भयादिहेतुभूत

त्रि १

७ प्रसन्नज्ञानविषयावरणं ज्ञानानां विषयत्वात् यज्ज्ञाननिवर्त्यमज्ञानं तज्ज्ञानविषयभूतं यथा शुक्तिकादि त्रुटि ६

८विशदता २

मात्रैव सत्वन्याकारद्वयाः संभवेन तिरस्कारः प्रकाशश्चयुगपन्नसंगच्छते अथ सच्चिदानंदैकरसं ब्रह्मा विद्यया तिरो
हितस्वरूपमविशदमिवालक्ष्यते इति प्रकाशमात्रस्वरूपस्य विशदता वा किंरूपा एतदुक्तं भवति यच्चांशस्य
विशेषः प्रकाशविषयः तस्य सकलावभासो विशदावभासः कतिपय विशेषरहितश्चाविशदावभासः तत्र
यस्याकारो प्रतिपन्नस्तस्मिन्नंशे प्रकाशाभावादेव प्रकाशवैशद्यं न विद्यते यस्त्वंशः प्रतिपन्नः तस्मिन्नंशे
तद्विषयप्रकाशो विशद एव अतः सर्वत्र प्रकाशवैशद्यं न संभवति विषयेपि स्वरूपे प्रतीयमाने तद्गतकतिपय
विशेषाप्रतीतिरेवावैशद्यं तस्माद् विषये निर्विशेषे प्रकाशमात्रे ब्रह्मणि स्वरूपे प्रकाशमाने कतिपयविशेषा
प्रतीतिरूपावैशद्यं नामाज्ञानकार्यं न संभवतीति अपि चेदमविद्याकार्यमवैशद्यं न तत्त्वज्ञानोदयान्निवर्त्तेत न वा
अनिवर्त्तावपवर्गाभावः निवर्त्तो चवस्तु किंरूपमिति विवेचनीयं विशदस्वरूपमिति चेत् तद्विशदस्वरूपं प्रागस्ति वा
न वा अस्ति चेत् विद्याकार्यमवैशद्यं न तन्निवर्त्तिष्यन्नस्यात्मा नो चेन्मोक्षस्य कार्यतया नित्यता अस्याज्ञानस्याश्र
यानिरूपणादेवासंभवः पूर्वमेवोक्तः अपि चापरमार्थदोषमूलभ्रमवादिनानिरधिष्ठानभ्रमासंभवोपि दुरू
पपादः भ्रमहेतुभूतदोषदोषाश्रयवदधिष्ठानापारमार्थ्येपि भ्रमोपपत्तेः तत्र अपरमार्थरूपत्वमेव स्यात् यदुक्तम
नुमानेनापि भावरूपमज्ञानं सिध्यतीति तदयुक्तं अनुमानासंभवात् न तत्क्रमन्नुमानं यत्समुक्तं दुरुक्तं तु तत्र प्रमा

भ्रमत्वासाध
त्वात् ३=

णेप्रानभिमतानामानां तरसाधनेन विरुद्धत्वाद्धेतोः स्वव्याप्तानां तरासाधने हेतोरनैकान्त्यं साधने च तदज्ञानमप्रा
नसांग्लितं निवारयति तत्त्वज्ञानकल्पनानिःफला स्यात् दृष्टान्तस्य साधनविकलः प्रदीपप्रभायाश्चप्रका
शितार्थप्रकाशकत्वाभावात् सर्वत्र हि ज्ञानस्यैव प्रकाशकत्वं सत्यपि दीपे विज्ञानेन विना विषयप्रकाशकाभावात्

प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वावरणस्वनिवर्त्यस्वदेशगतवस्त्वंतरपूर्वकं अप्रकाशितार्थप्रकाशकत्वादित्यनुमानेनाभिद्रुत् अज्ञानविषयकज्ञानं तदपि वस्त्वंतरपूर्वकं अप्रकाशिता
र्थप्रकाशकत्वात् इति वदन्निभिमत अज्ञाना... तु अनुमानस्य विरोधश्चेत्... अतिरेचेद ज्ञानरूपप्रतिबंधकस द्भावे ज्ञानस्य साध्य
साध्यत्वविरुद्धपक्षानुमानं कल्पनासावनास्ति अतीतिभावः=२ त्वं नसात्=३

रस्ते किंच अपूर्वम् अनिर्वचनीयम् इदं वस्तु जातं रजतादिबुद्धिशब्दाभ्यां कथमिव विषयीक्रियते न हि घटादिबुद्धिशब्दाभ्यां रजतादिसादृ
श्यादिति चेत् तर्हि तत्सादृश्यमेव प्रतीतिशब्दयोः स्यात् न रजतादिजातियोगादिति चेत् सा किं परमार्थभूता उतापरमार्थभूता
न तावत् परमार्थभूता तस्या अपरमार्थिन्या योगान्नाप्यपरमार्थभूता परमार्थिन्या योगादपरमार्थपरमार्थबु
द्धिशब्दयोर्निर्वाहकत्वायोगात् तत्त्वलमपरेणाकुतर्कनिरसनेन अथवा यथार्थं सर्वविज्ञानमिति वेदविदां मतं श्रुतिस्मृ
तिभ्यः सर्वस्य सर्वात्मत्वप्रतीतितः बहु स्यामिति संकल्पपूर्वकसृष्ट्याद्युपक्रमे तासां त्रिवृतमेकैकामिति श्रुत्यैव चोदितत्रि
वृत्करणमेवमस्य लोकोपलभ्यते यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपामिति श्रुत्यैव अग्नावेव त्रिरूपताश्रु
त्यैव दर्शिता तस्मात् सर्वं सर्वत्र संगताः पृथग्भूतास्तेन मे ... वैषम्येन सृष्ट्युपक्रमे नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना
नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः महदाद्या विशेषान्ता ह्यण्डमुत्पा
दयन्तीत्यादिना ततः सूत्रकारोऽपि भूतानां त्रिरूपत्वं तथा वदत् त्र्यात्मकत्वात्तु भूयस्त्वादिति तेनाभिधा... सो
माभावे च पूतीकग्रहणं श्रुतिचोदितं सोमावयवसद्भावादिति न्यायविदो विदुः ॥ श्रीसभावे चनी वाक्यहरणं श्रीहिमाद्रिः
तदेव सदृशं न तस्य यतद्वैदिकदेवाभाक् शुक्त्यादौ रजतादेश्च भावः अत एव चोदितः रूप्यशुक्त्यादिनिर्देशभेदाभ्यस्त्व
हेतुकः रूप्यादिसदृशशुक्त्यादिषु तथा दिसृ उपलभ्यते अतस्तस्या असद्भावः प्रतीतेरपि निश्चितः कदाचिच्चक्षुरादेस्तु दोषतः श
तुं तथा वर्जितः रजतांशो गृहीतो रजतार्थी प्रवर्तते दोषहानौ तु शुक्त्यंशे गृहीते तन्निवर्तते अतो यथार्थं सर्वाद्विविज्ञा
नं श्रुतिस्मृत्यादिबाध्यबाधकभावोऽपि भूयस्त्वेनोपपद्यते शुक्तिभूयस्त्वे विकल्पसाफल्यग्रहरूपतः नातो मिथ्यार्थसत्यार्थ
विषयत्वनिबन्धनः एवं सर्वस्य सर्वत्वे व्यवहारव्यवस्थितिः स्वप्ने च प्राणिनां पुण्यपापानुगुणं भगवतैव तत्तत्पुरुषमात्रा
नुभाव्यास्तत्तत्कालावसानास्तथाभूताः सृज्यन्ते तथाहि श्रुतिः न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ
रथान् रथयोगान् पथः सृजते न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान् मुदः प्रमुदः सृजते न तत्र वेशान्ताः पुष्करिण्यः स्र
वन्त्यो भवन्त्यथ वेशान्तान् पुष्करिणीः स्रवन्तीः सृजते स हि कर्तेति यद्यपि सकलेतरपुरुषानुभाव्यतया तदानीं न भवन्त्यथापि

स्वग्राभावव्यतिरिक्तत्वान्नस्यासाधकत्वाद्धि प्रामाण्यार्थमेवेत्यर्थः २=
१ इदं रजतमिति ज्ञानं नासत्तं विषयीकरोति नरशृङ्गादावपि प्रसंगात् नापि सत् तस्य प्रतीतिकालेऽपि बाधदर्शनात् अत्र सदसतोर्बाधोदयश्चरस्ततोऽनिर्वचनीयमेव रजतमित्याशयः ७=

ज्ञानसंततावविशेषेण सर्वेषां तत्तानानोभयापत्तेः हेतुत्वे नानेकमयोपलब्धिप्रसंगाच्च स्वग्राभावातिरिक्त
वस्त्वंतरपूर्वकमिति व्यर्थविशेषणोपादानेन प्रयोगकुशलता चाविष्कृता अतो नानुमानेनापि भावरूपाज्ञान
सिद्धिः अतितदर्थापत्तिप्रमाणमज्ञानासिद्धिः अनेनैवमेवावष्टब्धे मिथ्यार्थस्य मिथ्यैवोपादानं भवितुमर्हतीत्येतद
पि नविलक्षणत्वादित्येतदधिकरणन्यायेन परिह्रियते अतोऽनिर्वचनीयाज्ञानविषया न कदाचिदपि प्रतिप
त्तिरस्ति प्रतीतिभ्रान्तिबाधैरपि न तथाभ्युपगमनीयप्रतीयमानमेव हि प्रतीतिभ्रान्तिबाधविषयः भ्रान्तिः प्रती
तिभिः प्रतीत्यन्तरेण चानुपलब्धमासीद्विषय इति न युज्यते कल्पयितुं शुक्त्यादिषु रजतादिप्रतीतेः प्रतीतिकालेऽपि
तन्नास्तीति बाधेन चान्यस्यान्यथाभावायोगाच्च सदसदनिर्वचनीयमपूर्वमेवेदं रजतं दोषवशात्प्रतीयत इति क
ल्पनीयमिति चेन्न तत्कल्पनायामप्यन्यस्यान्यथाभावस्यावर्जनीयत्वात् अन्यथावभासाभ्युपगमादेव ख्याति
प्रवृत्तिबाधभ्रमत्वानामुपपत्तेः असंतापरिदृष्टकारणवस्तुकल्पनायोगात् कल्प्यमानं हीदमनिर्वचनीयं न च
तदानीमनिर्वचनीयमिति प्रतीयते अपि तु परमार्थरजतमित्येव अनिर्वचनीयमित्येवप्रतीतं चेत्प्रवृत्तिबाधयोः प्रत्ययस्य
संभवः अतोऽन्यस्यान्यथावभास एव हि प्रतीतिप्रवृत्तिबाधभ्रमत्वानामुपपत्तिः तस्यापरिहार्यत्वाच्च शुक्त्यादिरेव रजताद्याका
रेणावभासत इति भवताभ्युपगंतव्यं तत्र वादिनां विप्रतिपत्तिरेवमपि गत्यान्यथावभासो वक्तव्यः अत्र ख्याति
पक्षेऽसदात्मना आत्मख्यातिपक्षे चार्थात्मना अख्यातिपक्षे स्वविशेषणमन्यविशेषणत्वेन चखानरूपमेकत्वेन च विषया
सद्भावपक्षे विद्यमानत्वेन किं चानिर्वचनीयमपूर्वं रजतमत्र जातमिति वदता तस्य जन्मकारणं वक्तव्यं न तावद्र
जतज्ञानं तस्यास्तद्विषयत्वेन तदुत्पत्तेः प्रागात्मलाभायोगात् निर्विषयज्ञानानुत्पत्त्या च तदेव विषयीकरोतीति मत्वा
मुपपादनं अतो नेन्द्रियादिजन्यो दोषः तन्तूनां स्वगतरूपाश्रयत्वेनार्थगतकार्यस्योत्पादकत्वायोगात् नापीन्द्रियाणि तेषां ज्ञानका
रणत्वान्नापि दुष्टानीन्द्रियाणि तेषामपि स्वकार्यभूते ज्ञान एव हि विशेषकरत्वेन अनादिमिथ्याज्ञानोपादानत्वं तत्पूर्वमेवनि

अर्थासिद्धं न च आवमासत्व ७

ग्रहणात्मकं स्मरणात्मकं च ५

लौकी...

त्वा

श्री भा २८ २९

विशिष्टग्रहणे विशिष्टं च द्वयं हेतुद्वयसंनिकृष्ट एव चन्द्रः सन्न गृह्यते केवलचक्षुषः सामर्थ्यं नास्ति यथा सार्धदण्डश्यतिप्रथमे चन्द्रादिदेश
यत्र देशकाले विशिष्टं गृह्यते तत्र चक्षुषा किंतु पूर्वानुभवजनितसंस्कारेणेति भावः

पारमार्थिकं सामग्रीद्वित्वेन च

यदि भिन्नीयन्ते जीगति भेदेन सामग्रीभेदात् सामग्रीद्वयमन्योन्यनिरपेक्षं चन्द्रग्रहणद्वयहेतुर्भवति तत्रैका सामग्री स्वदेशविशिष्टं
चन्द्रं गृह्णाति द्वितीया तु किंचिद्वक्रगतिष्ठे दृष्टं समीपदेशग्रहणपूर्वकं चन्द्रं स्वदेशविप्रकृष्टं गृह्णाति अतः सामग्रीद्वयेन युगपद्देशद्वय
विशिष्टचन्द्रग्रहणेऽपि ग्रहणभेदेन ग्राह्याकारभेदादेकत्वे ग्रहणाभावाद् द्वौ चन्द्राविति भवति प्रतीतिर्विभ्रमः देशान्तरस्थत्वे हि देशयोः
देशान्तरस्य चाग्रहणे तत्स्वदेशचन्द्रस्य च निरन्तरग्रहणे न भवति तत्र सामग्रीद्वित्वं पारमार्थिकम् तेन देशद्वयविशिष्टचन्द्रग्रहणद्व
यं च पारमार्थिकं ग्रहणद्वित्वेन चन्द्रस्यैव ग्राह्याकारद्वित्वं च पारमार्थिकं तत्र विशेषणद्वयविशिष्टचन्द्रग्रहणद्वयस्यैकत्वेनैकचन्द्र
ग्राह्यतिग्रहणे [illegible] नावृत केवलचक्षुषः सामर्थ्याभावात् यासां [illegible] तथैव व्यवतिष्ठते द्वयोः चक्षुषोरेकसामग्र्यन्तर्भावे वि
तिमिरादिदोषभिन्नं चाक्षुषं तेजः सामग्रीद्वयं भवति काम्यकल्पं अपगते तु दोषे स्वदेशविशिष्टस्य चन्द्रस्यैकग्रहणे [illegible] घटादि
क चन्द्र इति भवति प्रत्ययः दोषकृते तु सामग्रीद्वित्वे तत्कृते च ग्रहणद्वित्वे च तत्कृते ग्राह्याकारद्वित्वे चेति निरवद्यं अतः सर्ववि
ज्ञानजातं यथार्थमिति सिद्धं [illegible] वादिभिः प्रपञ्चितानीति न तत्र यत्नः क्रियते [illegible] वाक्यमिदं न बहु
नोपपादनप्रकारे [illegible] प्रत्यक्षानुमानागमसाध्यप्रमाणे जातं आगमगम्यं च निरस्तनिखिलदोषगन्धमनवधिकातिशयानन्दमयकल्या
णगुणगणैः सर्वं [illegible] ब्रह्माभ्युपगच्छतां किं न संस्पृशति किं नोपपद्यते भगवता हि परेण ब्रह्मणा [illegible] पुण्यपापानुगु
णं [illegible] जगत् [illegible] भोग्य [illegible] पदार्थाः सर्वसाधारणानुभवविषयाः केचन केचन त
त्पुरुषमात्रानुभवविषयाः तत्कालावसानास्तथाविधाः सृज्यन्ते तत्र बाध्यबाधकभावः सर्वानुभवविषयतया तद्रहितत
या चोपपद्यते इति सर्वं समञ्जसं यस्तु [illegible] सदसदनिर्वचनीयमज्ञानं श्रुतिसिद्धमिति तत्सत् अनृतेन हि प्रत्यूढाः इत्यादि श्रु
तशब्दस्यानिर्वचनीयाज्ञानाभिधायित्वात् [illegible] तेन [illegible] तमिति [illegible] वाचि [illegible] तमपि [illegible] वचनात् [illegible]
तं कर्मफलाभिसंधिरहितं परमपुरुषाराधनवेषं तत्प्राप्तिफलं [illegible] सांसारिकफलं कर्म [illegible] ब्रह्मप्राप्तिविरोधि एतेन
लोकं न विन्दन्ति अनृतेन प्रत्यूढाः इति वचनात् नासदासीन्नोसदासीत्तदानीमित्यत्रापि सदसच्छब्दौ चिदचिद्विशिष्टविषयौ उत्पत्ति
वेलायां सदसच्छब्दाभिहितयोश्चिदचिद्व्यष्ट्योः [illegible] तयोर्वस्तुनोः प्रलयकाले [illegible] समष्टिभूततमःशब्दाभिधेयवस्तु

सत्त्वत्यच्चाभवत्

वाचि पाठान्तरं

तत्स्वरूपमात्रानुभाव्यतया तथाविधार्थिनीप्यस्य स्वप्ने सहि कर्त्ता तस्य सत्यसंकल्पस्याश्चर्यशक्तेस्तथाविधकर्तृत्वं संभवति
तथैः य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते तस्मिंल्लोकाः श्रिताः सर्वे तदु ना-
त्येति कश्चनेति सूत्रकारोपि संध्ये सृष्टिराह हि निर्मातारं चैके पुत्रादयश्चेति सत्यं ह्येवं न स्वाप्नप्रपञ्चस्य जीवस्य कर्तृ-
त्वमाशंक्य मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादित्यादिना जीवस्य संकल्पमात्रेण स्रष्टृत्वमुपपद्यते जीवस्य स्वा-
भाविकसत्यसंकल्पत्वादेः संसारदशायामनभिव्यक्तस्वरूपत्वादीश्वरस्यैव तत्स्वरूपानुभाव्यतया आश्चर्यभूता सृष्टि-
रियं तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चनेति परमात्मैव तत्र स्रष्टा एव गम्यते अपवरकादिषु शयानस्य स्वप्रदेशः स्वदेहे नैव
देशान्तरगमनराज्याभिषेकशिरश्छेदादयश्च पुण्यपापफलभूताः शयानदेहस्वरूपसंस्थानदेहान्तरसृष्टौ उपपद्यते पीतः शंखादौ
तु नयनवर्ति पित्तद्रव्यसंभिन्ना नयनरश्मयः शंखादिभिः संयुज्यन्ते तत्र पित्तद्रव्यगतपीतिमाभिभूतः शंखगतशुक्लिमा न गृह्य-
ते अतः सुवर्णानुलिप्तशंखवत्पीतः शंख इति प्रतीयते पित्तद्रव्यं तद्गतपीतिमा चातिसूक्ष्मतया पार्श्वस्थैर्न गृह्यते पित्तोपहतेन
तु स्वनयननिष्क्रान्ततया अतिसामीप्यात्सूक्ष्ममपि गृह्यते तद्ग्रहणजनितसंस्कारसचिवनयनरश्मिभिर्दूरस्थमपि गृह्यते जपाकु-
सुमसमीपवर्ति स्फटिकमणिरपि तत्प्रभाभिभूततया रक्त इति गृह्यते जपाकुसुमप्रभाभिभूततयापि स्वच्छद्रव्यसंयुक्ता स्फुटतरमुप-
लभ्यत इत्युपलब्धिप्रत्यक्षाप्यसिद्धं मरीचिकाजलज्ञानेपि तेजःपृथिव्योरप्युदकस्य विद्यमानत्वादिन्द्रियदोषेण तेजःपृथिव्यो-
रग्रहणाज्जलस्यैव ग्रहणाच्चाग्रहणाच्च अर्थत्वं अलातचक्रेप्यलातस्य द्रुततरगमनेन सर्वदेशसंयोगादन्तरालाग्रहणाच्चक्रप्र-
तीतिरुपपद्यते चक्रप्रतीतावपि अन्तरालाग्रहणपूर्वकं तद्देशसंयुक्तवस्तुग्रहणमेव तद्रहितं अन्तरालाभावादन्तरालाग्रहणं केचित्के अ
ष्वग्रहणमिति विशेषः आदर्शादिष्वपि यथार्थदर्पणादिषु निजमुखादिप्रतीतिरपि यथार्था दर्पणादिप्रतिहतगतयो हि नयनरश्मयो
दर्पणादिदेशग्रहणपूर्वकं निजमुखादि गृह्णन्तीति तत्राप्यपि अन्तरालाग्रहणान्तर्गतप्रतीतिः दिङ्मोहेपि दिगन्तरस्यास्या दिशि
विद्यमानत्वाददृष्टवशेनैतद्दिग्ग्रहणविप्रकीर्णादिग्विभागाग्रहणे अन्तरालाग्रहणप्रतीतिरित्येवमर्थैव द्विचन्द्रज्ञानादावप्यङ्गुल्यवष्टम्भनेति

वादः कश्चिदपि दृश्यते ननु ज्योतींषि विष्णुरिति वदतैकमेव तत्त्वमिति प्रतिज्ञाय ज्ञानस्वरूपो भगवान् यतोसाविति शैलाब्धि
धरादिभेदभिन्नस्य जगतो ज्ञानैकस्वरूपत्वप्रमाणं ज्ञानविजृंभितत्वमभिधाय यदा तु शुद्धं निजरूपीति ज्ञानभूतस्य प्रमाणाः
स्वस्वरूपावस्थितिवेलायां वस्तुभेदाभावप्रदर्शनेन ज्ञानविजृंभितत्वमेव स्थिरीकृत्य वस्त्वस्ति किं महीघटत्वमित्यादिश्लोक
कद्वयेन जगदुपलब्धिप्रकारेणापि वस्तुभेदानामसत्यत्वमुपपाद्य तस्मान्न विज्ञानमृतेऽस्ति प्रतिज्ञानं ब्रह्मव्यतिरिक्तस्या
सत्त्वमुक्तं स्यादिविज्ञानमेकमिति ज्ञानस्वरूपेण प्रमाणभेददर्शनं निमित्तं ज्ञानमसत्त्वं निजकर्मवैचित्र्यमिति स्फुटीकृत्य ज्ञानं विशुद्धमि
ति ज्ञानस्वरूपस्य प्रमाणाः स्वरूपं विशोध्य सद्भाव एवं भूतो यतो महीघटः इति ज्ञानस्वरूपस्य प्रमाण एव सत्यत्वं नान्यस्य श्रमस्य चास
त्त्वमेव तस्य भुवनादेः सत्यत्वं व्यावहारिकमिति तत्त्वतो नोपदिष्टमेवेत्युपदेशोऽदृश्यते नैतदेवं अत्र भुवनकोशस्य विस्तीर्णस्व
रूपमुक्त्वा पूर्वमनुक्तरूपान्तरं संक्षेपतः श्रूयतामित्यारभ्याभिधीयते चिच्चिन्मिश्रजगति चिद्देशो वाऽमनसो गोचरस्य स्वसंवेद्यस्व
रूपभेदो ज्ञानैकाकारतयाऽस्वरूपप्राकृतभेदोऽविनाशित्वेनास्तिशब्दवाच्यः। अचिद्देशस्तु चिद्देशकर्मनिमित्तपरिणामभेदो वि
नाशीति नास्तिशब्दाभिधेयः उभयं तु परं ब्रह्मभूतवासुदेवशरीरतया तदात्मकमित्येतद्रूपं संक्षेपेणात्राभिहितं तथाहि यद्वदवे
त्सवः कायस्ततो विप्रवसुंधरा पद्माकारा समुद्भूता पर्वताद्यादिसंयुतेत्येवं नो विप्रो शरीरत्वेनांबुपरिणामभूतं ब्रह्माण्डमपि विप्रो कायस्त
स्य च विप्र राक्षेति सकलस्यैतिगततादात्म्योपदेशोपयुक्तलक्षणस्य सामानाधिकरण्यस्य ज्योतींषि विष्णुरित्यारभ्य वक्ष्यमाणस्य शरीरा
त्मभाव एव निबंधनमित्याह अस्मिन्नास्त्रे पूर्वं मयोक्तं तद्दस्तुदुक्तेन निःसर्वाणि तद्वपुः तत्सर्वं वै हरेस्तनुः स एव सर्वभूतात्मा विश्वरू
पो यतोऽव्ययः इति तद्विं शरीरात्मभावायत्तं तादात्म्यं सामानाधिकरण्येन व्यपदिशति ज्योतींषि विष्णुरिति अत्रास्यात्मकेन
त्यात्मकं च जगदंतर्गतं वस्तु विशेषोः कायस्तथा विष्ण्वात्मकमित्युक्तं इदमस्यात्मकं इदं नास्यात्मकमस्य च नास्यात्मकत्व
हेतुरयमित्याह ज्ञानस्वरूपो भगवान् यतोसाविति अशेषक्षेत्रज्ञात्मनावस्थितस्य भगवतो ज्ञानमेव स्वाभाविकं रूपं न देव

२७

प्रधानस्य

निष्कलप्रतिपादनपरत्वादस्य वाक्यस्य नात्र कस्यचित्सदसदनिर्वचनीयतोच्यते सदसतोः कालविशेषेऽसद्भावमात्रवचनात्॥
अत्र तमःशब्दाभिहितस्याचित्समष्टित्वं श्रूयते तदेवगम्यते अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते तमः परे देव एकीभवती
ति सत्यं तमःशब्देनाचित्समष्टिरूपायाः प्रकृतेः सूक्ष्मावस्थोच्यते तस्यास्तु मायां तु प्रकृतिं विद्यादिति मायाशब्देनाभिधाना
दनिर्वचनीयत्वमिति चेन्नैतदेवं मायाशब्दस्यानिर्वचनीयवाच्यत्वं न दृष्टमिति मायाशब्दस्य मिथ्यापर्यायत्वेनानिर्वचनीय
वाच्यत्वमिति चेत्तदपि नास्ति नहि सर्वत्र मायाशब्दो मिथ्याविषयः असुरराक्षसशस्त्रादिष्वसत्येष्वेव मायाशब्दप्रयोगात्॥
यथोक्तं तेन मायासहस्रं तच्छंबरस्याशुगामिना बालस्य रक्षता देहमेकैकांशेन सूदितमिति अतो मायाशब्दो विचित्रसर्गक र्थ
राभिधायी प्रकृतेश्च मायाशब्दाभिधानं विचित्रार्थसर्गकरत्वादेव अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्ध
इति मायाशब्दवाच्यायाः प्रकृतेर्विचित्रार्थसर्गकरत्वं दर्शयति परमपुरुषस्य च तद्वत्तामात्रेण मायित्वमुच्यते नानत्वेन जी
वस्यैव हि मायया निरोधः श्रूयते तस्मिंश्चान्यो मायया सन्निरुद्ध इति अनादिमायया सुप्तो यदा जीवः प्रबुध्यत इति च इन्द्रो मा
याभिरित्यत्रापि विचित्राः शक्तयो विधीयंते अत एव हि भूरि रित्यत्रापि विचित्राः शक्तयो विधीयंते अत एव हि भूरित्वष्टस्या
जत इत्युच्यते न मिथ्याभूतः कश्चिद्राजते मम माया दुरत्ययेत्यत्रापि गुणमयीति वचनात्सैव त्रिगुणात्मिका प्रकृतिरुच्यत इति न
श्रुतिभिः सदसदनिर्वचनीयाज्ञानप्रतिपादनं नाप्येकत्वोपदेशानुपपत्त्या न हि तत्त्वमसीति जीवपरयोरैक्योपदेशः सत्ति सर्वज्ञस
त्यसंकल्पस्य सकलजगत्सर्गस्थितिविनाशहेतुभूतेन ब्रह्मणोऽवगते ब्रह्मणि विरुद्धाज्ञानपरिकल्पना हेतुभूतताकाप्यनुपपत्तिर्हिय
त ऐक्योपदेशस्तु त्वंपदेनापि जीवशरीरकस्य ब्रह्मणोऽभिधानादुपपन्नतरः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवा
णीति सर्वस्य वस्तुनः परमात्मपर्यंतस्यैव हि नामरूपभाक्त्वमुक्तं अतोऽज्ञानविधानपरिकल्पनाऽतिहासपुराणेष्वपि न ब्रह्माज्ञान

शरीरप्रवेशहेतुभूतस्वकृतविविधकर्ममूलदेवादिभेदभिन्नात्मबुद्धिमिश्रेण तेन रूपेणावबुद्ध्यानुसंहितमिति तद्वै तदनुसंधानेना
त्मस्वरूपमप्युक्तमित्याह विज्ञानमेकमिति आत्मस्वरूपं तु कर्मरहितं ततएव मलरूपप्रकृतिस्पर्शरहितं ततश्च तत्स्वप्रकाशो
कमोहाद्यशेषहेयगुणासंस्पृष्टं उपचयापचयानर्हतया एकं ततएव सदैकरूपं तच्च वासुदेवशरीरमिति तदात्मकं अत तदात्मक
स्यकस्यचिदप्यभावादित्याह ज्ञानं विशुद्धमिति चिदंशस्तु सदैकरूपतया सर्वदास्तिशब्दवाच्यः अचिदंशस्तु प्रतिक्षणपरिणामि
त्वेन सर्वदा नाशगर्भ इति सर्वदा नास्तिशब्दाभिधेय एवंरूपं चिदचिदात्मकं जगद्वासुदेवशरीरं तदात्मकमिति जगद्याथात्म्य
सम्यगुक्तमित्याह सद्भाव एवमिति अन्यत्सर्वमसत्यमिति यदस्ति यन्नास्तीति प्रश्नस्योपसंहारः एवं ज्ञानैकाकारतया सम
स्तशब्दगोचरस्वरूपभेदमेवाविचिन्त्य अभुवनाश्रितं देवमनुष्यादिरूपेण सम्यग्व्यवहारार्हं यद्वर्तते तत्र हेतुः कर्मैव सूक्तमित्याह
एतत्तु यदिति तदेव विवृणोति पशुः पशुरिति जगद्याथात्म्यज्ञानप्रयोजनं मोक्षोपाययत्नमित्याह यज्ञेतदिति अत्र निर्विशे
षेपरब्रह्मणि तदन्यस्य सदसदनिर्वचनीयेऽज्ञाने जगतस्तत्कल्पिततत्त्वेऽज्ञानगुणाकिंचित्परं न दृश्यते अस्ति नास्तिश
ब्दाभिधेयं चिदचिदात्मकं कृत्स्नं जगत्सर्वमस्य परस्य परस्य ब्रह्मणो विष्णोः कार्यत्वेन तदात्मकं ज्ञानैकाकारस्यात्मनो देवा
दिविविधाकारानुभवे अविद्या कर्म च हेतुः वस्तुयाथात्म्यज्ञानविरोधिहेतुत्वेन कर्मेति प्रतिपादनात् अस्ति नास्तिसत्या
सत्यशब्दानां च सदसदनिर्वचनीयवस्त्वभिधानासामर्थ्याच्च नास्त्यसत्यशब्दावस्तित्वसत्यशब्दविरोधिनो अतश्च तावन्मात्रं
प्रतीयते नानिर्वचनीयत्वं अत्राचिद्वस्तुनि नास्त्यसत्यशब्दौ न तु तुच्छमिथ्यात्वपरौ प्रयुक्तौ अपि तु विनाशित्वपरौ वस्त्वस्ति
किं महीघटत्वमित्यत्र नाशित्वमेव हि उपपादितं न लिङ्गप्रमाणकत्वं ज्ञानबाध्यत्वं वा एकेनाकारेण कस्मिंश्चित्कालेऽनुभूतस्य
कालान्तरे परिणामविशेषेणान्यथोपलब्ध्या नास्तित्वोपपादनात् तुच्छत्वे हि प्रमाणसंबन्धानर्हत्वं बाधेऽपि देशकालादिसंब
न्धितयापरत्रास्तीत्युपलब्धं तस्य तद्देशकालादिसंबन्धितया नास्तीत्युपलब्धिः ननु कालान्तरेऽनुभूतस्य कालान्तरे परिणामादिनाना

३० मे दं स्य

मनुष्यादिवस्तुरूपं यत एवं तत एवाचिद्रूपदेवमनुष्यशैलाब्धिधरादयश्चानन्तहिज्ञानविजृम्भिताः तस्य ज्ञानैकाकारस्य सतोऽस्या
द्याकारेणास्वात्मन्येव विध्यानुसंधानमूलाः देवाद्याकारानुसंधानमूलकर्ममूला इत्यर्थः यतश्चाचिद्वस्तु हेतुत्वकर्मानुगुणप
रिणामास्पदं ततस्तन्नास्तिशब्दाभिधेयं इतरदस्तिशब्दाभिधेयं इत्यर्थादुक्तं भवति तदेव विवृणोति यदा तु स्फुटनि
जरूपीति यदेतज्ज्ञानैकाकारमात्मवस्तु देवाद्याकारेण स्वात्मनि वैविध्यानुसंधानमूलसर्वकर्मक्षयान्निरस्तपरिस्फुटनिज
रूपं भवति तदा देवाद्याकारेणैकीकृत्यात्मकल्पन [illegible] मूलकर्मफलभूतास्तज्ज्ञानार्थवस्तुषु वस्तुभेदा न भवन्ति यदे
वादिषु वस्तुष्वात्मतयाभिमतेषु भोग्यभूता देवमनुष्यशैलाब्धिधरादिवस्तुभेदास्ते तन्मूलभूतकर्मसु विनष्टेषु न भवन्तीत्य
चिद्वस्तुनः कादाचित्कावस्थाविशेषयोगितया नास्तिशब्दाभिधेयत्वमितरस्य सर्वदा निजस्फुटज्ञानैकस्वरूपत्वेनास्तिशब्दा
भिधेयत्वमित्यर्थः प्रतिक्षणमन्यथाभूततया कादाचित्कावस्थायोगिनोऽचिद्वस्तुनः नास्तिशब्दाभिधेयत्वे भवेत्साद् वस्तु
स्ति किमिति अस्तिशब्दाभिधेयो ह्यादिमध्यान्तहीनस्य सततैकरूपपदार्थस्तस्य कदाचिदपि नास्तिबुद्ध्यनर्हत्वात् अचिद्वस्तु किं॥
चित्क्वचिदपि तथाभूतं न [illegible] ततः किमित्यत्राह यन्नान्यथात्वमिति यद्वस्तु प्रतिक्षणमन्यथात्वं याति तद्वस्तुनोत्तराव
स्थाप्राप्य पूर्वपूर्वावस्थां जहातीति तस्य पूर्वावस्थायाः उत्तरावस्थायां न प्रतिसंधानमस्ति अतः सर्वदा तस्य नास्तिशब्दाभिधेय
त्वमेव तथा ह्युपलभ्यत इत्याह महीघटत्वमिति स्वकर्मणा देवमनुष्यादिभावे नास्तित्वमितिनामनिश्चयैः स्वभोग्यभूतमचि
द्वस्तु प्रतिक्षणमन्यथाभूतमालक्ष्यते अनुभूयत इत्यर्थः एवं सति किमप्यचिद्वस्त्वस्तिशब्दार्हमादिमध्यान्तहीनं सततैकरू
पमालक्षितमस्ति किं नहि अस्तीत्यभिप्रायः यस्मादेवं तस्माज्ज्ञानस्वरूपात्मव्यतिरिक्तमचिद्वस्तु कदाचित् क्वचित् केवलास्तिश
ब्दवाच्यं न भवतीत्याह तस्मान्न विज्ञानमृते इति आत्मा तु सर्वत्र ज्ञानैकाकारतया देवादिभेदप्रत्यनीकस्वरूपोऽपि देवादि

ब्रह्मसत्ताभिन्नसत्ताकत्वाभावपरत्वे २ = तन्निर्विशेषलक्षणं ब्रह्मैवाधिष्ठानलक्षणा० केवलसत्ताभिन्नसत्ताको नास्तीति निर्वर्तितलक्षणा = ३ प्रतिज्ञा

स्वविरोधात् देशभेदे विरोधश्च कालभेदेन परिहृतः तदेतत्तत्त्वमस्यादिमित्युपक्रमविरोधश्च एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा नैव
न घटते ज्ञानस्वरूपस्य निरस्तनिखिलदोषस्य सर्वज्ञस्य कल्याणगुणात्मकस्याज्ञानतत्कार्याधीनताः अशेषाश्रयत्वं च न संभवति। सा
धर्थ्ये च सामानाधिकरण्यस्य तत्त्वे पदयोरधिष्ठानलक्षणा निवर्तितलक्षणा चेति लक्षणोदयस्त एव दोषाः। यास्तु विशेषः नेदं
रजतमिति वद्प्रतिपन्नस्यैव बाधस्यागत्यापतिकल्पनं तत्पूर्वे नाधिष्ठानातिरेकिधर्मानुपस्थापनेन बाधानुपपत्तिश्च अधिष्ठानं तु
प्रातिकिराहितं अतिरोहितस्वरूपं तत्पदेनोपस्थाप्यत इति चेन्न अधिष्ठानाः प्रकाशितदाश्रयभ्रमबाधयोरसंभवात् भ्रमाश्रयम
धिष्ठानमतिरोहितमिति चेन्न तदेवाधिष्ठानस्वरूपं भ्रमविरोधीति तिन्नप्रकाशस्तदानीं तदाश्रयभ्रमबाधो अतोऽधिष्ठानातिरेकिपार
मार्थिकधर्मतत्तिरोधानानभ्युपगमेऽभ्रान्तिबाधौ दुरूपपादौ अधिष्ठाने हि पुरुषमात्राकारे प्रतीयमाने तदतिरेकिनि पारमार्थिके राज
त्वे तिरोहिते सत्येव भ्राधत्त्वभ्रमः राजत्वोपदेशेन तन्निवृत्तिर्भवति नाधिष्ठानमात्रोपदेशेन तस्य प्रकाशमानत्वेनानुपदेश्य
त्वात् भ्रमानुपमर्दित्वाच्च जीवशरीरक जगत्कारणब्रह्मपरत्वे मुख्यवृत्तपदद्वयं प्रकारद्वयविशिष्टैकवस्तुप्रतिपादनेन सा
मानाधिकरण्यं च सिद्धं निरस्तनिखिलदोषस्य समस्तकल्याणगुणात्मकस्य ब्रह्मणो जीवान्तर्यामित्वमप्यैश्वर्यमपरं प्रति
पादितं भवति उपक्रमानुकूलता च एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तिश्च सूक्ष्मचिदचिद्वस्तुशरीरस्यैव ब्रह्मणः स्थूल
चिदचिद्वस्तुशरीरत्वेन कार्यत्वात् तमीश्वराणां परमं महेश्वरं परास्य शक्तिर्विविधैव श्रूयते अपहतपाप्मा सत्यसंकल्पः
सोऽदिश्च तंतरां विरोधश्च तत्त्वमसीत्यत्रो हेयोपादेयविभागः कथमिति चेन्नात्र किंचिदुद्दिश्य किमपि विधीयते एतदात्म्य
मिदं सर्वमित्यनेनैव प्राप्तत्वात् अप्राप्तो हि शास्त्रमर्थवत् इदं सर्वमिति सजीवं जगन्निर्दिश्य चैतदात्म्यमिति तस्यैवात्मेति प्रतिपा
दितं तत्र चेदं हेतुरुक्तः सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा इति सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त इति वत्
तथाश्च सन्तरात्मा च ब्रह्मणोऽत्यतिरिक्तस्य चिदचिद्वस्तुनः शरीरात्मभावमेव तादात्म्यं वदति अन्तः प्रविष्टः शास्ता जनाना

31

स्त्रीयुपलब्धेः कालभेदेन विरोधाभावात् अतो न मिथ्यात्वं एतदुक्तं भवति ज्ञानस्वरूपमात्मवस्त्वादिमध्यपर्यन्तरहितं सततै
करूपमिति स्वत एव सदास्तिशब्दवाच्यं अचेतनं तु देहादि भोग्यभूतं तत्कर्मानुगुणपरिणामि विनाशीति सर्वदा नास्त्यर्थग
र्भमिति नास्त्यसत्यशब्दाभिधेयमिति यथोक्तं यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै परिणामादिसंभूतं तद्वस्तु नृप तच्च
किं अविनाशी परमार्थश्च आत्मैवाभ्युपगम्यते यत्तु नाशी न संदेहो नाशित्वादुपपादितमिति देशकालकर्मविशेषापेक्षया
स्तित्वनास्तित्वयोगि निवस्तुनि केवलास्तिबुद्धिबोधित्वमपरमार्थ इत्युक्तं आत्मन एव केवलास्तिबुद्धिबोधित्वमिति स परमार्थ
इत्युक्तं अतश्चामेयश्च विश्वाधारं यथा चेतनं लोकं समवस्थितं परमार्थश्च मे प्रोक्तो यथा ज्ञानं प्रधानं इत्याद्यनुभाष
णाच्च ज्योतींषि विष्णुरित्यादि सामानाधिकरण्यस्य तच्छरीरभाव एव निबन्धनं किंचिद्वस्तु नो अस्ति नास्तिशब्दप्रयोगनिबं
धनं च ज्ञानस्याकर्मनिमित्तस्वाभाविकस्वरूपत्वेन स्वरूपप्राधान्यं अचिद्वस्तुनश्च तत्कर्मनिमित्तपरिणामित्वेन अप्राधान्य
मिति प्रतीयते यदुक्तं निर्विशेषब्रह्मैतज्ज्ञानादेवाविद्यानिवृत्तिं वदति श्रुतयः इति तदसत् वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं त
मसः परस्तात् तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि न तस्ये
शे कश्चन तस्य नाम महद्यशः य एनं विदुरमृतास्ते भवन्तीत्यादिनानेकवाक्यविरोधात् ब्रह्मणः सविशेषत्वादेव सर्वाण्यपि
वाक्यानि सविशेषविषयज्ञानादेव मोक्षं वदन्ति घटकवाक्यान्यपि सविशेषमेव ब्रह्म प्रतिपादयन्तीत्युक्तं तत्त्वमस्यादिवाक्येषु सा
मानाधिकरण्येन निर्विशेषवस्त्वैक्यपरं तत्त्वंपदयोः सविशेषब्रह्माभिधायित्वात् तत्पदं हि सर्वज्ञं सत्यसंकल्पं जगत्कारणं ब्रह्म
प्रतिपादयति तदैक्षत बहु स्यां प्रजायेयेत्यादिषु तस्यैव प्रकृतत्वात् तत्समानाधिकरणं त्वंपदं चाचिद्विशिष्टजीवशरीरकं परं ब्रह्म
प्रतिपादयति प्रकारद्वयावस्थितैकवस्तुपरत्वात् सामानाधिकरण्यस्य प्रकारद्वयपरित्यागे प्रवृत्तिनिमित्तभेदासंभवेन सामाना
धिकरण्यमेव परित्यक्तं स्यात् द्वयोः पदयोः लक्षणा च सो यं देवदत्त इत्यत्रापि न लक्षणा भूतवर्त्तमानकालसंबन्धितयैक्यप्रती

सत्संज्ञानमनंतंश्री लेख्याहीति ५ श्रुतबोधार १

श्री
भा
३३

तिष्ठमानैः कृत्स्नस्य क्षालेतादात्म्याभावोपदेशाः सर्वेऽप्युपपादिताः भवन्ति । जातिगुणयोरिव द्रव्याणामपि शरीरभावेन विशेषणत्वे
न गौरश्वो देवो मनुष्यो जातः पुरुषः कर्मभिरिति सामानाधिकरण्यं लोकवेदयोर्मुख्यमेव दृश्यते । जातिगुणयोरिव विशिष्टद्रव्यप्रका
रत्वमेव खण्डो गौः शुक्लः पट इति सामानाधिकरण्यनिबन्धनं मनुष्यत्वादिविशिष्टपिण्डानामप्यात्मनः प्रकारतयैव पदार्थत्वा
न्मनुष्यः पुरुषः षण्डो जात इति सामानाधिकरण्यं सर्वत्रानुगतमिति प्रकारत्वमेव सामानाधिकरण्यनिबन्धनं न परस्परव्यावृत्तजा
त्यादयः स्वनिष्ठानामिव द्रव्याणां क्वचित्कदाचिद्द्रव्यविशेषणत्वे नमत्वर्थीयप्रत्ययो दण्डी कुण्डलीति न पृथक्प्रतिपत्तिस्थित्य
र्हत्वं द्रव्याणां तेषां विशेषणत्वे सामानाधिकरण्यावश्यमेव यदि गौरश्वो मनुष्यो देवः पुरुषो योषित्षण्ड आत्मा कर्मभि
र्जात इत्यत्र खण्डो मुण्डो गौः शुक्लः पट इति जातिगुणवदात्मप्रकारत्वं मनुष्यादिशरीराणामिष्यते तर्हि जातिव्यक्त्योरिव प्र
कारप्रकारिणोः शरीरात्मनोरपि नियमेन सहप्रतिपत्तिः स्यात् । न चैवं दृश्यते । न हि नियमेन गोत्वादिवदात्माश्रयतयैवात्मना
सह मनुष्यादिशरीरं पश्यन्ति । अतो मनुष्य आत्मेति सामानाधिकरण्यं लाक्षणिकमेव । नैतदेवं मनुष्यादिशरीराणामप्यात्मै
काश्रयत्वं तदेकप्रयोजनत्वं तत्प्रकारत्वं च जात्यादितुल्यं आत्मैकाश्रयत्वमात्मविश्लेषे शरीरविनाशादेवगम्यते आत्मै
कप्रयोजनत्वं च तत्तत्कर्मफलभोगार्थतयैव सद्भावात् । तत्प्रकारत्वमपि देवो मनुष्य इत्यात्मविशेषणतयैव प्रतीतेः एत
देव हि गवादिशब्दानां व्यक्तिपर्यन्तत्वे हेतुः एतत्स्वभावविरहादेव दण्डादीनां विशेषणत्वे दण्डी कुण्डलीति मत्वर्थीयप्रत्ययः देव
मनुष्यादिपिण्डानामात्मैकाश्रयत्वे तदेकप्रयोजनत्वे तत्प्रकारत्वस्वभावात् देवो मनुष्य आत्मेति लोकवेदयोः सामाना
धिकरण्येन व्यवहारः "जातिव्यक्त्योरिव नियमेन सहप्रतीतिः सहभयोश्चाक्षुषत्वात् आत्मनस्त्वचाक्षुषत्वाच्चक्षुषा शरीरग्रहण
वेलायामात्मा न गृह्यते पृथग्ग्रहणयोग्यस्य प्रकारतयैकस्यरूपत्वं दुर्घटमिति भावो नैवं जात्यादिवत्तदेकाश्रयत्वतदेकप्रयो
जनत्वतद्विशेषणत्वैः शरीरस्यापि तत्प्रकारतैकस्वभावत्वावगमात् सहोपलम्भनियमस्त्वेकसामग्रीवेद्यत्वनिबन्धन
इत्युक्तं यथा चक्षुषा पृथिव्यादेर्गन्धरसादिसंवेधित्वं स्वाभाविकमपि न गृह्यते एवं चक्षुषा गृह्यमाणे शरीरमात्मप्रकारतै
कस्वभावमपि न तथा गृह्यते आत्मग्रहणे चक्षुषः सामर्थ्याभावात् नैतावता शरीरस्य तत्प्रकारतैकस्वभावविरहः तत्प्रकारतैकस्व

32

प्रत्यक्षे

३३

लोके यथा देवोऽयं मनुष्योऽयमित्यादौ देवादिशब्दानां देवादिशरीरविशिष्टात्मपर्यन्ताभिधायित्वं प्रसिद्धं
तथा सर्वशब्दानां चिदचिद्विशिष्टब्रह्मवाचकत्वमिति भावः ८ =

नो सर्वात्मा यः पृथिव्यां तिष्ठन् पृथिव्या अंतरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमयति स त आत्मांतर्या-
मी अमृतः य आत्मनि तिष्ठन्नात्मनोंतरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमंतरो यमयति स त आत्मांतर्याम्य-
मृतः यः पृथिवीमंतरे संचरन् निसारभ्य यस्य मृत्युः शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको
नारायणः तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवदित्यादीनि अनेन जीवेनात्मनानुप्रविश्य नामरूपे
व्याकरवाणीति ब्रह्मात्मकजीवानुप्रवेशेनैव सर्वेषां वस्तुत्वं शब्दवाच्यत्वं च प्रतिपादितं तदनुप्रविश्य सच्च त्यच्चाभवदित्यनेनैव
कार्य्यात् जीवस्यापि ब्रह्मात्मकत्वं ब्रह्मानुप्रवेशादेवेत्यवगम्यते अतश्चिदचिदात्मकस्य सर्वस्य वस्तुजातस्य ब्रह्मणा तादात्म्यमा-
त्मशरीरभावादेवेत्यवगम्यते तस्माद्ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य तच्छरीरत्वेनैव वस्तुत्वात् तस्य प्रतिपादकोऽपि शब्दस्तत्पर्यंतमेव
स्वार्थमभिदधाति अतः सर्वशब्दानां लोकव्युत्पत्त्यवगत तत्तत्पदार्थविशिष्टब्रह्माभिधायित्वं सिद्धमिति ऐतदात्म्यमिदं सर्वमि-
ति प्रतिज्ञातार्थस्य तत्त्वमसीति सामानाधिकरण्येन विशिष्टेनोपसंहारः अतो निर्विशेषवस्त्वैक्यवादिनः भेदाभेदवादिनः केवलभे-
दवादिनश्च वैयधिकरण्येन सामानाधिकरण्येन च ब्रह्मात्मभावोपदेशाः सर्वे परित्यक्ताः स्युः एकस्मिन्वस्तुनि कस्यतादा-
त्म्यमुपदिश्यते तस्यैव निश्चेतत्त्ववाक्येनावगतमिति न तादात्म्योपदेशावसेयमस्ति किंचित् कल्पितभेदनिरसनमिति चे-
त् तत्र सामानाधिकरण्येन तादात्म्योपदेशावसेयमित्युक्तं सामानाधिकरण्यं तु ब्रह्मणो प्रकारद्वयप्रतिपादनेन विरोधमेवावहे-
त् भेदाभेदवादे तु ब्रह्मण्येवोपाधिसंसर्गात्तत्प्रयुक्ता जीवगतादोषा ब्रह्मण्येव प्रादुःस्युरिति निरस्तनिखिलदोषकल्याण-
गुणात्मकब्रह्मात्मभावोपदेशा हि विरोधादेव एकदा परित्यक्ताः स्युः स्वाभाविकभेदाभेदवादेऽपि ब्रह्मणः स्वत एव जीवभावाभ्यु-
पगमात् गुणवद्दोषाश्च स्वाभाविका भवेयुरिति निर्दोषब्रह्मतादात्म्योपदेशो विरुद्ध एव केवलभेदवादिनो चात्यंतभिन्नयोः केना-
पि प्रकारेण तादात्म्यासंभवादेव ब्रह्मात्मभावोपदेशाः [illegible] स्युः [illegible] निखिलोपनिषत्प्रसिद्धं कृत्स्नस्य ब्रह्मशरीरभावमा-

श्री
भा
३४

यप्रकृतिं यांति मामिकां कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहं प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः भूतग्राममिमं
कृत्स्नमवशं प्रकृतेर्वशात् मयाध्यक्षेण प्रकृतिः सूयते सचराचरं हेतुनानेन कौंतेय जगद्विपरिवर्त्तते प्रकृतिं पुरुषं चैव विद्ध्यनादी
उभावपि मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहं संभवः सर्वभूतानां ततो भवति भारतेति जगद्योनिभूतं महद्ब्रह्म मदीयं प्रकृ
त्याख्यं भूतसूक्ष्ममचिद्वस्तु यत्तस्मिंश्चेतनाख्यं गर्भं संयोजयामि ततो मत्संकल्पकृतात् चिदचित्संसर्गाद्देवादिस्थावरांतानामचिन्मिश्राणां
सर्वभूतानां संभवो भवतीत्यर्थः एवं भोक्तृभोग्यरूपेणावस्थितयोः सर्वावस्थावस्थितयोश्चिदचितोः परमपुरुषशरीरतया तन्नियाम्यत्वेन तद
पृथक्स्थितिं परमपुरुषस्य चात्मत्वमाहुः श्रुतयः यः पृथिव्यां तिष्ठन् पृथिव्या अंतरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृ
थिवीमंतरो यमयतीत्यारभ्य यः आत्मनि तिष्ठन्नात्मनोंतरो यमात्मा न वेद यस्यात्मा शरीरं यः आत्मानमंतरो यमयति स त आत्मांतर्या
म्यमृत इति तथा यः पृथिवीमंतरे संचरन् यस्य पृथिवी शरीरं यं पृथिवी न वेदेत्यारभ्य योऽक्षरमंतरे संचरन् यस्याक्षरं शरीरं यमक्षरं
न वेद यो मृत्युमंतरे संचरन् यस्य मृत्युः शरीरं यं मृत्युर्न वेद एष सर्वभूतांतरात्मापहतपाप्मा दिव्यो देव [illegible] एको नारायणः अत्र मृ
त्युशब्देन तमःशब्दवाच्यमतिसूक्ष्मावस्थमचिद्वस्त्वभिधीयते अस्यामेवोपनिषदि अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते इति वच
नात् अंतःप्रविष्टः शास्ता जनानां सर्वात्मेति च एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एव कार्या
वस्थकारणावस्थजगद्रूपेणावतिष्ठत इतीममर्थं ज्ञापयितुं काश्चन श्रुतयः कार्यावस्थं कारणावस्थं च जगत्स एवेत्याहुः सदे
व सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्यारभ्य सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदाय
तनाः सत्प्रतिष्ठाः ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति तथा सोऽकामयत बहु स्यां प्रजायेयेति स तपो
ऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजतेत्यारभ्य सत्यं चानृतं च सत्यमभवदित्याद्याः अत्रापि श्रुत्यंतरसिद्धश्चिदचितोः
परमपुरुषस्य च स्वरूपविवेकः स्मारितः हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि
तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवदिति च अनेन जीवेनात्म

परार्थता आत्मनः शरीरव्यवहारो न गृह्यते

भावत्वमेव सामानाधिकरण्यनिबंधनं आत्मप्रकारतां प्रतिपादनसमर्थस्तु शब्दः स्वैव प्रकारतया प्रतिपादयति ननु च घटादेरपि व्यवहारे शरी-
रत्वेन शरीरमात्रं गृह्यते इति नात्मपर्यंततापि शरीरशब्दस्य नैवं आत्मप्रकारभूतस्यैव शरीरस्य पदार्थतां विवेकप्रदर्शनाय निरू-
पकाणां निष्कर्षशब्दोयं यथा गोत्वं शुक्लत्वमात्रं निर्गुणत्वादिशब्दाः अतो गवादिशब्दवत् देवमनुष्यादिशब्दाः आत्मपर्यंताः
एवं देवमनुष्यादिपिंडविशिष्टानां जीवानां परमात्मशरीरतया तत्प्रकारत्वात् जीवात्मवाचिनः शब्दाः परमात्मपर्यंताः ॥
अतः परस्य ब्रह्मणः प्रकारतयैव चिदचिद्वस्तुनः पदार्थत्वमिति तत्सामानाधिकरण्येन प्रयोगः अयमर्थो वेदार्थसंग्रहे समर्थि-
तः इदमेव शरीरात्मभावलक्षणं तादात्म्यं आत्मेत्युपगच्छंतीति वक्ष्यति आत्मेत्येव तु गृह्णीयात् सर्वस्येति वाक्यकार अत्र ग्रंथेदं त-
त्वम् अचिद्वस्तुनश्चिद्वस्तुनः परस्य च ब्रह्मणो भोग्यत्वेन भोक्तृत्वेन चेशितृत्वेन च स्वरूपविवेकमाहुः काश्चन श्रुतयः अस्मा-
न्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया संनिरुद्धः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं क्षरं प्रधानममृताक्षरं हरः
क्षरात्मानावीशते देव एकः अमृताक्षरं हर इति भोक्ता निर्दिश्यते प्रधानं स्वात्मनो भोग्यत्वेन हरतीति हरः सकारणं करणा-
धिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः प्रधानक्षेत्रज्ञपतिर्गुणेशः पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं ज्ञाज्ञौ द्वाव- म
जावीशानीशौ नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् भोक्ता भोग्यं प्रेरितारं च मत्वा तयोर-
न्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति अजामेकां
लोहितशुक्लकृष्णां बह्वीं प्रजां जनयंतीं सरूपां अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः समाने वृक्षे पु-
रुषो निमग्नोनीशया शोचति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः इत्याद्याः स्मृतावपि अहंका-
र इतीयं मे भिन्ना प्रकृतिरष्टधा अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूतां महाबाहो ययेदं धार्यते जगत् सर्वभूतानि कौंते-

परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च विज्ञातारमरे केन विजानीयादित्यादिकाः सा तत्त्वमावेदयन्ति सर्वज्ञान
मित्यादिकाश्च ज्ञानैकनिरूपणीयतया स्वप्रकाशतया च ज्ञानरूपतां सोऽकामयत बहु स्यामिति तदैक्षत बहु स्यां तन्नामरूपाभ्यां व्याक्रिय
तेति ब्रह्मैव स्वसंकल्पाद्विचित्रस्थिरत्रसस्वरूपतया नानाप्रकारमवस्थितमिति प्रत्यनीकाकारं ब्रह्मणोऽनेकवस्तुनानात्वमतत्त्वमिति तत्प्र
तिषिध्यते मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति नेह नानास्ति किंचन यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य
सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं विजानीयादित्यादिना। न पुनर्बहु स्यां प्रजायेयेत्यादिश्रुतिसिद्धस्वसंकल्पकृतं ब्रह्मणो नाम
रूपभाक्त्वेन नानाप्रकारत्वमपि निषिध्यते। यत्र त्वस्य सर्वमात्मैवाभूदिति निषेधवाक्यादौ च तत्स्थापितं सर्वं तं परादाद्योऽन्यत्रा
त्मनः सर्वं वेद तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतदृग्वेद इत्यादिना एवं चिदचिदीश्वराणां स्वभावभेदं स्वरूपभेदं च वदन्तीनां का
र्यकारणभावं कार्यकारणयोरनन्यत्वं च वदन्तीनां च सर्वासां श्रुतीनामविरोधः चिदचितोः परमात्मनश्च सर्वदा शरीरात्मभाव
शरीरभूतयोः कारणदशायां नामरूपविभागानर्हसूक्ष्मदशापत्तिं कार्यदशायां च तदर्हस्थूलदशापत्तिं वदन्तीभिः श्रुतिभिरेव
ज्ञापयन्तीति ब्रह्माज्ञानवादस्यौपाधिकब्रह्मभेदवादस्यान्यायमूलस्य सकलश्रुतिविरुद्धस्य न कथंचिदप्यवकाशो दृश्यते चिदचि
दीश्वराणां पृथक्स्वभावतया तत्तच्छ्रुतिसिद्धानां शरीरात्मभावेन प्रकारप्रकारितया श्रुतिभिरेव प्रतिपन्नानां श्रुत्यन्तरेण कार्यकारण
भावप्रतिपादनेन कार्यकारणयोरैक्यप्रतिपादनेन चाविरुद्धमिति सिद्धं यथाग्नेयादीनां षड्यागानुत्पत्तिवाक्यैः पृथगुत्पन्नानामु
दयानुवादिवाक्येन समुदायद्वयत्वमापन्नानां दर्शपूर्णमासाभ्यामित्यधिकारवाक्यं कामिनः कर्तव्यतया विदधाति तथा
चिदचिदीश्वरान् विविक्तस्वरूपस्वभावान् क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः प्रधानक्षेत्रज्ञपतिर्गुणेशः पतिं वि
श्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं नारायणः पर इत्यादिवाक्यैः पृथक्प्रतिपाद्य यस्य पृथिवी शरीरं यस्यात्मा शरीरं यस्याव्यक्तं शरीरं यस्याक्षरं
शरीरं एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायण इत्यादिभिर्वाक्यैः चिदचितोः सर्वावस्था[illegible]वस्थितयोः परमात्म

त्मनानुप्रविश्येति जीवस्य ब्रह्मात्मकत्वं तदनुप्रविश्य सच्च त्यच्चाभवदिति विज्ञानं चाविज्ञानं चेत्यनेनैकार्थ्यादात्मशरीरभावनिबंधनमिति विज्ञायते
एवंभूतमेव नामरूपव्याकरणं तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियतेत्युच्यते अतः कार्यावस्थः कारणावस्थश्च स्थूल
सूक्ष्मचिदचिद्वस्तुशरीरः परमपुरुष एवेति कार्यस्य कारणस्यानन्यत्वेन कारणज्ञानेन कार्यस्य ज्ञाततयैकविज्ञानं च समीहितमु
पपन्नतरं अहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तिस्रो देवता इति सर्वमचिद्वस्तु निर्दि
श्य तत्र स्वात्मकजीवानुप्रवेशेन नामरूपव्याकरणवचनात्सर्वे वाचकाः शब्दा अचिज्जीवविशिष्टपरमात्मनः एव वाचका इति का
रणावस्थपरमात्मवाचिना शब्देन कार्यवाचिनः शब्दस्य सामानाधिकरण्यं मुख्यवृत्तं अतः स्थूलसूक्ष्मचिदचित्प्रकारकं ब्रह्मैव का
र्यं कारणं चेति ब्रह्मोपादानं जगत् सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्मैव कारणमिति ब्रह्मोपादानत्वेपि संघातस्योपादानत्वेन चिदचितो
र्ब्रह्मणश्च स्वभावासंकरोप्युपपन्नतरः यथा शुक्लकृष्णरक्ततंतुसंघातोपादानत्वेपि चित्रपटस्य तत्तत्तंतुप्रदेश एव शौक्ल्यादिसंबं
ध इति कार्यावस्थायामपि न सर्वत्र वर्णसंकरः तथा चिदचिदीश्वरसंघातोपादानत्वेपि जगतः कार्यावस्थायामपि भोक्तृत्वभोग्यत्व
नियंतृत्वाद्यसंकरः तंतूनां पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदाचित्संहतानां कारणत्वं कार्यत्वं च इह तु चिदचितोः सर्वावस्थाव
स्थितयोः परमपुरुषशरीरत्वेन तत्प्रकारतयैव पदार्थत्वात्तत्प्रकारः परमपुरुषः सर्वदा सर्वशब्दवाच्य इति विशेषः भा
वाभावात् विलक्षणत्वमुपपन्नतरं स्थूलावस्थस्य नामरूपविभागविभक्तस्य चिदचिद्वस्तुनः आत्मतयावस्थानात्कार्यत्वमप्यु
पपन्नतरं अवस्थान्तरापत्तिरेव हि कार्यता निर्गुणवादाश्च परस्य ब्रह्मणो हेयगुणासंबंधादुपपद्यन्ते अपहतपाप्मा विजरो
विमृत्युर्विशोको विजिघत्सोऽपिपासः इति हेयगुणान् प्रतिषिध्य सत्यकामः सत्यसंकल्पः इति कल्याणगुणान्विदधती श्रुतिरेवा
न्यत्र सामान्येनावगतं गुणनिषेधं हेयगुणविषयं व्यवस्थापयति ज्ञानस्वरूपं ब्रह्मेति वादश्च सर्वज्ञस्य सर्वशक्तेर्निखिलहेयप्रत्य
नीककल्याणगुणाकरस्य ब्रह्मणः स्वरूपं ज्ञानैकनिरूपणीयं स्वप्रकाशतया ज्ञानस्वरूपं चेत्यभ्युपगमादुपपन्नतरः यः सर्वज्ञः सर्ववित्

स्वभावभेदस्तदसंकरश्च तत्र चात्र च तुल्यः एवं च सति परस्य ब्रह्मणः
कार्यानुप्रवेशेपि स्वरूपान्यथा त्रुटि: ६

तिवचनं भूतलव्यतिरिक्तं ऽहनं देवदत्तेन छिन्नमित्येकस्यामेव छेदनक्रियायामस्य छेतुरस्याश्छेदनक्रियायाश्च
छेद्यानप्रवेशाच्च वनवद्रुपलायाम् अथ मस्तोता तास्य नाशहेतुभूतनिवर्तकज्ञानेस्वयं कर्त्ता च न भवति स्वनाशस्यापुरु
षार्थत्वात् तन्नाशस्य ब्रह्मस्वरूपत्वाभ्युपगमे भेदतद्दर्शनतन्मूलाविद्यादीनां कल्पनमेव न स्यादित्यलमनेन दिङ्
हतमुपदर्शितं तेन तस्मादनादिकर्मप्रवाहरूपात्तानमूलत्वाद्धर्मस्य पतन्निर्वेदेना मुक्तेन लक्षणं ज्ञानादेव तदुत्पत्ति
श्रवणाद्यनुष्ठीयमानपरमपुरुषार्थसाधनत्वे पात्मयाथात्म्यबुद्धिविशेषसंस्कृतवर्णाश्रमोचितकर्मलभ्यात्र केवलके
मोक्षमल्पास्थिरफलत्वमनभिसंहितफलपरमपुरुषार्थसाधनत्वे धर्मालोकमर्त्यलोमुपासनात्मकज्ञानोत्पत्तिद्वारेणा ब्रह्म
याथात्म्यानुभवरूपानन्तस्थिरफलत्वं च कर्मस्वरूपज्ञानाहिते न ज्ञायते केवलाकारपरित्यागपूर्वकं यथोक्तस्वरू
पकर्मोपादानं च न संभवतीति कर्मविचारानन्तरं तत एव हेतोर्ब्रह्मविचारः कर्त्तव्यः स्यादित्यर्थः तत्र पूर्वपक्षवादी मन्य
ते वृद्धव्यवहारादन्यत्र शब्दस्य बोधकत्वशक्त्यवधारणासंभवात् व्यवहारस्य कार्यबुद्धिपूर्वकत्वेन कार्यार्थ एव शब्दस्य
प्रामाण्यमिति कार्यरूप एव वेदार्थः अतो न वेदान्ताः परिनिष्पन्ने परे ब्रह्मणि प्रमाणभावमनुभवितुमर्हन्तीति न च पुत्रजन्मा
दिसिद्धवस्तुविषयवाक्येषु हर्षहेतूनां कालत्रयवर्त्तिनामर्थानामानन्त्यात् सुखस्वप्नसवजन्मादे हेतुत्वार्थान्तरोपनिपा
तसंभावनयाच्चापि यथार्थप्रतिपत्तिनिमित्तमुखविकासादिलिंगेनार्थविशेषबुद्धिहेतुत्वनिश्चयः नापि प्रवृत्तनेतरपदविभ
क्तपदार्थस्य पदं तदर्थनिश्चयेन वाप्तव्रत्यर्थनिश्चयेन वा भावस्य सिद्धवस्तुविधानशक्तिनिश्चयः लोककार्याभिधायिपदसमु
दायस्य तदंशविशेषनिश्चयरूपत्वात्तस्य न च सर्पांशीतस्य नायं सर्पो रज्जुरेषेति शब्दश्रवणानन्तरं भयनिवृत्तिदर्शनेन स
र्पाभावबुद्धिहेतुत्वनिश्चयः अत्रापि निश्चयेन निर्विषयभयेन न वस्त्विदमित्यादार्थबोधेषु बहुषु भयनिवृत्तिहेतुषु सत्सु
विशेषनिश्चयायोगात् कार्यबुद्धिसन्निवृत्तिव्याप्तिबलेन शब्दस्य सर्वत्र कार्यार्थविबोधित्वमवगतमिति सर्वपदानां कार्यपरत्वेन सर्वैः

कुर्वन्त्वसदकारिशब्दः तदितरः पिकशब्दः तत्र सदकारादिशब्दान्तरार्थनिश्चयेन पिकादिपदार्थनिश्चय इति सिद्धपरस्यापि शक्तिनिश्चायकं तस्मिंश्चे
न्न पिकमालभेते सादौ ज्ञात कार्यमिथार्थवाक्ये पिकपदार्थे तमिश्चयस्य एवं विना कार्यानिश्चयेपि ५ =

साध्यार्थ

निवर्त्तकज्ञानस्याप्रध्वस्तत्वात् नदध्यासतन्मूलाविद्यांतररूपत्वात् १६

नस्तदात्मतां च प्रतिपादयन्नाश्रीरिभूतपरमात्माभिधायिभिः सद्ब्रह्मात्मादिशब्दैः कारणावस्थः कार्यावस्थश्च परमात्मैक एवेति प्रप्र
कं प्रतिपन्नं वस्तु त्रितयं सदेव सोम्येदमग्र आसीत् ऐतदात्म्यमिदं सर्वं सर्वं खल्विदं ब्रह्मेत्यादिवाक्यं प्रतिपादयतीति विदन्ति च श्रु
श्रुतीरिताः परमात्मनः परमात्मशब्दाभिधाने हि नास्ति विरोधः यथा मनुष्यपिंडशरीरकस्यात्मविशिष्टस्यापि मनुष्यात्मशब्दे
त्मशब्देनाभिधानमित्यलमतिविस्तरेण यत्तु नार्दिदमुक्तं ब्रह्मात्मैकत्वविज्ञानेनैवाविद्यानिवृत्तिर्युक्तेति तदयुक्तं बंधस्य
पारमार्थिकत्वेन ज्ञाननिवर्त्यत्वाभावात् पुण्यापुण्यरूपकर्मनिमित्तदेवादिशरीरप्रवेशतत्प्रयुक्तसुखदुःखानुभवरूपस्य
बंधस्य मिथ्यात्वं कथमिव शक्यते वक्तुं एवंरूपबंधनिवृत्तिर्भक्तिरूपापन्नोपासनप्रीतपरमपुरुषप्रसादलभ्या इति पूर्वोक्तं भवदभि
मतस्यैव ज्ञानस्य यथावस्थितवस्तुविपरीतविषयस्य मिथ्यारूपत्वेन बंधविवृद्धिरेव फलं भवति तथा चोक्तं मिथ्यैव तदन्यद्
मृहीनेतितत्त्वद्व्यतायनातिरिक्तत्वात् उत्तमः पुरुषस्त्वन्यः पृथगात्मानं प्रेरितारं च मत्वेति जीवात्मविसजातीयस्य तदर्थामि
णो ब्रह्मणो ज्ञानं परमपुरुषार्थलक्षणमोक्षसाधनमित्युपदेशाच्च अपि च भवदभिमतस्य निवर्तकज्ञानस्यापि मिथ्यारूपत्वात्
अस्य निवर्तकान्तरं मृग्यं निवर्त्तकज्ञानमिदं स्वविरोधि सर्वं भेदजातं विनिवर्त्य क्षणिकत्वात् स्वयमेव नश्यतीति चेन्न तत्स्वरूपत
दुत्पत्तिविनाशानां कल्पनिकत्वेन विनाशतत्कल्पनाकल्पकरूपा अविद्या या निवर्त्तकांतरमन्वेषणीयं तद्विनाशो ब्रह्मस्वरूपमेवेति
चेत् तथा सति निवर्त्तकज्ञानोत्पत्तिरेव न स्यात् तद्विनाशे तिष्ठति तदुत्पत्त्यसंभवात् अपि च सन्मात्रब्रह्मव्यतिरिक्तकृत्स्ननिषे
धविषयज्ञानस्य कोयं ज्ञाता अध्यासरूप इति चेन्न तस्यापि निषेध्यतया निवर्त्तकज्ञानकर्मत्वात् तत्कर्तृत्वानुपपत्तेः ब्रह्मस्वरूपमे
वेति चेत् ब्रह्मणो निवर्त्तकज्ञानं प्रति ज्ञातृत्वं किं स्वरूपं उताध्यस्तं अध्यस्तं चेदयमध्यासः तन्मूलाविद्यांतरं च निवर्त्तकज्ञा
नाविषयतया तिष्ठत्येव निवर्त्तकज्ञानांतराभ्युपगमेऽनवस्था अपि त्रिरूपत्वात् ज्ञातृत्वे तयानवस्था स्यात् ब्रह्मस्वरूपस्यैव
ज्ञातृत्वे अस्मदीय एव पक्षः परिगृहीतः स्यात् निवर्त्तकज्ञानस्वरूपस्य तस्य च ज्ञाता च ब्रह्मव्यतिरिक्त इत्यनस्य निवर्त्यत्वानुगतामि

निवर्त्तकज्ञानविनाशस्य ब्रह्मस्वरूपत्वे सति ५ तस्य निवर्तकज्ञानस्य विनाशो ब्रह्मस्वरूपत्वे लानि ५ निवर्त्तक

२ निश्चय

इतः । तदन्वेष्टव्यं तद्विजिज्ञासितव्यं तत्रापि दहरं गगनं विशोकः तस्मिन्यदन्तः तदुपासितव्यमित्यादिभिः प्रतिपन्नोपासनवि
षयकार्य्याधिकरणफलत्वेन ब्रह्मविदाप्नोति परमित्यादिभिः ब्रह्मप्राप्तिः श्रूयते तद्गति ब्रह्मस्वरूपतद्विशेषणानां दुःखास
भिन्नदेशविशेषरूपस्वर्गादिवत् रात्रिसत्रप्रतिष्ठादिवत् अपगोरणशतयातनासाध्यसाधनभावकार्य्यापयोगि
तयैव सिद्धेः ग्रामकामो यजेतेत्यादिष्वपि वाक्येषु न कार्य्यार्थव्युत्पत्तिः भवदभिमतकार्य्यस्य दुर्निरूपत्वात् कृतिभावभावि
कृत्युद्देश्यत्वं हि भवतः कार्य्यत्वं कृत्युद्देश्यत्वं च कृतिकर्मत्वं कृतिकर्मत्वं च कृत्या प्राप्तुमिष्यमाणत्वम् उद्देश्यत्वं तमसं वस्तु वर्त्तमानं दुः
खनिवृत्तिर्वा तत्र वस्तु तावदिन्नापुरुषेण स्वप्रयत्नात् इतेपादितं सिद्धिः प्रतीता ततः प्रयत्नेन तु प्रवर्त्तते पुरुष इति न कश्चिदपी
च्छाविषयस्य कृत्यधीनसिद्धित्वमन्तरेण कृत्युद्देश्यत्वं नाम किञ्चिदप्युपलभ्यते इच्छाविषयस्य प्रेरकत्वं च प्रयत्नाधीन
सिद्धित्वमेव तत एव प्रवर्त्तते न च पुरुषानुकूलत्वं कृत्युद्देश्यत्वं यतः सुखमेव पुरुषानुकूलं न च दुःखनिवृत्तेः पुरुषानुकू
लत्वं पुरुषानुकूलं सुखं तत्प्रतिकूलं दुःखमिति सुखदुःखयोः स्वरूपविवेकः दुःखस्य प्रतिकूलतया तन्निवृत्तिरिच्छाभव
ति नानुकूलतया अनुकूलप्रतिकूलान्यतरविरहेणास्वरूपेणावस्थितिर्हि दुःखनिवृत्तिः अतः सुखव्यतिरिक्तस्य क्रियादेरनुकू
लत्वं न संभवति न च सुखार्थतया तस्याप्यनुकूलत्वं दुःखात्मकत्वात् तस्य सुखार्थतया पित्तदुपादाने इच्छामात्रमेव भवति न च
कृतिप्रतिशेषित्वं कृत्युद्देश्यत्वं भवत्यतोषि शेषित्वस्यानिरूपणात् न च परोद्देशप्रवृत्तकृतिव्याप्यत्वं शेषत्वमिति तत्रापि
सर्वाधिपृथ्वीसंवगम्यते तथापि तत्कृतेर्दोषत्वेनातिप्रतितन्साध्यस्य शेषित्वाभावात् न चोद्देशप्रवृत्त्यर्हतायाः शेषत्वे नप
रः पृथ्वीदृश्यत्वस्येव निरूप्यमाणत्वात् प्रधानस्यापि भक्त्योद्देशप्रवृत्त्यर्हत्वदर्शनाच्च प्रधानस्य भक्त्या योग्यतोद्देशेन
प्रवर्त्तत इति चेन्न भक्त्योपि हि प्रधानतो विषयोद्देशेनैव प्रवर्त्तते कार्य्यस्वरूपस्यैवानिरूपणात् कार्य्यप्रतिपत्तिविरोधी

कृत्य २

क्रियादेरपि

धात्वर्थत्वं

प॰ २

तथा तथा सर्वस्य सर्वथा ... गतिमत्त ... स्यते

नानन्वितार्थे कार्य्ये कार्य्यबुद्धिविनाकृः

पदैः कार्य्यस्यैवविशिष्टस्य प्रतिपादनान्नान्वितस्वार्थमात्रे पदशक्तिनिश्चयः इष्टसाधनताबुद्धिस्तु कार्य्यबुद्धिद्वारेण प्रवृत्तिहेतुर्नतु स्वरू
पेण अतीतानागतवर्त्तमानेष्टोपायबुद्धिषु प्रवृत्त्यनुपलब्धेः इष्टोपायो हि मत्प्रयत्नादृते न सिध्यतीति प्रतीमत्कृतिसाध्यः इति बुद्धि
र्यावन्नजायते तावन्नप्रवर्त्तते अतः कार्य्यबुद्धिरेव प्रवृत्तिहेतुरिति प्रवर्त्तकस्य शब्दवाच्यतया कार्य्यस्यैव वेदवेद्यत्वात् परि
निष्पन्नरूपब्रह्मप्राप्तिलक्षणेन न स्थिरफलाप्रतीतेः अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादिभिः कर्मणामेव
स्थिरफलत्वप्रतिपादनाच्च कर्मफलस्यास्थिरत्वं ब्रह्मज्ञानफलानां तु स्थिरत्वं ज्ञानहेतुको ब्रह्मविचारारंभो न युक्तः इति अत्राभि
धीयते निखिललोकविदितशब्दार्थसंबंधावधारणप्रकारमपनुद्य सर्वेषां शब्दानामलौकिके कार्य्ये बोधित्वावधारणे प्रामाणिका न
बहुमन्यन्ते एवं किल बाला शब्दार्थसंबंधमवधारयन्ति मातापितृप्रभृतिभिः अंबातातमातुलादीन् श्वपशुनरमृगपक्षिसर्प्पादींश्च
नमवेहि इमं चावधारयेत्यभिप्रायेणांगुल्या निर्दिश्यमानेषु तेषु तेषु शब्देषु बहुशः शिक्षिता बाला नैकैरेव शब्दैस्तेषु तेष्व
र्थेषु स्वात्मनानुभूत्यति इष्टशब्दार्थयोः संबंधान्तरादर्शनात् संकेतयितृपुरुषाभावाच्च तेष्वर्थेषु तेषां शब्दानां प्रयोगो बोधकत्वनिबंध
न इति निश्चिन्वन्ति पुनश्चाप्युत्तरकाले रगादिषु अप्ययमर्थ इति पूर्ववृद्धैः शिक्षिताः सर्वेषां शब्दानामर्थमवगम्य परस्यापनाय
तत्तदर्थावबोधिवाक्यजातं प्रयुंजते प्रकारान्तरेण विशब्दार्थसंबंधावगमः केनचित्स्वरूपेण हस्तचेष्टादिनापि तातेन सुखमा
स इति देवदत्ताय ज्ञापयेति प्रेषितः कश्चित् ज्ञापने प्रवृत्तः पिता ते सुखमास्ते इति शब्दं प्रयुंक्ते पार्श्वस्थो मूकोऽव्युत्पित्सुः मूकवच्चेष्टा
विशेषमस्तज्ञापने प्रवृत्तमिमं ज्ञात्वानुगतस्तज्ञापनाय प्रयुक्तं शब्दमिमं श्रुत्वा यं शब्दस्तदर्थबुद्धिहेतुरिति निश्चिनोतीति
कार्य्यार्थ एव व्युत्पत्तिरिति निर्बंधो निर्बंधनः अतो वेदान्ताः परिनिष्पन्नं परं ब्रह्म तदुपासनं च अपरिमितफलं बोधय
न्तीति तन्निर्णयफलो ब्रह्मविचारः कर्त्तव्यः कार्य्यार्थत्वेपि वेदस्य ब्रह्मविचारः कर्त्तव्य एव कथं आत्मा वा अरे द्रष्टव्यः श्रोत
व्यो मन्तव्यो निदिध्यासितव्यः सोन्वेष्टव्यः स विजिज्ञासितव्यः विज्ञाय प्रज्ञां कुर्वीत दहरोस्मिन्नन्तर आकाशस्तस्मिन्य

वलिङ्गादेर्वीच्यमित्यध्यवसीयते यथा स्वर्गकामो यागादेरग्न्यादिदेवतानां तथापि परमपुरुषसमाराधनरूपतासमाराधितात्परमपुरुषात्फल
सिद्धिश्चेति फलमप्युपपन्नमित्यत्र प्रतिपादयिष्यते अतो वेदान्तापरिनिष्पन्नं परं ब्रह्म बोधयतीति ब्रह्मोपासनफलानन्तस्थि
रत्वं च सिद्धं चातुर्मास्यादिकर्मस्वपि केवलस्य कर्मणः क्षयिफलत्वमुपदेशान्तरे क्षय्यफलश्रवणे वायुश्रुतिरिष्टं चैतदस्मिन्नामि
त्यादि विद्यायत्किञ्चिन्मतं त्वयम् अतः केवलानां कर्मणामल्पास्थिरफलत्वाद्ब्रह्मज्ञानस्य चानन्तस्थिरफलत्वात्तन्निर्णयफलो ब्र
ह्मविचारारम्भो युक्त इति स्थितं किं पुनस्तद्ब्रह्म यज्जिज्ञास्यमुच्यत इत्यत्राह जन्माद्यस्य यतः जन्मादीति सृष्टिस्थितिप्रलयं
तद्गुणसंविज्ञानो बहुव्रीहिः अस्याचिन्त्यविविधविचित्ररचनस्य नियतदेशकालफलभोगब्रह्मादिस्तम्बपर्यन्तक्षेत्रज्ञमिश्र
स्य जगतः यतः यस्मात्सर्वेश्वरान्निखिलहेयप्रत्यनीकस्वरूपात्सत्यसंकल्पाज्ज्ञानानन्दैकघनात्कल्याणगुणात्सर्वज्ञात्सर्व
शक्तेः परमकारुणिकात्परस्मात्पुंसः सृष्टिस्थितिप्रलयाः प्रवर्तन्ते तद्ब्रह्मेति सूत्रार्थः भृगुर्वै वारुणिः वरुणं पितरमुपस
सार अधीहि भगवो ब्रह्मेत्यारभ्य यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व
तद्ब्रह्मेति श्रूयते तत्र संशयः किमस्माद्वाक्याद्ब्रह्मलक्षणतः प्रतिपत्तुं शक्यते न वेति किं प्राप्तं न शक्यमिति न तावज्जन्मादयो
विशेषणत्वेन ब्रह्म लक्षयन्ति अनेकविशेषणव्यावृत्तत्वेन ब्रह्मणोऽनेकत्वप्रसक्तेः विशेषणत्वं हि व्यावर्तकत्वं ननु देवदत्तः
श्यामो युवा लोहिताक्षः समपरिमाण इत्यत्र विशेषणैर्बहुभिरप्येक एव देवदत्तः प्रतीयते एवमत्राप्येकमेव ब्रह्म भवति नैवं त
त्र प्रमाणान्तरैरैक्यप्रतीतेरेकस्मिन्नेव विशेषणानामुपसंहारः अन्यथा तत्रापि व्यावर्तकत्वेनानेकत्वमपरिहार्यं अत्र तु
नैव विशेषणेनाखिललक्षयिषितत्वाद्ब्रह्मणः प्रमाणान्तरेणैक्यमनवगतमिति व्यावर्तकभेदेन ब्रह्मबहुत्वमवर्जनीयम्
ब्रह्मशब्दैक्यादत्राप्यैक्यं प्रतीयत इति चेन्न अज्ञातगोव्यक्तिजिज्ञासोः पुरुषस्य खण्डो मुण्डः पूर्णशृङ्गो गौरित्युक्ते गोपदैक्येऽपि
खण्डत्वादिव्यावर्तकभेदेन गोव्यक्तिबहुत्वप्रतीतेः अत्र व्यक्तेयापि च ... अत एव लिलक्षयिषितवस्तुन्यपि विशेषणानां

सुखानवलोः २ नियोगस्य   स्वयमेवप्रयोजनरूपस्य

त्यप्रसंगतं नापि कृतिप्रयोजनत्वं कृत्युद्देश्यत्वं पुरुषस्य कृत्यारंभप्रयोजनमेव हि कृतिप्रयोजनं स चेच्छाविषयः त
स्मादिष्टत्वातिरेकि कृत्युद्देशिलानिरूपणात् कृतिसाध्यता कृतिप्रधानत्वस्वरूपं कार्यं दुर्निरूपमेव नियोगस्यापि सातादि
च्छाविषयमतसुखदुःखनिवृत्तिभ्यामन्यत्वात्तत्साधनतयैवेष्टत्वं कृतिसाध्यत्वं च अत एव हि तस्य क्रियातिरिक्तता अन्यथा
क्रियैव कार्यं स्यात् स्वर्गकामपदसमभिव्याहारानुगुण्येन लिङादिवाच्यं कार्यं स्वर्गसाधनमेवेति तल्लाभ[illegible]ककर्मातिरेकि स्थिरं
स्वर्गसाधनमपूर्वमेव कार्यमिति स्वर्गसाधनताक्लृप्तेरेव तदपूर्वव्युत्पत्तिः अतः प्रथममनन्यार्थतया प्रतिपन्नस्य कार्य
स्यानन्यार्थत्वनिर्वहणायापूर्वमेव पश्चात्स्वर्गसाधनं भवतीत्युपगमे स्वर्गकामपदान्वितकार्याभिधायिपदेन प्रथममप्य
नन्यार्थतानभिधानात् सुखदुःखनिवृत्तितत्साधनेभ्योन्यस्यानन्यार्थस्य कृतिसाध्यताप्रतीत्यनुपपत्तेश्च अपि च किमिदं नि
योगस्य प्रयोजनत्वं सुखवन्नियोगस्याप्यनुकूलत्वमेवेति चेत् किं नियोगः सुखं सुखमेव ह्यनुकूलं सुखविशेषवन्नियोगा
परपर्यायं विलक्षणसुखांतरमिति चेत् किं तत्र प्रमाणमिति वक्तव्यं स्वानुभव इति न। विषयविशेषानुभवसुखवन्नि
योगानुभवसुखमिदमिति भवतापि नानुभूयते शास्त्रेणानियोगस्य पुरुषार्थतया प्रतिपादनात् तत्प्रत्यक्षेण भोक्ष्यत इति चे
दितन्नियोगस्य पुरुषार्थत्वाभिधायि शास्त्रं न तावल्लौकिकं वाक्यं तस्य दुःखात्मके क्रियाविषयत्वात् तेन सुखादिसाधन
तयैव कृतिसाध्यतामात्रप्रतिपादनात् नापि वैदिकं तेनापि स्वर्गसाधनतयैव कार्यस्य प्रतिपादनात् नापि नित्यनैमित्तिक
शास्त्रं तस्यापि तदभिधायित्वे स्वर्गकामवाक्यस्यापूर्वव्युत्पत्तिपूर्वकत्वमित्युक्तनीत्या तेनापि सुखादिसाधनभूतकार्याभिधा
नमवर्जनीयं नियते हि कफलस्य कर्मणोनुष्ठितस्य फलत्वेन तदानीमननुभूयमानान्नापरोगतादिव्यतिरेकेण नियोगरूप
सुखानुभवानुपलब्धेश्च नियोगसुखमित्यत्र न लिंगं न प्रमाणमुपलभामहे अर्थवादादिष्वपि स्वर्गादिसुखप्रकारकीर्तनवन्
नियोगरूपसुखप्रकारकीर्तनं भवता [illegible] साध्यतामात्रे शब्दानुशासनसिद्धमे

ध्वर्थस्य

नियोग

योगा

न प्रतिपन्नस्य जगज्जन्मादिकारणस्य ब्रह्मणः सकलेतरव्यावर्तकं स्वरूपमभिधीयते सत्यं ज्ञानमनन्तं ब्रह्मेति तत्र सत्यप
दं निरुपाधिकसत्तायोगि ब्रह्माह । तेन विकारास्पदमचेतनं तत्संसृष्टश्चेतनो व्यावृत्तः नामान्तरभजनार्हावस्थान्तरयोगे
न तयोर्निरुपाधिकसत्तायोगरहितत्वात् ज्ञानपदं नित्यासंकुचितज्ञानैकाकारमाह तेन कदाचित्संकुचितज्ञानत्वेन मु
क्ता व्यावृत्ताः अनन्तपदं देशकालवस्तुपरिच्छेदरहितस्वरूपमाह सगुणत्वात् स्वरूपस्य स्वरूपेण गुणैश्चान
न्त्यं तेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणाः सातिशयस्वरूपस्वगुणा नित्या व्यावृत्ताः विशेषणानां व्यावर्तक
त्वात् ततस्सत्यं ज्ञानमनन्तं ब्रह्मेत्यनेन वाक्येन जगज्जन्मादिनावगतस्वरूपं ब्रह्म सकलेतरवस्तुविसजातीयमिति लक्षणतः प्रति-
ज्ञायत्वाश्रयणं अतः सकलजगज्जन्मादिकारणं निरवद्यं सर्वज्ञं सत्यसंकल्पं सर्वशक्ति ब्रह्म लक्षणतः प्रतिपत्तुं श
क्यत इति सिद्धं । येतु निर्विशेषं वस्तु जिज्ञास्यमिति वदन्ति तन्मते ब्रह्मजिज्ञासा जन्माद्यस्य यत इत्यसंगतं स्यात् ॥
निरतिशयबृहत्त्वं बृंहणं च ब्रह्मेति निर्वचनात् तच्च ब्रह्म जगज्जन्मादिकारणमिति वचनाच्च एवमुत्तरेष्वपि सूत्रगणे
षु ॥ सूत्रोदाहृतश्रुतिगणेषु चेक्षणाद्यन्वयदर्शनात् सूत्राणि सूत्रोदाहृताः श्रुतयश्च न तत्प्रमाणं तर्कश्च साध्य
धर्माव्यभिचारिसाधनधर्मान्वितवस्तुविषयत्वान्न निर्विशेषवस्तुनि प्रमाणं जगज्जन्मादिभ्रमो यतः तद्ब्रह्मेति
स्वोत्प्रेक्षापक्षे च न निर्विशेषवस्तुसिद्धिः भ्रममूलमज्ञानमज्ञानसाक्षि ब्रह्मेत्यभ्युपगमात् साक्षित्वं हि प्रकाशैकरस
तयोच्यते प्रकाशत्वं तु जडाद्व्यावर्तकं स्वस्य परस्य च व्यवहारयोग्यतापादनस्वभावेन भवति तथा सति सविशेषत्वं
तदभावे प्रकाशतैव न स्यात् तुच्छतैव स्यात् ॥ जगज्जन्मादिकारणं ब्रह्म वेदान्तवेद्यमित्युक्तं तदयुक्तं तद्धि न वाक्यप्रतिपाद्यं
अनुमानसिद्धत्वादित्याशङ्क्याह शास्त्रयोनित्वात् ॥ शास्त्रं यस्य योनिः कारणं प्रमाणं तच्छास्त्रयोनि तस्य भावः शा

३०

संभयलक्षणत्वमनुपपन्नं नाप्युपलक्षणत्वेन लक्षयन्तीति आकारान्तराप्रतिपत्तेः उपलक्षणानामेकेनाकारेण प्रतिपन्नस्य
केनचिदाकारान्तरेण प्रतिपत्तिहेतुत्वं हि दृष्टं यथायं स आस्ते सः देवदत्तः केदार इत्यादिषु ननु च सत्यं ज्ञानमनन्तं ब्रह्मेति प्रतिपन्ना
कारस्य जगज्जन्मादीन्युपलक्षणानि भवेयुरिति न इतरेतरप्रतिपन्नाकारापेक्षत्वेनोभयोर्लक्षणवाक्ययोरन्योन्याश्रयणात्
प्रतीतानलक्षणत्वेन ब्रह्म प्रतिपत्तुमशक्यत्वादित्येवं प्राप्तेऽभिधीयते जगत्सृष्टिस्थितिप्रलयैरुपलक्षणीभूतैर्ब्रह्म प्रतिपत्तुं शक्यते
न चोपलक्षणोपलक्ष्याकारव्यतिरिक्ताकारान्तराप्रतिपत्तेर्ब्रह्मणोऽप्रतिपत्तिः उपलक्ष्यस्यानवधिकातिशयबृहत्त्वं ब्रह्म
बृहत्त्वे धात्वर्थत्वात् तदुपलक्षणभूताश्च जगज्जन्मस्थितिलयाः यतो येन यदिति प्रसिद्धवज्जन्मादिकारणं निर्दिश्य
यथाश्रुतिसिद्धं जन्मादिकारणमनूद्यते प्रसिद्धिश्च सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्
तेजोऽसृजत इत्येकस्यैव सच्छब्दवाच्यस्याभिन्ननिमित्तोपादानरूपकारणत्वेन तदपि सदेवेदमग्र एकमेवासीदित्युपादानतां प्रति
पाद्याद्वितीयमित्यधिष्ठात्रन्तरं प्रतिषिध्य तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्येकस्यैव प्रतिपादनात्तस्माद्यन्मूला
जगज्जन्मस्थितिलयास्तद्ब्रह्मेति जगज्जन्मस्थितिलयाः स्वनिमित्तोपादानभूतं वस्तु ब्रह्मेति लक्षयन्ति जगन्निमित्तोपा
दानतां लिप्सर्वज्ञत्वसत्यसंकल्पत्वविचित्रशक्तित्वाद्याकारं बृहत्त्वेन प्रतिपन्नं ब्रह्मेति च जन्मादीनां तथाप्रतिपन्नस्योपल
क्षणत्वेन नाकारान्तराप्रतिपत्तिकृतानुपपत्तिः जगज्जन्मादीनां विशेषणतया लक्षणत्वेऽपि न कश्चिद्दोषः लक्षणभू
तान्यपि विशेषणानि स्वविरोधिव्यावृत्तं ब्रह्म लक्षयन्ति अस्तानस्वरूपत्वे वस्तुन्येकस्मिन्निलक्षणापि विधित्वेऽपि परस्पराविरो
धानेकविशेषणलक्षणत्वेन भेदमापादयन्ति विशेषणानामेकाश्रयताप्रतीतेरेकस्मिन्नेवोपसंहारात् खण्डत्वाद
वस्तुविरोधादेव गोव्यक्तिभेदमापादयन्ति अत्र तु कालभेदेन जन्मादीनां न विरोधः यतो वा इमानि भूतानि जाय

गं स्वशरीरमेकचेतनायत्तोत्पत्तिस्थितिः तच्छरीरस्य भोक्तृत्वेन भार्यादिसर्वचेतनानामदृष्टजन्यत्वात्तदुत्प
त्तिस्थित्योः किं च शरीरावयविनः स्वावयवसमवेततारूपा स्थितिरवयवसंश्लेषविशेषमात्रेण केनचिच्चे
तनमपेक्ष्यते प्राणेन लक्षणेनानुस्थितिः पक्षत्वाभिमतेषु क्षितिजलधिमहीधरादिके न संभवतीति पक्षसपक्षा
नुगतामेकरूपां स्थितिं नोपलभामहे तदायत्तप्रवृत्तित्वं तदधीनत्वमिति चेत् अनेकचेतनसाध्येषु गुरुतर

रथधिल्लामहीधरादिषु व्यभिचारः चेतनमात्राधीनत्वे सिद्धसाध्यता किं च उभयवादिसिद्धानां जीवाना
मेव लाघवबन्धायेन कर्तृत्वाभ्युपगमो युक्तः न च जीवानामुपादानाद्यनभिज्ञतया कर्तृत्वासंभवः सर्वेषा
मेव चेतनानां पृथिव्याद्युपादानयागाद्युपकरणसाक्षात्कारसामर्थ्यात् यथेदानीं पृथिव्यादयो यागादय
श्चप्रमाणमीक्षन्ते उपकरणभूतयागादिशक्तिरूपापूर्वादिशब्दवाच्यादृष्टसाक्षात्काराभावेपि चेतना
नां न कर्तृत्वानुपपत्तिः तत्साक्षात्कारानपेक्षणात्कार्यारंभस्य शक्तिमत्साक्षात्कार एव हि कार्यारंभोपयो
गी शक्तिस्तु ज्ञानमात्रमेवोपयुज्यते न साक्षात्कारः न हि कुलालादयः कार्योपकरणभूतदंडचक्रादिवत्तच्छक्ति तेषां
मपि साक्षात्कृत्य घटमणिकादिकार्यमारभन्ते इत्थं तु चेतनानामागमावगतयागादिशक्तिविशेषाणां कार्या
रंभो नानुपपन्नः किं च यच्छब्दक्रियं शब्दोपादानादिविज्ञानं चेतनं देवतदभिज्ञकर्तृकं दृष्टं महीमहीधरमहार्ण
वादित्वथाकक्रियमथ शब्दोपादानादिज्ञानं चेति न चेतनकर्तृकं अतोहि घटमणिकादिसजातीयशाक्यक्रियश
ब्दोपादानादिविज्ञानानुगतमेव कार्यत्वं बुद्धिमत्कर्तृपूर्वकत्वसाधने प्रभवति किं च घटादिकार्यमनीश्व

यदुक्तादि अतोपादानादेरकर्तृकं शब्दक्रियाशब्दोपादानाद्यभिज्ञानत्वात् [illegible] महीमहीधरादिकार्यं
यत्सोपादानादिकर्तृकं तच्छब्दक्रियं [illegible]
शब्दोपादानविज्ञानत्वं

स्त्रयोनित्वं तस्मात् ब्रह्मज्ञानकारणत्वाच्छास्त्रस्य तद्योनित्वं ब्रह्मणः अत्यंतातीन्द्रियत्वेन प्रत्यक्षादिप्रमाणा
विषयतया ब्रह्मणः शास्त्रैकप्रमाणत्वादुक्तरूपं ब्रह्म यतो वा इमानि भूतानि जायंत इत्यादिवाक्यं बोधयतीत्ये
वमर्थः। ननु शास्त्रयोनित्वं ब्रह्मणो न संभवति प्रमाणांतरवेद्यत्वाद् ब्रह्मणः अप्राप्ते तु शास्त्रमर्थवत्। किंत
र्हि तत्र प्रमाणं न तावत्प्रत्यक्षं तद्धि द्विविधं इन्द्रियसंभवं योगसंभवं चेति इन्द्रियसंभवं च बाह्यसंभवमांत
रसंभवं चेति द्विविधं॥ बाह्येन्द्रियाणि विद्यमानसन्निकर्षयोग्यस्वविषयबोधजनकानीति न सर्वार्थ
साक्षात्कारतन्निर्माणसमर्थपरमपुरुषविशेषविषयबोधजनकानि नाप्यांतरं सुखादिव्यतिरिक्ते ब
हिर्विषये स्वतंत्रस्य बाह्येन्द्रियानपेक्षस्य प्रवृत्त्यनुपपत्तेः। नापि योगजन्यं भावनाप्रकर्षपर्यंतजन्मनस्तस्य वि
शदावभासत्वेऽपि पूर्वानुभूतविषयस्मृतिमात्रत्वात् न प्रामाण्यमिति कुतः प्रत्यक्षता तदतिरिक्तविषयत्वे
कारणाभावात्। तथा सति तत्स्वभावस्वरूपता नाप्यनुमानं विशेषतो दृष्टं सामान्यतो दृष्टं वा अतीन्द्रिये वस्तु
नि संबंधावधारणाविरहान्न विशेषतो दृष्टम्। समस्तवस्तुसाक्षात्कारतन्निर्माणसमर्थपुरुषविशेषनियतं
सामान्यतो दृष्टमपि न लिंगमुपलभ्यते। ननु जगतः कार्यत्वं तदुपादानोपकरणसंप्रदानप्रयोजनाभिज्ञ
कर्तृकत्वव्याप्तम्। अचेतनारब्धत्वं जगत एकचेतनाधीनत्वेन व्याप्तं। सर्वं हि घटादिकार्यं तदुपादानो
पकरणसंप्रदानाभिज्ञकर्तृकं दृष्टं। अचेतनारब्धमरोगस्वशरीरमेकचेतनाधीनं च सावयवत्वेन जगतः का
र्यमुच्यते किमिदमेकचेतनाधीनत्वं न तावत्तदायत्तोत्पत्तिस्थितित्वं दृष्टांतो हि साध्यविकलः स्यात्। न ह्यरो
त्व

पूर्वानुभूत-
व्यतिरिक्तत्वे

पूर्वानुभूतविषयात्तदतिरिक्तवे... तत्स्वभावस्वरूपता...
अभवद्यादि जगत् ... कार्यत्वात् घटादिवत्
अभवद्यादिजगत् एकचेतनाधीनं अचेतनारब्धत्वात् अरोगस्वशरीरवत्

श्री ननु बीजांकुरादिः चेतनानधिष्ठितमेव कार्य्यं करोतीति ३ — सुखादयोपि चेतनमनपेक्ष्यैव सुखस्य स्वहेतवः कार्यं कुर्वन्तीति ३
भो धर्माधर्मौ चेतनानधिष्ठितौ सद्भावे सति फलप्रदातारौ
४१ प्रयत्नवात् सुखादिवत् अचेतनत्वाद्यासिद्धिः जगदेव चिन्त्यं सर्वत्रैः १ — देवदत्तादिभिः ३ — कर्मणोन्यत्र

उः खोपभोगे चेतनानधिष्ठितयोर् चेतनयोस्तयोः फलहेतुत्वानुपपत्तेः सर्वधर्म्मानुगुणसर्वफलप्रदानचतुरः कश्चिदधिष्ठाता
यः पर्जन्य किंनानधिष्ठितस्य वास्यादेर् चेतनस्य देशकालाद्यनेकपरिकरसन्निधाने पि यूपादिनिर्माणसाधनत्वादर्शना
त् बीजांकुरादेः पक्षान्तर्भावेन तैर्व्यभिचाराभावे श्रोत्रियवेतालानामनभिज्ञतापि जृंभितम् ततएव सुखादिभिर्व्य
भिचारदर्शनवचनमपि तथैव न च लाघवेनोभयवादिसंप्रतिपन्नक्षेत्रज्ञानामेवैकं समधिष्ठातृत्वकल्पनं युक्तम्
तेषां सूक्ष्मव्यवहितविप्रकृष्टदर्शनशक्तिनिश्चयात् दर्शनानुगुणैव हि सर्वत्र शक्तिकल्पना न चैतेषामेवदीश्वरस्याशक्ति
रण ६ निश्चयोस्ति अतः प्रमाणान्तरतो न तत्सिध्यनुपपत्तिः समर्थकर्तृपूर्वकत्वे नियतकार्यत्वहेतुना सिध्यन स्वाभाविकसर्वार्थ
साक्षात्कारतन्नियमनशक्तिसंपन्न एव सिध्यति यत्वनेन पर्याप्पादनेन धर्मविशेषविपरीतसाधनत्वमुन्नीतं तदनुमानस्व
40 तानभिज्ञत्वनिबंधनं सपक्षेष्वेव हि घटादीनां सर्वेषां कार्याणां हेतुभूतानां चेतनानां लिंगिनि न प्राप्तेः एतदुक्तं भवति केनचिक्रि
चिक्रियमाणेत्वोत्पत्तये कर्तृस्वं निर्माणसामर्थ्यं तस्योपादानोपकरणज्ञानाद्यामेवस्योपतानुपपन्नायां संवधितयादर्शन ७
मात्रेण किं विवक्षितस्यार्थान्तरज्ञानादेर्हेतुत्वकल्पनायोगादिति किंच क्रियमाणवस्तुव्यतिरिक्तार्थज्ञानादि किं सर्वविषयं
क्रियोपयोगि उत कतिपयविषयं न तावत्सर्वविषयम् नहि कुलालादिः क्रियमाणव्यतिरिक्तं किंचिन्न जानाति नापि कति
पयविषये सर्वेषु कर्तृषु तत्तदुपयुक्तज्ञानाद्यनियमेन सर्वेषामज्ञानादीनां अभिप्रायात् अतः कार्यत्वस्य साधकानामनीश्वर
त्वादीनां लिंगिनि प्राप्तिरिति न विपरीतसाधनत्वं कुलालादीनां दंडचक्राद्यधिष्ठाने शरीरद्वारेण दृष्टमिति जगदुपादाने
पकरणाधिष्ठानमीश्वरस्याशरीरस्यानुपपन्नमिति चेन्न संकल्पमात्रेणेव परशरीरगतभूतवेतालगरलाद्यपगमविनाशदर्श
नात् कथमशरीरस्येश्वरस्य परप्रवर्तनरूपसंकल्प इति चेन्न शरीरापेक्षः संकल्पः शरीरस्य संकल्पे हेतुत्वाभावात् मनः एवहि
ईश्वरस्य जगदुपादानोपकरणाधिष्ठानमशरीरत्वात् पन्नैवं तन्नैवंयथामुक्तादिः — ज्ञानं चापेक्षते तन्निवृत्यासामर्थ्यमन्याज्ञाने चहेतुत्वाभावात् निर्माणसामर्थ्यस्वी
कार्यं चापि प्रसिद्धानेनमनामादि हेतु अभिचारादि सर्वैः ४ — ४१

रेणाल्पज्ञानशक्तिना सशरीरेण परिग्रहवता नाप्तकामेन निर्म्मितं दृष्टमिति तथाविधमेव चेतनं कर्त्तारं सा
धयन्नयं कार्यत्वहेतुः सिषाधयिषितपुरुषसार्वज्ञसर्वैश्वर्य्यादिविपरीतसाधनाद्विरुद्धः स्यात् न चैतावता
सर्वानुमानोच्छेदप्रसंगः लिंगिनि प्रमाणान्तरगोचरे लिंगबलोपस्थापिता विपरीतविशेषास्तत्प्रमा
णप्रतिहतगतयो हि निवर्त्तन्ते इह तु सकलेतरप्रमाणाविषये लिंगिनि निखिलजगन्निर्माणचतुरे अन्वय
व्यतिरेकावगताविनाभावनियमा धर्माः सर्व एव विशेषेण प्रसज्यन्ते निवर्त्तकप्रमाणाभावात्तथैवावति
ष्ठते अत आगमादृते कथमीश्वरः सिध्यतीति अत्राहुः सावयवत्वादेव जगतः कार्यत्वं न प्रत्याख्यातुं शक्यते
भवन्ति च प्रयोगाः विवादाध्यासिता भूभूधरादि कार्यं सावयवत्वात् घटादिवत् तथा विवादाध्यासितं भु
वनिजलमहीधरादि कार्यं महत्त्वे सति क्रियावत्त्वात् घटादिवत् तनुभुवनादि कार्यं महत्त्वे सति मूर्त्तत्वात् घ
टादिवत् सावयवेषु द्वेष्वपि दृष्टमेव क्रियते नेतरदिति कार्यत्वस्य नियामकं सावयवत्वातिरेकि रूपान्तरं नोप
लभामहे। कार्यत्वप्रतिनियतं शक्यक्रियत्वं शक्योपादानादिविज्ञानत्वं चोपलभ्यत इति चेन्न। कार्यत्वे
नानुमितेऽपि विषये ज्ञानशक्तीकार्यानुमेयेऽन्यत्रापि सावयवत्वादिना कार्यत्वं ज्ञातमिति तेन प्रतिपन्नत्वे
ति न कश्चिद्विशेषः अदृष्टपूर्वे विचित्रसन्निवेशं नरेन्द्रभुवनमालोक्यावयवसन्निवेशविशेषेण तस्य
कार्यत्वं निश्चित्य तदानीमेव कर्त्तुस्तज्ज्ञानशक्तिवैचित्र्यमनुमिनोति अतस्तनुभुवनादेः कार्यत्वे सिद्धे सर्वसा
क्षात्कारतन्निर्माणादिनिपुणः कश्चित्पुरुषविशेषः सिध्यतीति [illegible] चेतनानां धर्माधर्मनिमित्तोऽपि सुख

तथा हि॥ घटमणिकादिषु कृतेषु कार्यत्वदर्शनानुमित घटादयपि४ तनुभुवनादि निर्विवादं जगत

स्वरूपाद्भिन्ना।

सर्ववस्तुगतत्वे कार्यत्वस्यासिद्धता क्रमेणोत्पद्यमानसर्ववस्तुगतत्वे तैककर्तृकत्वसाधनाविरुद्धता अत्रार्थैककर्तृकत्वसाध
नेप्रत्यक्षानुमानविरोधः शास्त्रविरोधश्च कुंभकारो जायते रथकारश्चेत्यादिश्रवणात् अपि च सर्वे वा कार्याणां शरीरा
दीनां सत्त्वादिगुणकार्यरूपत्वाद्यन्वयदर्शनेन सत्त्वादिमूलत्वमापतितं कार्यवैचित्र्यहेतुभूताः कारणगताः सत्त्वादयो
निरोधास्तेषां कार्याणां तन्मूलत्वापादनात् पुरुषान्तःकरणविकारतो वा पुरुषस्य च तद्योगः कर्ममूल इति कार्यविशे
षारंभाय ज्ञानशक्तिवत्कर्तुः कर्मसंबंधः कार्यहेतुत्वेनैवावश्यमभ्युपगमनीयः ज्ञानशक्तिवैचित्र्यस्य कर्ममूलत्वात् इच्छायाः का
र्यारंभहेतुत्वेपि विषयविशेषविशेषिताया स्तस्याः सत्त्वादिमूलत्वेन कर्मसंबंधोऽवर्जनीयः अतः क्षेत्रज्ञा एव कर्तारः न त्वधिकः स
कश्चिदनुमानातिरिक्तः कर्ता भवतीति प्रयोगाः तनुभुवनादि नैककर्तृकं कार्यत्वात् घटवत् ईश्वरः कर्ता न भवति प्रयोजन
शून्यत्वान्मुक्तवत् ईश्वरः कर्ता न भवति अशरीरत्वात् तद्वदेव न च क्षेत्रज्ञानां स्वशरीराधिष्ठाने व्यभिचारः तत्राप्यना
देः सूक्ष्मशरीरस्य भावात् विमतिविषयः कालो न लोकशून्यः कालत्वात् वर्तमानकालवत् अपि च किमीश्वरः सशरी
रोऽशरीरो वा कार्यं करोति न तावत्सशरीरः तस्य कर्तृत्वानुपलब्धेः मानत्वा अपि कार्याणि सशरीरस्येव भवंति मनसो नित्य
त्वेऽप्यशरीरे मुक्ते एतत्कार्यादर्शनात् नापि अशरीरः विकल्पासहत्वात् तच्छरीरं किं नित्यमनित्यं वा न तावन्नित्यं सावय
वस्य तस्य नित्यत्वे न जगतोऽपि नित्यत्वाविरोधादीश्वरासिद्धेः नाप्यनित्यं तद्व्यतिरिक्तस्य तच्छरीरहेतोस्तदानीमभावात् स्वय
मेव हेतुरिति चेन्न अशरीरस्य तदयोगात् अन्येन शरीरेण सशरीर इति चेन्न अनवस्थानात् स किं सव्यापारो वा निर्व्यापारो वा अ
शरीरत्वादेव न सव्यापारः। नापि निर्व्यापारः कार्यं करोति मुक्तवत् कार्यं जगदिच्छामात्रव्यापारकर्तृकमित्युक्तमाने पक्षस्याप्र
सिद्धविशेषणत्वं दृष्टांतस्य साध्यहीनता अतो दर्शनानुगुण्येनेश्वरानुमानं दर्शनानुगुण्यपराहतमिति शास्त्रैकप्रमाणकः

ईश्वरो न जगदुपादानं भिन्नत्वात् कुलालादिवत्, आकाशादि न कार्यं निरवयवत्वात् यत्कार्यं तत्सावयवं दृष्टं यथा घटादि नेदं तथा

संकल्पहेतुः तदभ्युपगतमीश्वरेपि कार्यत्वेनैव ज्ञानवृत्तिं मनसोपि प्राप्तत्वान्मानसः संकल्पः सशरीरस्य सशरीरस्येव समनस्क-
त्वादिति चेन्न मनसो नित्यत्वेन देहापगमेपि मनसस्तस्य ज्ञाने नानैकान्तिकत्वात् अतो विचित्रावयवसन्निवेशविशेषतनुभुवना-
दिकार्यनिर्माणे पुण्यपापपरवशपरिमितशक्तिमान् क्षेत्रज्ञो न भवतीति निखिलभुवननिर्माणचतुरो ऽचिंत्यापरिमितज्ञानशक्त्यै-
श्वर्यो ऽशरीरः संकल्पमात्रसाधनपरिनिष्पन्नानंतविस्तारविचित्ररचनप्रपंचः पुरुषविशेष ईश्वरोनुमानेन सिध्यति अतः प्र-
माणांतरावसेयत्वं ब्रह्मणः नैव शास्त्रं ब्रह्म प्रतिपादयति किंचात्यन्तभिन्नयोरेव मृद्द्रव्यकुलालयोर्निमित्तोपादानत्वदर्शनेन
आकाशादेर्निरवयवद्रव्यस्य कार्यत्वानुपपत्त्या चैकमेव ब्रह्म कृत्स्नस्य जगतो निमित्तमुपादानं च प्रतिपादयितुं शक्नोति वेदप्रा-
माणमः यथोक्तलक्षणं ब्रह्म जन्मादिवाक्यं बोधयत्येव कुतः; धर्मास्वैकप्रमाणकत्वाद्ब्रह्मणः यदुक्तं सावयवत्वादिना कार्यं सर्वं जग-
त् कार्यं चेतनपुरुषकर्तृकं विशेषएवैकं दृष्टमिति निखिलजगन्निर्माणे तदुपादानोपकरणवेदनचतुरः कश्चिदनुमेय इति तदयुक्तं स-
हीमहार्णवादीनां कार्यत्वेपि एकदैवैकेन निर्मितानि इत्यत्र प्रमाणाभावात् न चैकस्य घटादेर्यथा स्वसर्वेषामेककार्यत्वं येनैकदैवैकः कर्ता
स्यात् पृथग्भूतेषु कार्येषु कालभेदकर्तृभेददर्शनेन एककर्तृकालैक्यनियमाभावात् न च क्षेत्रज्ञानां विचित्रजगन्निर्माणाशक्त्या कार्य-
त्वबलेन तदतिरिक्तकल्पनायामनेककल्पनानुपपत्तेश्च एक एव कर्ता भवितुमर्हति क्षेत्रज्ञानामेवोपचितपुण्यविशेषाणामपि शक्ति-
वैचित्र्यदर्शनेन तेषामेव मिलितधियां दृष्टसंभावनया चातन्निखिलस्य कार्यहेतुत्वसंभवात् तदतिरिक्तस्येतादृक्पुरुषकल्पनानु-
पपत्तेश्च न च युगपत्सर्वोत्पत्तिः सर्वोपनिबद्धप्रमाणपदवीमधिरोहति अदर्शनात् क्रमेणैवोत्पत्तिविनाशदर्शनाच्च कार्यत्वेन सर्वो-
त्पत्तिविनाशयोरेकस्याम्नायोर्दर्शनानुयुक्त्या न कल्पनायामपि विरोधाभावाच्च ॥ अतो बुद्धिमदेककर्तृकत्वे साध्ये कार्यत्वस्यानैकां-
तिकत्वात्साध्यसिद्धिः विशेषणात्वसाध्यविकलत्वाद्दृष्टांतस्य सर्वनिर्माणचतुरस्यैकस्याप्रसिद्धेः बुद्धिमत्कर्तृकत्वमात्रे सिद्धसाध्यता सर्व-
स्यैवैशक्तिपुरुषस्य [illegible] शरीरमानत्वं वस्तु गते युगपदुत्पत्तिमान

एककर्तृकत्वे २ एककर्तृकत्वेन विवादास्पदं तनुभुवनादिकार्यं सावयवत्वादित्यनेककर्तृकत्वेन प्रसिद्धिविरोधः तम् २

दृष्टं ॥ अत्राह । न वेदांतवाक्यानि ब्रह्मप्रतिपादयंतीति प्रवृत्तिनिवृत्त्यन्वयविरहिणः शास्त्रस्यानर्थक्यात् यद्यपि स्वप्रमा
दीनि वस्तुयाथात्म्यावबोधपर्यवसायीनि तथापि शास्त्रं प्रयोजनपर्यवसाय्येव नहि लौकिकवैदिकयोः प्रयोजनरहितस्य
कस्यचिदपि वाक्यस्य प्रयोगमुपलभ्यामहे न च किंचित्प्रयोजनमनुद्दिश्य वाक्यप्रयोगश्रवणं वा संभवति तच्च प्र
योजनं प्रवृत्तिनिवृत्तिसाध्येष्टानिष्टप्राप्तिपरिहारात्मकमुपलभ्यम् अर्थार्थी राजकुलं गच्छेत् मंदाग्निर्नांबु पिबेत्
स्वर्गकामो यजेत न कलंजं भक्षयेदित्यादिषु यत्पुनः सिद्धवस्तुपरं यथा पुत्रस्ते जातो नायं सर्पो रज्जुरेषेत्यादिषु ह
र्षभयादिनिवृत्तिरूपपुरुषार्थान्वयो दृष्ट एवेत्युक्तं तत्र किं पुत्रजन्माद्यर्थस्य पुरुषार्थावच्छिन्नत्वं तज्ज्ञानादिति विवेचनी
यं सतोऽप्यर्थस्याज्ञातस्यापुरुषार्थत्वेन तज्ज्ञानादिति चेत् न तस्य स्वरूपार्थे ज्ञानादेव पुरुषार्थसिध्यतीत्यर्थपरत्वाभा
वेन प्रयोजनपर्यवसायिनो विशास्त्रस्य नार्थसद्भावे प्रामाण्यं तस्मात्सर्वत्र प्रवृत्तिनिवृत्तिपरत्वेन ज्ञानपरत्वेन
वा प्रयोजनपर्यवसानमिति एष्टव्यापि वाक्यस्य परिनिष्पन्नवस्तुनि तात्पर्यासंभवान्न वेदांताः परिनिष्पन्नं ब्र
ह्मप्रतिपादयंति अत्र कश्चिदाह वेदांतवाक्यान्यपि कार्यपरतयैव प्रमाणभावमनुभवंति कथं निष्प्रपंच
मद्वितीयं ज्ञानैकरसं ब्रह्मणोऽनाद्यविद्यया सप्रपंचतया प्रतीयमानं निष्प्रपंचं कुर्यादिति ब्रह्मणः प्रपंचविलयद्वारेण वि
धिविषयत्वमिति कोऽसौ दृष्टद्वयरूपप्रपंचविलयद्वारेणासाधारणैकरसब्रह्मविषयो विधिः न द्रष्टुर्द्रष्टारं पश्येः न मतेर्म
न्तारं मन्वीथाः स्वयमात्मादिः दृष्ट्यभेदमूर्त्तं दृशिमात्रं ब्रह्म कुर्यादित्यर्थः सतो सिद्धस्यापि ब्रह्मणो निष्प्रपंचतास्वरूपेण साध्यत्व
मविरुद्धमिति तदयुक्तं नियोगवाक्यार्थवादिनां हि नियोगो नियोज्यविशेषणविषयः करणमितिकर्तव्यताप्रयोक्तेति वक्त

52

ऽ ष

मद्भाष्य २.४

स्वरूपार्थेन

दृष्य २ विधिः पुरुषः ५२

परब्रह्मभूतः सर्वेश्वरः पुरुषोत्तमः शास्त्रं तु सकलेतरप्रमाणपरिदृष्टसमस्तवस्तुविसजातीयं सार्वज्ञसत्यसंकल्पत्वादिमिश्रा
नवधिकातिशयापरिमितोदारगुणसागरं निखिलहेयप्रत्यनीकस्वरूपं प्रतिपादयतीति न प्रमाणान्तरावसितवस्तुसाध
कप्रयुक्तदोषगंधप्रसंगः यत्तु निमित्तोपादानयोरैक्यमाकाशादेर्निरवयवस्य द्रव्यस्य कार्यत्वं चानुपलब्धमशक्यप्रतिपाद
नमित्युक्तं तदविरुद्धमिति प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् न वियदश्रुतेरित्यत्र प्रतिपादयिष्यते अतः प्रमाणान्तरागो
चरत्वेन शास्त्रैकविषयत्वात् यतो वा इमानीत्यादिवाक्यमुक्तलक्षणं ब्रह्म प्रतिपादयतीति सिद्धम्। यद्यपि प्रमाणान्तरा
गोचरं ब्रह्म तथापि प्रवृत्तिनिवृत्तिपरत्वाभावेन सिद्धरूपं ब्रह्म न शास्त्रं बोधयतीत्याशंक्याह तत्तु समन्वयात् प्रसक्ता
शंकानिवृत्त्यर्थस्तुशब्दः तत् शास्त्रप्रमाणकत्वं ब्रह्मणः संभवत्येव कुतः समन्वयात् पुरुषार्थतयान्वयः समन्वयः प
रमपुरुषार्थभूतस्य ब्रह्मणोऽभिधेयतयान्वयात् एवमेव समन्वितो ह्ययं निखिलपदसमुदायः यतो वा इमानि भूतानि जा
यन्ते सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत ब्रह्म वा इदमेकमेवाग्र आसीत्॥
आत्मा वा इदमेकमेवाग्र आसीत् तस्माद्वा एतस्मादात्मन आकाशः संभूतः एको ह वै नारायण आसीत् स एकाकी न रमेत ब्र
ह्म आनंदो ब्रह्मेत्येवमादिः न चास्य परिनिष्पन्नवस्तुप्रतिपादनसमर्थानां पदसमुदायानामखिलजगदुत्पत्ति
स्थितिविनाशहेतुभूतानां प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहादन्यपरत्वं स्वविषयावबोधपर्यवसायित्वात्सर्वप्रमाणानां
न च प्रयोजनानुगुणो प्रमाणप्रवृत्तिः प्रयोजनं हि प्रमाणानुगुणम्। न च प्रवृत्तिनिवृत्त्यन्वयविरहिणः प्रयोजन
शून्यत्वं पुरुषार्थान्वयप्रतीतेः तथाह्यरूपरेष्वपि पुत्रस्ते जातो नायं सर्प इत्यादिषु हर्षभयनिवृत्तिरूपप्रयोजनवत्त्वं

शेषदेवप्रत्यनीकापरमितोदारगुणसागरानवधिकातिशयानन्दस्वरूप
ब्रह्मणि समन्विता इत्यर्थः

कार्यचपोरत्वं ६३

ग्रमाववतः प्रमा(ग्र

फलत्वेनसिद्धस्य ३

संनिपत्योपकारकं नदनुग्राहककार्यमारादुपकारकमिति १

प्रपंचनिवृत्ति २

त्वेन नाभावः इति चेन्न इत्थं अस्येति कर्त्तव्यताभावरूपस्य भावरूपस्य च करणशरीरनिष्पत्तितदनुग्राहककार्य्यभेदे भिन्नस्य
यविधात्वं न संभवति न हि मुमुक्षोरात्मज्ञानादिव फलस्य प्रपंचनिवर्त्तकः कोपि दृश्यते इति इष्टसाधनत्वं न संभवति नापि निष्प
न्नस्य करणस्य कार्य्यान्तरावनुग्रहः संभवति अनुग्राहकांशस्याभावेन कृत्स्नप्रपंचनिवृत्तिरूपकरणस्य स्वरूपापेक्षः।
ब्रह्मणो द्वितीयत्वशरीरं प्रपंचनिवृत्तिरूपकरणशरीरं निष्पादयतीति चेन्न तेनैव प्रपंचनिवृत्तिरूपो मोक्षः सिद्ध इति न क
रणादिनिष्पादनमवशिष्यते इति पूर्वमेवोक्तं अभावरूपत्वे चाभावादेव न करणशरीरं निष्पादयति नाप्यनुग्रहं अतो नि
ष्प्रपंचब्रह्मविषयो विधिर्न संभवति अत्रोच्यते यद्यपि वेदान्तवाक्यानां निष्प्रपंचब्रह्मरूपपरतया प्रामाण्यं तथापि
ब्रह्मस्वरूपसिद्ध्यर्थमेव कृतः ध्यानविधिसामर्थ्यात् एवमेव हि समाम्नायन्ते आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य
व्यः य आत्मापहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः आत्मेत्येवोपासीत आत्मानमेव लोकमुपासीतेति अत्र ध्यानवि
षयो हि लिङ्गः स्वविषयम् तं ध्यानं ध्येयैकनिरूपणीयमिति ध्येयमाक्षिपति स च ध्येयः स्ववाक्यनिर्दिष्ट आत्मा स किं रू
प इत्यपेक्षायां तत्स्वरूपविशेषसमर्पणद्वारेण सत्यं ज्ञानमनन्तं ब्रह्म सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्येवमादीनां
वाक्यानां ध्यानविधिविशेषणतया प्रामाण्यमिति विधिविषयम् तद्ध्यानं प्रशासनानुप्रविष्टब्रह्मरूपेषु [illegible]
व अत एकमेवाद्वितीयं तत्सत्यं स आत्मा नेह नानास्ति किंचनेत्येवमादि निर्विशेषब्रह्मरूपमेकमेव सत्यं तद्व्यतिरिक्तं सर्वं मि
थ्यैवावगम्यते प्रत्यक्षादिभिर्भेदावलंबिना च कर्मशास्त्रेण भेदः प्रतीयते भेदाभेदयोः परस्परविरोधे सत्यत्वानुपपत्तेरविद्याम्
मूलत्वेन भेदप्रतीत्युपपत्तेरभेद एव परमार्थ इति निश्चीयते तत्र ब्रह्मध्याननियोगेन तत्साक्षात्कारफलेन निरस्तसमस्ता
विद्याकृतविविधभेदाद्वितीयज्ञानैकरसब्रह्मभावरूपो मोक्षः प्राप्यते न च वाक्यार्थज्ञानमात्रेण ब्रह्मभावसिद्धिः

ध्यानविधिनियोगपरिग्रहः ४

एवांगस्यात

निवृत्ति

विधिः

43

ब्रह्मस्वरूपयाथात्म्यकामानुमान् ब्रह्मनिःप्रपंचं मोक्षे चेन्न २ भावः किंचाभावत्वे वा न तथाच ब्रह्मणः किंचार्थत्वं न संभवतीति भावः ४

नियोगादिषु ६ सुचि: स्वर्गः अज्ञाचार्यत्वात् ५ ब्रह्मणो विधिविषयत्वे तस्य ब्रह्मानुभवस्य ब्रह्मानुभवरूपस्य ब्रह्मणः २ चेन्निसल्लितत्वेनानि तत्त्वचिकारेच २

यातत्र नियोगस्य विशेषणमनुपादेयं तच्च निमित्तं फलमिति द्विधा अन्ये किं नियोगस्य विशेषणं तच्च किं निमित्तं फलं वेति विवेचनीयं ब्रह्मस्वरूपयाथात्म्यानुभव इति चेत् तर्हि न तन्निमित्तं जीवनादिवदस्यासिद्धत्वात् निमित्तत्वे च तस्य नित्यत्वे नापवर्गोत्तरकालमपि जीवननिमित्ताग्निहोत्रादिवन्नित्यं तद्विषयानुष्ठानप्रसंगः नापि फलं नैयोगिकफलत्वेन स्वर्गादिवदनित्यत्वप्रसंगात् अथात्र नियोगविषयः प्रपंचे वेति चेन्न तस्य नित्यत्वेनाभाव्यरूपत्वात् अभावार्थत्वाच्च निःप्रपंचब्रह्म साध्यमिति चेत् साध्यत्वेपि फलत्वमेव अभावार्थत्वान्न विधिविषयत्वं साध्यत्वं चकस्य किं ब्रह्मणः ——— उत प्रपंचनिवृत्तेः न तावद्ब्रह्मणः सिद्धत्वादनित्यत्वप्रसक्तेश्च अथ प्रपंचनिवृत्तेः तर्हि ब्रह्मणः साध्यत्वं प्रपंचनिवृत्तिरेव विधिविषय इति चेन्न तस्याः फलत्वेन विधिविषयत्वायोगात् प्रपंचनिवृत्तिरेवाहमो क्षः स च फलं अस्य च नियोगविषयत्वे नियोगात्प्रपंचनिवृत्तिः प्रपंचनिवृत्त्या नियोग इतीतरेतराश्रयत्वं अपि च किं निवर्तनीयः प्रपंचो मिथ्यारूपः सत्यो वा मिथ्यारूपत्वे ज्ञाननिवर्त्यत्वादेव नियोगेन न किंचित्प्रयोजनं नियोगस्य निवर्तकज्ञानमुत्पाद्यत इति चेन्न प्रपंचनिवर्तक इति चेन्न स्वकारणादेव जातमिति न नियोगे न प्रयोजनं वाक्यार्थज्ञानादेव ब्रह्मव्यतिरिक्तस्य मिथ्याभूतस्य प्रपंचस्य बाधितत्वात्सपरिकरस्य नियोगासिद्धिश्च प्रपंचस्य निवर्त्यत्वेऽपि तस्य निवर्तको नियोगः किं ब्रह्मस्वरूपमेव उत तद्व्यतिरिक्तः यदि ब्रह्मस्वरूपमेव निवर्तकं नित्यत्वात्प्रागपि निवर्त्यप्रपंचसद्भाव एव न संभवति नित्यत्वेन च नियोगस्य विषयानुष्ठानसाध्यत्वं च न घटते अथ ब्रह्मस्वरूपव्यतिरिक्तः तस्य कृत्स्नप्रपंचनिवृत्तिरूपविषयानुष्ठानसाध्यत्वेन प्रयोक्तान घटत्वाभावादपसिद्धिः प्रपंचनिवृत्तिरूपविषयानुष्ठाने नैव ब्रह्मस्वरूपव्यतिरिक्तस्य कृत्स्नस्य निवृत्तत्वान्न नियोगसिद्धिः मोक्षस्यफलत्वम् किं च प्रपंचनिवृत्तेर्नियोगकरणत्वेति कर्तव्यताभावादनुपकृतस्य करणत्वायोगान्न करणत्वं कथमिति च

प्रपंचनिवृत्तेर्नैकरणत्वं
प्रवृत्तिकलापपूर्णलक्षणा
यजेतस्मादौ नियोगविषयत्वायोगान्न निवृत्तिः नियोगः स्वर्गादिफलमिति [illegible] प्रपंचनिवृत्त्या नियोगः नियोगात्प्रपंचनिवृत्तिरित्यन्यो

संस्कारो हि दोषापनयनेन गुणाधानेन वा साधयति न तावद्दोषापनयनेन नित्यशुद्धत्वाद्ब्रह्मणः नाप्यतिशया
धानेनानाधेयातिशयस्वरूपत्वात् नित्यनिर्विकारत्वेन स्वाश्रयायाः पराश्रयायाश्च क्रियायाश्चाविषय
तया न विकर्षणेनादर्शादिवदपि संस्कार्यं न च देहस्थया स्नानादिक्रियया आत्मा संस्क्रियते किंच विद्याग्र
हीततत्संगतोऽहं कर्त्ता तत्फलानुभवोपि तस्यैव न चाहं कर्त्तेत्यात्मा तत्साक्षित्वात् तथा च मंत्रवर्णः। तयो
रन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः एको देवः सर्वभू
तेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा सर्वाध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च स पर्यगाच्छु
क्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धं कविर्मनीषीइत्यविद्यागृहीतादहंकर्त्तुरात्मनः स्वरूपमनाधे
यातिशयं नित्यं शुद्धं निर्विकारं निष्पद्यते तस्मादात्मस्वरूपत्वेन न साध्यो मोक्षः यद्येवं किं वाक्यार्थज्ञाने
न क्रियत इति चेन्न मोक्षप्रतिबंधनिवृत्तिमात्रमिति ब्रूमः तथा च श्रुतयः त्वं हि नः पिता यो स्माकमवि
द्यायाः परं पारं तारयसि श्रुतं ह्येव मे भगवद्दृशेभ्यः तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भ
गवाञ्छोकस्य पारं तारयतु तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः तस्मान्नित्यसि
द्धमोक्षस्य प्रतिबंधनिवृत्तिर्वाक्यार्थज्ञानेन क्रियते तन्निवृत्तिस्तु साध्यापि प्रध्वंसाभावरूपा न विनश्यति ब्रह्मवे
द ब्रह्मैव भवति तमेव विदित्वातिमृत्युमेति इत्यादिवचने मोक्षस्य वेदनानंतरभावित्वं प्रतिपादयन्ति योगव

44

नुपलब्धेः विविधभेददर्शनानुवृत्तेश्च तथा सति श्रवणादिविधानमनर्थकं स्यात् अथोच्येत रज्ज्वादेरेव न सर्प इत्युपदेशेन स-
र्पभयनिवृत्तिदर्शनात् रज्जुसर्पवद्बंधस्यापि मिथ्यारूपत्वे न ज्ञानबाध्यतया तस्य वाक्यजन्यज्ञानेनैव निवृत्तिर्ज्ञा-
न नियोगेन नियोगसाध्यत्वे मोक्षस्यानित्यत्वं स्यात् स्वर्गादिवत् मोक्षस्य नित्यत्वं हि सर्ववादिसंप्रतिपन्नं किंच
धर्माधर्मयोः फलदेहत्वे स्वफलानुभवानुगुणशरीरोत्पादनद्वारेणेति ब्रह्मादिस्थावरान्तचतुर्विधशरीरसं-
बंधरूपसंसारफलत्वमवर्जनीयं तस्मान्न धर्मसाध्यो मोक्षः तथा च श्रुतिः न ह वै सशरीरस्य सतः प्रियाप्रिययोर-
पहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति अशरीरत्वरूपे मोक्षे धर्माधर्मसाध्यप्रियाप्रियविरह-
श्रवणान्न धर्मसाध्यमशरीरत्वमिति विज्ञायते न च नियोगविशेषसाध्यफलविशेषवत् ध्याननि-
योगसाध्यमशरीरत्वं अशरीरत्वस्य स्वरूपत्वेनासाध्यत्वात् यथाहुः श्रुतयः अशरीरं शरीरेष्वनवस्थे-
ष्ववस्थितं महान्तं विभुमात्मानं मत्वा धीरो न शोचति अप्राणो ह्यमनाः शुभ्रोऽसङ्गो ह्ययं पुरुष इत्याद्याः
अतोऽशरीरत्वरूपो मोक्षो नित्य इति न धर्माधर्मसाध्यः तथा च श्रुतयः अन्यत्र धर्मादन्यत्राधर्माद-
न्यत्रास्मात्कृताकृतात् अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति उत्पत्तिप्राप्तिविकृतिसंस्कृतिरूपेण
चतुर्विधं हि साध्यत्वं मोक्षस्य न संभवति न तावदुत्पाद्यः मोक्षस्य ब्रह्मस्वरूपत्वेन नित्यत्वात् नापि प्राप्यः।
आत्मस्वरूपत्वेन ब्रह्मणो नित्यप्राप्तत्वात् नापि विकार्यः दध्यादिवदनित्यत्वप्रसंगात् नापि संस्कार्यः

श्री
५६

स्यानुभयनिवृत्तिहेतुत्वं वस्तुयाथात्म्यापरोक्षनिमित्तप्रवृत्तिहेतुत्वेन । तथाहि रज्जुसर्पदर्शनभयात् पलायमानपुरुषो नायं सर्पो
रज्जुरेषेत्याप्तोपदेशाद्वस्तुयाथात्म्यदर्शने प्रवृत्तः तदेव प्रत्यक्षेणोपलभ्य भयान्निवर्तते न च शब्द एव प्रत्यक्षज्ञानं जनयतीति
वक्तुं युक्तं तस्यानिन्द्रियत्वात् ज्ञानसामग्रीष्विन्द्रियाण्येवापरोक्षज्ञानसाधनानि न चास्यानभिसंहितफलकर्मानुष्ठानम
दितकषायस्य श्रवणमनननिदिध्यासनैर्विमुखीकृतबाह्यविषयस्य पुरुषस्य वाक्यमेवापरोक्षज्ञानं जनयति लिङ्ग न प्रति
वन्धेपि तत्परेपि पुरुषे ज्ञानसामग्रीविशेषणामिन्द्रियादीनां स्वविषयनियमातिक्रमादर्शनेन तदेव योगिनां चैवं ध्यानस्य वा
क्यार्थज्ञानोपायता इतरेतराश्रयत्वात् वाक्यार्थज्ञाने जाते तद्विषयध्यानं ध्याने निर्वृत्ते वाक्यार्थज्ञानमिति न च ध्यान
वाक्यार्थज्ञानयोर्भिन्नविषयत्वं भिन्नविषयत्वे तथा सति ध्यानस्य वाक्यार्थज्ञानोपायता न स्यात् न चान्यध्यानमन्येन मुख्य
मुत्पादयति ज्ञातार्थस्य स्मृतिसंततिरूपस्य ध्यानस्य वाक्यार्थज्ञानपूर्वकत्वमवर्जनीयम् ध्येयब्रह्मविषयज्ञानस्य हेत्वं
तरासंभवात् न च ध्यानमूलं ज्ञानं वाक्यान्तरजन्यं निरूक्तं केनापि तत्त्वमस्यादिवाक्यजन्यमिति युक्तं ध्यानमूलमि
दं वाक्यान्तरजन्यं ज्ञानं तत्त्वमस्यादिवाक्यजन्यज्ञानेनैकविषयं भिन्नविषयं वा एकविषयत्वे तदेवेतरेतराश्रय
त्वं भिन्नविषयत्वे ध्यानेन तद्विषयेन मुख्यापादनासंभवः किं च ध्यानस्य ध्येयध्यात्राद्यनेकप्रपञ्चापेक्षत्वान्नि
ष्प्रपंचब्रह्मात्मैकत्वविषयवाक्यार्थज्ञानोत्पत्तौ हेतुत्वेनोपयोग इति वाक्यार्थज्ञानमात्रादविद्यानिवृत्तिं
वदतः श्रवणमनननिदिध्यासनविधीनामानर्थक्यमेव यतो वाक्यादपरोक्षज्ञानासंभवाद्वाक्यार्थज्ञानेना
विद्या न निवर्तते तत एव जीवन्मुक्तिरपि दूरोत्सारिता का चेयं जीवन्मुक्तिः सशरीरस्यैव मोक्ष इति चेत् मा ताम एवं

45

अन्यकार्या

र्य

वधानं तां प्रति सूणसिद्धिः न च विदिक्रियाकर्मत्वेन वा कार्य्यानुप्रवेशः उभयकर्मत्वप्रतिषेधात् अन्यदेव तद्विदि-
तादथो विदितादपि येनेदं सर्वं विजानाति तं केन विजानीयादिति तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते इति च न चए-
तावता ब्रह्मणः शास्त्रस्य निर्विषयत्वं अविद्यापरिकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य नहीदं तया ब्रह्म विषयीकरो-
ति शास्त्रं अपि त्वविषयं प्रत्यगात्मस्वरूपं प्रतिपादयदविद्याकल्पितज्ञातृज्ञेयज्ञानविभागं निवर्तयति तथा
च शास्त्रं न दृष्टेर्द्रष्टारं पश्येर्न मतेरित्येवमादि न च ज्ञानादेव बंधनिवृत्तिरिति श्रवणादिविध्यानर्थक्यं स्वभा-
वप्रवृत्तसकलेतरविकल्पविमुखीकरणद्वारेण वाक्यार्थावगतिहेतुत्वात्तेषां न च ज्ञानमात्राद्बंधनिवृत्तिर्दृष्टे-
ति वाच्यं बंधस्य मिथ्यारूपत्वेन ज्ञानोत्तरकालस्थित्यनुपपत्तेः अत एव न शरीरपातादूर्ध्वमेव बंधनिवृत्तिरिति व-
क्तुं युक्तं नहि मिथ्यासर्पभयनिवृत्तिः रज्जुयाथात्म्यज्ञानातिरेकेण सर्पविनाशमपेक्षते यदि शरीरसंबंधः
पारमार्थिकः तर्हि तद्विनाशापेक्षास्तु ब्रह्मव्यतिरिक्ततया न पारमार्थिकः यस्य तु बंधो न निवृत्तस्तस्य ज्ञानमे-
व न जातमित्यवगम्यते ज्ञानकार्यादर्शनात् तस्माच्छरीरस्थितिर्भवतु वा मा वा वाक्यार्थज्ञानसमनंतरं मुक्त एवासौ ।
अतो न ध्याननियोगसाध्यो मोक्ष इति न ध्यानविधिशेषतया ब्रह्मणः सिद्धिः अपि तु सत्यं ज्ञानमनंतं ब्रह्म तत्त्वमसि
अयमात्मा ब्रह्मेति तत्परैरेव पदसमुदायेन सिध्यतीति तदयुक्तं वाक्यार्थज्ञानमात्राद्बंधनिवृत्त्यनुपपत्तेः यद्यपि मिथ्या-
रूपो बंधो ज्ञानबाध्यः तथापि बंधस्यापरोक्षत्वात् न परोक्षरूपेण वाक्यार्थज्ञानेन स बाध्यते रज्ज्वादावपरोक्षसर्पप्रतीतौ
विद्यमानायां नायं सर्पो रज्जुरेषेत्याप्तोपदेशजनितपरोक्षसर्पविपरीतज्ञानमात्रेणाभयानिवृत्तिदर्शनात् आप्तोपदेश-

श्री
४७

निर्मलेत्यानसामर्थ्यावक्तव्येति चेत् ध्याननियोगनिर्मलं मन एव साधनमिति ब्रूमः केनावगम्यत इति चेत् भवतो वा कर्मभिर्म
नो निर्मलं भवति निर्मले मनसि श्रवणमनननिदिध्यासनैः सकलेतरविषयविमुखस्यैव शास्त्रं वस्तुनिर्वर्त्तकज्ञानमु
त्पादयतीति केनावगम्यते विविदिषन्ति यज्ञेन दानेन तपसानाशकेन श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ब्रह्म वेद ब्रह्मैव भव
तीत्यादिभिः शास्त्रैरिति चेत् ममापि श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ब्रह्मविदाप्नोति परं न वक्तुमाम्नायते नापि वाचा मन
सा तु विशुद्धेन हृदा मनीषा मनसाभिक्लृप्त इत्यादिभिः शास्त्रैर्ध्याननियोगेन मनो निर्मलं भवति निर्मलं च मनो ब्रह्मापरो
क्षज्ञानं जनयतीत्यवगम्यत इति निरवद्यं नेदं यदिदमुपासत इत्युपास्यत्वं प्रतिषिद्धमिति चेत् नैवं नात्र ब्रह्मण उपास्यत्वं प्र
तिषिध्यते अपि तु ब्रह्मणो ज्ञानैकरूपत्वं प्रतिपाद्यते यदिदं जगदुपासते प्राणिनः नेदं ब्रह्म तदेव ब्रह्म त्वं विद्धि यद्वाचानभ्युदितं ये
न वागभ्युद्यत इति वाक्यार्थः अन्यथा तदेव ब्रह्म त्वं विद्धीति विरुध्येत ध्यानविधिवैयर्थ्यं चात्मनः स्यात् अतो ब्रह्मसाक्षा
त्कारफलेन ध्याननियोगेनैवापरमार्थभूतस्याहङ्कारस्य दृष्टादृष्टादिप्रपञ्चरूपबन्धस्य निवृत्तिः यदपि केनचिदुक्तं भेदा
भेदयोर्विरोधो न विद्यत इति तदयुक्तं न हि शीतोष्णतमःप्रकाशादिवत् भेदाभेदावेकस्मिन् वस्तुनि सङ्गच्छेते अथोच्यते सर्व
मेव हि वस्तुजातं प्रतीतिव्यवस्थाप्यं सर्वं च भिन्नाभिन्नं प्रतीयते कारणात्मना जात्यात्मना चाभिन्नं कार्यात्मना व्यक्त्यात्मना च
भिन्नं छायातपादिषु विरोधः सहानवस्थानलक्षणो भिन्नाधारत्वरूपश्च कार्यकारणयोर्जातिव्यक्त्योश्च तदुभयमपि
नोपलभ्यते प्रत्युत एकमेव वस्तु द्विरूपं प्रतीयते यथायं घटः खण्डो गौः मुण्डो गौरिति नैवैकरूपं किञ्चिदपि वस्तु लोके
दृष्टचरं न च तृणोरुज्वलनादिवद्भेदाभेदोपमर्दः [illegible] इति वक्तव्यम् विरोधः मृत्सुवर्णगवाद्यात्मनावस्थितस्यैव घटमुकुट
खण्डमुण्डगवाद्यात्मनावस्थानात् न चाभिन्नस्य भिन्नस्य च वस्तुनो भेदाभेदस्य कल्पनाकारणाभावात् प्रतीतत्वादेकरूपस्यैव प्रतीतत्वा

ध्येति वदसंगतार्थवचनं यतः सशरीरत्वं बंधः अशरीरत्वं मोक्ष इति त्वयैव श्रुतिभिः प्रतिपादितं अथ सशरीरत्वप्रतिभासे
वर्त्तमाने यस्यायं प्रतिभासोपि मिथ्येति प्रत्ययस्तस्य सशरीरत्वनिवृत्तिरिति न मिथ्येति प्रत्ययेन सशरीरत्वं निवृत्तं चेत्तथं
सशरीरस्य मुक्तिः [illegible] अजीवतोपि मुक्तिः सशरीरत्वमिथ्याप्रतिभासनिवृत्तिरेवेति को यं जीवन्मुक्त इति विशेषः अथ सश
रीरत्वप्रतिभासो बाधितोपि यस्य द्विचंद्रज्ञानवदनुवर्त्तते स जीवन्मुक्त इति चेन्न ब्रह्मव्यतिरिक्तसकलवस्तुविषयकत्वात्
बाधकज्ञानस्य कारणभूताविद्याकर्मादिदोषः सशरीरत्वप्रतिभासेन सह तेनैव बाधित इति बाधितानुवृत्तिर्न शक्यतेव
कुद्विचंद्रादौ तु तत्प्रतिपादकहेतुभूतदोषस्य बाधकज्ञानभूतचंद्रैकत्वज्ञानाविषयत्वेनाबाधितत्वात् द्विचंद्रप्रतिभासा
नुवृत्तिर्युक्ता किंच तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति श्रुतिः स विद्यानिष्ठस्य शरीरपातमात्रमपेक्षते मोक्ष इति
वदंतीयं श्रुतिर्जीवन्मुक्तिं वारयति सेयं जीवन्मुक्तिरापस्तंबेनापि निरस्ता वेदानिमं लोकममुं च परित्यज्यात्मानम १
न्विच्छेत् बुद्धे क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धं बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेत एतेन परं व्याख्या
तमिति अनेन ज्ञानमात्रान्मोक्षश्च निरस्तः अतः सकलभेदनिवृत्तिरूपा मुक्तिर्जीवतो न संभवति तस्मात् ज्ञाननियो
गेन ब्रह्मापरोक्षज्ञानफले नैव बंधनिवृत्तिः न च नियोगसाध्यत्वेन मोक्षस्यानित्यत्वप्रसक्तिः प्रतिबंधनिवृत्तिमात्रस्यैव
साध्यत्वात् किंच न नियोगेन साक्षाद्बंधनिवृत्तिः क्रियते किंतु निष्प्रपंचज्ञानैकरसब्रह्मापरोक्षज्ञानेन नियोगस्तु तदप
रोक्षज्ञानं जनयति कथं नियोगस्य ज्ञानोत्पत्तिहेतुत्वमिति चेत् कथं वा भवतो नभिसंहितफलानां कर्मणां वेदनोत्पत्तिहे
तुत्वं यज्ञेनेमं त्व धारयोति चेत् यथा [illegible] ज्ञानमुत्पाद्यते तथा नियोगेन मनसि

प्रमाणं [illegible] कारयेत्

ॐ लोम्याद्गु [illegible] निरस्तमिति

श्री

४८ तिमद्भिर्ब्रह्मसंसक्ते अभेदश्रवणाच्च नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ज्ञाज्ञौ द्वावजावीशानीशौ इति
याजुतेरात्मगुणोऽस्य तेषां संयोगहेतुरपरोऽपि दृष्टः प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः स कारणं करणाधिपाधिपः
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति यस्मा लालितिछन् प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरं प्राज्ञेनात्म
नान्वारूढः उत्सर्जन् याति तमेव विदित्वातिमृत्युमेतीत्यादिभेदश्रवणाच्च जीवपरयोर्भेदाभेदावुभावपि श्रुत्याश्रयणीयौ तत्र ब्रह्म
वेद ब्रह्मैव भवतीत्यादिभिर्मोक्षदशायां जीवस्य ब्रह्मस्वरूपापत्तिव्यपदेशात् यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति तदानीं
भेदेनेक्षणादीनां निषेधाच्चाभेदः स्वाभाविक इत्यवगम्यते ननु च सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति सह श्रुत्या तदा
भेदेऽपि भेदः प्रतीयते जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च भोगमात्रसाम्यलिङ्गाच्चेति मैवं नान्यो तोऽस्ति
द्रष्टेत्येवमादिश्रुतिभिर्जीवेशयोर्भेदप्रतिषेधात् सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति सर्वैः कामैः सह ब्रह्माश्नुते सर्व
गुणान्वितं ब्रह्माश्नुत इत्युक्तं भवति अन्यथा ब्रह्मणो महत्त्वप्राधान्यं ब्रह्मणः प्रसक्तेन जगद्व्यापारवर्जं इत्यत्र मुक्तस्य भेदेना
वस्थाने संसारे ऐश्वर्यस्य न्यूनताप्रसंगो वक्ष्यते अन्यथा संपद्याविर्भावः स्वेन शब्दादित्यादिभिर्विरोधात् तस्मादभेद एव स्वाभा
विको भेदस्तु जीवानां परस्माद्ब्रह्मणः परस्परं च बुद्ध्यादिदेहोपाधिकृतः यद्यपि ब्रह्म निरवयवं सर्वगतं तथाप्याकाशवद्घ
टादिनाबुद्ध्याद्युपाधिना ब्रह्मण्यपि भेदः संभवत्येव न च भिन्नं ब्रह्मेति बुद्ध्याद्युपाधिसंयोगाः बुद्ध्याद्युपाधिसंयोगाद्ब्रह्मणि भेद इ
तीतरेतराश्रयत्वं उपाधेस्तत्संयोगस्य च कर्मकृतत्वात् तस्य चानादित्वात् एतदुक्तं भवति पूर्वकर्मसंबद्धा जीवास्त्वसं
बद्धएवोपाधिरुत्पद्यते तद्युक्तात्कर्म एवं बीजांकुरन्यायेन कर्मसंबंधस्यानादित्वाद्दोष इति अतो जीवानां परस्पर
ब्रह्मणा चाभेद एव स्वाभाविको भेदस्त्वौपाधिकः उपाधीनां पुनः परस्परं ब्रह्मणा चाभेदवत् भेदोऽपि स्वाभाविकः उपाधी
नामुपाध्यंतराभावात्तदभ्युपगमेऽनवस्थानाच्च अतो जीवकर्मानुरूपं ब्रह्मणो भिन्नाभिन्नस्वभावा एवोपाधय उप

(47)

मिति भेदस्याप्युपपाद्यते नहि विस्फारितनेत्रः पुरुषो घटशरावकलशमुल्लादिषु वस्तूपलभ्यमाने विशिष्टं म्रदयं च घटः ॥
इदं च गोत्वमियं व्यक्तिरिति विवेक्तुं शक्नोति अपि तु मृदयं घटः खण्डो गौरित्येव प्रत्येति अनुवृत्तिबुद्धिबोध्यं कारणमाकृतिश्च
व्यावृत्तिबुद्धिबोध्यं कार्यं व्यक्तिश्चेति विविच्य नेति चेन्नैवं विविक्ताकारानुपलब्धेः नहि सुस्पष्टमपि निरीक्ष्यमाणो रिद
मनुवर्त्तमानमिदं व्यावर्त्तमानमिति पुरोवस्थिते वस्तुन्याकारभेद उपलभ्यते यथा संप्रतिपन्ने कैककार्यविशेषे चैक
त्वबुद्धिरुपजायते तथैव सकारणे सामान्ये चैकत्वबुद्धिरविशिष्टोपजायते एवमेव देशतः कालतश्चाकारतश्चा
त्यंतविलक्षणेष्वपि वस्तुषु तदेवेदमिति प्रत्यभिज्ञायते अतो व्यात्मकमेव वस्तु प्रतीयत इति कार्यकारणयोर्जातिव्यक्त्योश्चा
त्यंतभेदोपपादनं प्रतीतिपराहतं अथोच्येत मृदयं घटः खण्डो गौरितिवत् देवोहं मनुष्योहमिति सामानाधिकरण्येन
प्रतीतेरात्मशरीरयोर्भिन्नाभिन्नत्वं स्यात् अत इदं भेदाभेदोपपादनं निजसदननिहितहुतवहज्वालायतइ
ति॥ तदिदमनाकलितभेदाभेदसाधनसामानाधिकरण्यतदर्थयाथात्म्यानवबोधविलसितं तथाहि बाधितएव
प्रत्ययः सर्वत्रार्थं व्यवस्थापयति देवाद्यात्माभिमानस्त्वात्मयाथात्म्यगोचरैः सर्वैः प्रमाणैः बाध्यमानो रज्जुसर्प्पा
दिबुद्धिवन्नात्मशरीरयोरभेदं साधयति खण्डो गौरिति सामानाधिकरण्यस्य न केनचित् क्वचिद्बाधो दृश्यते त
स्मान्नातिप्रसंगः अत एव जीवोपि ब्रह्मणो नात्यंतभिन्नः अपि तु ब्रह्मांशत्वेन भिन्नाभिन्नः तत्राभेद एव स्वाभाविको भेद
स्त्वौपाधिकः कथमिदमवगम्यत इति चेत् तत्त्वमसि नान्योतोस्ति द्रष्टा अयमात्मा ब्रह्मेत्यादिभिः श्रुतिभिर्ब्रह्मेमे द्यावापृ
थिवी इति प्रकृत्य ब्रह्मदाशा ब्रह्मदासा ब्रह्मैवेमे कितवा उत स्त्रीपुंसौ त्वं जातो भवसि विश्वतोमुख इत्याथर्वणिकानां संहितोप

श्री

नियतशास्त्रमूलत्वात् १

६८

अत एव जीवस्यापि ब्रह्मणो भिन्नाभिन्नत्वं न संभवति तस्माद्भेदस्यानन्यथासिद्धशास्त्रमूलत्वात् एकस्मिन्नद्वयेऽना
द्यविद्यामूल एव भेदप्रत्ययः ननु एवं ब्रह्मण एवात्त्वे तन्मूलाश्च जन्मजरामरणादयो दोषाः प्रादुःष्युः ततश्च यः सर्व
ज्ञः सर्ववित् एष आत्मापहतपाप्मेत्यादीनि शास्त्राणि बाध्येरन् नैवमस्तत्वादिदोषाणामपरमार्थत्वात् भवतस्तु पा
र्थिं ब्रह्मव्यतिरिक्तवस्त्वन्तरमभ्युपगच्छतो ब्रह्मण एवोपाधिसंसर्गे तत्कृताश्च जीवत्वामत्वादयो दोषाः परमार्थ
त एव भवेयुः नाहं ब्रह्मणो निरवयवे छेद्ये संबध्यमाना उपाधयस्तच्छित्त्वा भित्त्वा वा संबध्यन्ते ॥ अपि तु ब्रह्मस्व
रूपैकदेशं संयुज्य तस्मिन्नेव स्वकार्याणि कुर्वन्तीति यदि मन्येत उपाध्युपहितं ब्रह्म जीवः स चाणुपरिमाणः अणुसंस्त्वाव
च्छेदकस्य मनसो अणुत्वात् स चावच्छेदको नादिरेवमुपाध्युपहिते देशे संबध्यमानाः दोषा अनुपहिते परे ब्रह्मणि न सं
बध्यन्त इत्ययं पक्षः किमुपाधिनाच्छिन्नो ब्रह्मखण्डोऽणुरूपो जीव उताच्छिन्न एवाणुरूपोपाधिसंयुक्तो ब्रह्मप्रदेशवि
शेषः उतोपाधिसंयुक्तं ब्रह्मस्वरूपं अथोपाधिसंयुक्तं चेतनान्तरं अथोपाधिरेवेति अत्र न तावद्ब्रह्मणः प्रथमक
ल्पो न कल्प्यते आदिमत्त्वं च जीवस्य स्यात् एकस्य सतो द्वैधीकरणं हि छेदनं द्वितीयकल्पे ब्रह्मण एव प्रदेशविशि
ष्ट उपाधिसंबंधादौपाधिकाः सर्वे दोषास्तस्यैव स्युः उपाधौ गच्छत्युपाधिनासंयुक्तब्रह्मप्रदेशाकर्षणायोगादनु
क्षणमुपाधिसंयुक्तब्रह्मप्रदेशविशेषभेदात् क्षणे क्षणे बन्धमोक्षौ स्याताम् आकर्षणे च्छिन्नत्वात् कृत्स्नस

६९

48

यतइति अत्रोच्यते अद्वितीयसच्चिदात्मैकब्रह्मध्यानविषयविधिपरं वेदांतवाक्यजातमिति वेदांतवाक्यैरभेदः प्रती
यते भेदावलंबिभिः कर्म्मशास्त्रैः प्रत्यक्षादिभिश्च भेदः प्रतीयते भेदाभेदयोः परस्परविरोधादनाद्यविद्यामूल
तयापि भेदप्रतीत्युपपत्तेः अभेदः परमार्थ इत्युक्तं तत्र यदुक्तं भेदाभेदयोरुभयोरपि प्रतीतिसिद्धत्वान्न विरोध
इति तदयुक्तं कस्माच्चित्तस्यचिद्विलक्षणत्वं हि तस्मात्तस्य भेदस्तद्विपरीतत्वं चाभेदस्तयोस्तथाभावः तथाभाव
रूपयोरेकत्र संभवमनुन्मत्तः कोब्रवीति कारणात्मना जात्यात्मना चाभेदः कार्य्यात्मना व्यक्त्यात्मना च भेद
इत्याकारभेदादविरोध इति चेन्न विकल्पासहत्वात् आकारभेदादविरोध इति वदतः किमेकस्मिन्नाकारे भेदः
आकारान्तरे चाभेद इत्यभिप्रायः उताकारद्वययोगि वस्तुगताबुभावपीति पूर्वस्मिन्कल्पे व्यक्तिगतो भेदो जातिग
तश्चाभेद इति नैकस्य द्व्यात्मकता जातिर्व्यक्तिरिति चैकमेव वस्त्विति चेत् तर्ह्याकारभेदादविरोधः परिहृतः स्यात् एकस्मिंश्च विलक्षणत्ववि
पर्य्ययौ विरुद्धाविस्युक्तं द्वितीये त्वन्योन्यविलक्षणमाकारद्वयं प्रतिपन्नं चेतदाश्रयभूतं वस्त्विति त्रितयाभ्युपगमेपि त्रयाणामन्योन्यवै
लक्षण्यमेवोपपादितं स्यात् न पुनरभेदः आकारद्वयनिरूप्यमाणाविरोधं तदाश्रयभूतं वस्तु निर्भिन्नत्वमिति चेत् स्वस्माद्विल
क्षणस्याश्रयमाकारद्वयं तस्मिन् विरुद्धधर्म्मद्वयसमावेशनिर्वाहकं कथं भवेत् अविलक्षणं तु कथं तदाकारद्वयतद्वतोश्चात्म
कत्वाभ्युपगमे निर्वाहकांतरापेक्षयानवस्थानात् नन्वेवं प्रतिपन्नेकस्य व्यक्तिप्रतीतिर्वस्तुसामान्यप्रतिवस्तुन्येकरूपा प्रतीतिरुपजाय
ते यतः इदमित्थमिति सर्वत्र प्रकारप्रकारितयैव सर्वा प्रतीतिः तत्र प्रकारांशो जातिः प्रकार्य्यंशो व्यक्तिरिति नैकाकारता प्रतीतिः

भिन्ना ४

उपन्नोमनवाक्यवत् १

विशेषस्वरूपसमर्पणमात्रपर्यवसानात्स्यात्तच्चेपि बालातुराद्युपदेशवन्नवाक्यवत् ज्ञानमात्रेणैव पुरुषार्थपर्यंततासिद्धेरपरि
निष्पन्नवस्तुसत्यतागोचरत्वाभावात् ब्रह्मणः शास्त्रप्रमाणकत्वं न संभवतीति प्राप्तम् तत्र प्रतिपाद्यते तत्तु समन्वयादि
ति । समन्वयः सम्यगन्वयः पुरुषार्थतयान्वय इत्यर्थः परमपुरुषार्थभूतस्यानवधिकातिशयानंदस्वरूपस्य ब्रह्मणोऽभि
धेयतयान्वयात् तत्तु शास्त्रप्रमाणकत्वं सिध्यत्येवेत्यर्थः निरस्तनिखिलदोषं निरतिशयानंदस्वरूपं तयापरमप्रा
प्यं ब्रह्म बोधयन् वेदांतवाक्यगणः प्रवृत्तिनिवृत्तिपरताविरहात् न प्रयोजनपर्यवसायीति ब्रुवाणो राजकुलवासिनः पु
रुषस्य कौलेयककुलानुप्रवेशेन प्रयोजनशून्यतां ब्रूते एतदुक्तं भवति अनादिकर्मरूपाविद्यावेष्टनातिरोहितपरा
परतत्त्वयाथात्म्यस्वस्वरूपावबोधानां देवासुरगंधर्वसिद्धविद्याधरकिंनरकिंपुरुषयक्षराक्षसपिशाचमनुजपशुशकु
निसरीसृपवृक्षगुल्मलतादूर्वादीनां स्त्रीपुंनपुंसकभेदभिन्नानां क्षेत्रज्ञानां यथावस्थितधारकपोषकभोग्यविशेषाणांमुक्ता
नां स्वस्य चाविशेषेणानुभवसंभवे स्वरूपगुणविभवचेष्टितैरनवधिकातिशयानंदजनकं परं ब्रह्मास्तीति बोधयदेव
वाक्यं प्रयोजनपर्यवसायी प्रवृत्तिनिवृत्तिनिष्ठं तु यावत्पुरुषार्थान्वयबोधं न प्रयोजनपर्यवसायि एवंभूतब्रह्मैकप्राप्य
तदुपायतायां ब्रह्मविदाप्नोति परं आत्मानमेव लोकमुपासीतेति वेदनादिशब्दैरुपासनं ब्रह्मप्राप्त्युपायतया विधीयते । यथा
स्ववेश्मनि निधिरस्तीति वाक्येन निधिसद्भावं ज्ञात्वा तत्प्राप्तये प्रयतते यथा च कश्चिद्राजकुमारो बालक्री
डासक्तो नरेन्द्रभवनान्निष्क्रांतो दुर्गाद्भ्रष्टो नष्ट इति राज्ञा ज्ञातः स्वयं चाज्ञातपितृकः केनचिद्द्विजवर्येण वर्द्धितोऽधि
गतवेदशास्त्रार्थः षोडशवर्षः सर्वकल्याणगुणाकरस्तिष्ठन् पिता ते सर्वलोकाधिपतिर्गांभीर्यौदार्यवात्सल्यसौशील्य सर
शौर्यवीर्यधैर्यपराक्रमादिगुणसंपन्नस्त्वामेव नष्टं पुत्रं दिदृक्षुः पुरवरे तिष्ठतीति केनचिदभियुक्ततमेन प्रयुक्तं वाक्यं शृणो

49

ब्रह्मणोऽप्याकर्षणं स्यात् । निरंशस्य व्यापिनः प्राकर्षणं न संभवतीति चेत् तर्ह्युपाधिरेव गच्छतीति पूर्वोक्त एव दोषः स्यात् ॥
अच्छिन्नब्रह्मप्रदेशे कृत्स्नोपाधिसंसर्गे सर्वेषां च जीवानां ब्रह्मत्वमेव प्रदेशभेदेनाभेदप्रतिसंधानं स्यात् । प्रदेशाभेदात् प्रति
संधाने चैकस्यापि लोकाद्योगच्छतिसतिप्रतिसंधानं न स्यात् । तृतीये तु कल्पे ब्रह्मस्वरूपस्यैवोपाधिसंबंधेन जीवत्वाभ्युपगमात् तद
तिरिक्तानुपहितब्रह्मणोऽसिद्धिः स्यात् । सर्वेषु च देहेष्वेक एव जीवः स्यात् । तुरीये तु कल्पे ब्रह्मणोऽन्य एव जीव इति जीवभेदस्योपाधिक
त्वपरित्यक्तं स्यात् । चरमे चार्वाकपक्ष एव परिगृहीतः स्यात् । तस्माद् भेदस्याध्यवसायेन कृत्स्नस्य [illegible] भेदस्याविद्यामूलत्वमे
वाभ्युपगंतव्यं । अतः प्रवृत्तिनिवृत्तिरूपप्रयोजनपरतयैव प्रामाण्यमिति वेदांतवाक्यानां ब्रह्मस्वरूपे ॥ वाक्यस्य

गुरुमतेन

प्रामाण्यमनुपपन्नमिति तदयुक्तं ध्यानविधिशेषत्वेपि वेदांतवाक्यानामर्थसत्यत्वे प्रामाण्याद्योगात् । एतदुक्तं भवति
ब्रह्मस्वरूपगोचराणि वाक्यानि किं ध्यानविधिनैकवाक्यतामापन्नानि ब्रह्मस्वरूपे प्रामाण्यं प्रतिपद्यंते उत स्वतंत्राण्येव एकवा
क्यत्वे ध्यानपरत्वेन ब्रह्मस्वरूपे तात्पर्यं न संभवति । भिन्नवाक्यत्वे प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहाद् अवबोधकत्वमेव
न च वाच्यं ध्यानं नाम स्मृतिसंततिरूपं तच्च स्मर्तव्यैकनिरूपणीयमिति ध्यानविधेः स्मर्तव्यविशेषाकांक्षायां इदं सर्वं यदयमा
त्मा ऽप्रमाणं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेत्यादीनि स्वरूपतद्विशेषादीनि समर्पयंति तेनैकवाक्यतामापन्नान्य

श्रुतिः

र्थसद्भावे प्रमाणमिति ध्यानविधेः स्मर्तव्यविशेषापेक्षत्वेपि मनो ब्रह्मेत्युपासीतेत्यादिदृष्टिविधिवत् सत्येनाप्यर्थविशेषेणाध्या

मनआदि न

न निर्वृत्युपपत्तेः ध्येयसत्यत्वानपेक्षणात् । अतो वेदांतवाक्यानां प्रवृत्तिनिवृत्तिप्रयोजनविधुरत्वात् ध्यानविधिशेषत्वेपि ब्रह्म

निर्वाहो भवति

त्त्वं सत्त्वरजस्तमोमयं च कार्यमिति गुणसाम्यावस्थं प्रधानमेव कारणं तदेवोपसंहृतसकलविशेषं सन्मात्रमिति सदेव सोम्ये-
दमग्र आसीदेकमेवेत्यभिधीयते तत एव च कार्यकारणयोरनन्यत्वं तथा सत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तिः अन्यथाप-
ध्यासोऽप्येकेन मृत्पिंडेनेत्यादि मृत्पिंडतत्कार्यदृष्टान्तः तथा तिक यो वै रूप्यं चेति जगत्कारणवादिवाक्येन महर्षिणा कपिलेनो-
क्तं प्रधानमेव प्रतिपाद्यते प्रतिज्ञादृष्टान्तरूपेणानुमानरूपमेव वेदवाक्यमिति सच्छब्दवाच्यमानुमानिकमित्येवं प्राप्ते अभिधी-
यते ईक्षतेर्नाशब्दमिति यस्मिन् शब्द एव प्रमाणं न भवति तदशब्दं आनुमानिकं प्रधानमित्यर्थः न तज्जगत्कारणवा-
दिवाक्यप्रतिपाद्यं कुतः ईक्षतेः सच्छब्दवाच्यसंबंधिव्यापारविशेषाभिधायिन ईक्षतेर्धातोः श्रवणात् तदैक्षत बहु
स्यां प्रजायेयेति ईक्षणक्रियायोगश्चाचेतने प्रधाने न संभवति अतः ईक्षणकर्तृत्वाच्चेतनविशेष एव सर्वज्ञः सर्वशक्तिः
पुरुषोत्तमः सच्छब्दाभिधेयः तथा च सर्वेष्वपि सृष्टिप्रकरणेष्वीक्षापूर्विकैव सृष्टिः प्रतीयते स ऐक्षत लोकान्नु सृजा इति
स इमान् लोकानसृजत स ईक्षांचक्रे स प्राणमसृजतेत्यादिषु ननु च कार्यानुगुणेनैव कारणेन भवितव्यं अतः सर्वकार्यानु-
गुण एव सर्वज्ञः सर्वशक्तिः सत्यसंकल्पः पुरुषोत्तमः सूक्ष्मचिदचिद्वस्तुशरीरकः यदाहेतास्य शक्तिर्विविधैव श्रूयते स्वाभा-
विकी ज्ञानबलक्रिया च यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः यस्यात्मा शरीरं यस्याक्षरं शरीरं यस्य मृत्युः शरीरं एष सर्वभू-
तान्तरात्माऽपहतपाप्मेत्यादि तदेतदखिलं लक्षणत्वादित्यादिषु प्रतिपादयिष्यते अत्र सच्छब्दवाक्यानि प्रधानप्रतिपादनयो-
ग्यानीत्युच्यते वक्ष्यविरोधस्त्वत्रैव परिहरिष्यते यत्तूक्तं प्रतिज्ञादृष्टान्तयोगादनुमानरूपमेव वेदवाक्यमिति तदसत् हेत्वनुपाद-
नात् येनाश्रुतं श्रुतमित्येकविज्ञानेन सर्वविज्ञाने प्रतिपिपादयिषिते सर्वात्मत्वात् तत्संभवं मत्वा तस्य तत्संभवमात्रप्रदर्श-
नाय हि दृष्टान्तोपादानं इहेत्यादि श्रवणादेव ह्यनुमानगंधाभावो यतः अथ स्यादचेतनगतं मुख्यमीक्षणमिहोच्यते ।

जीवतपितृकोऽहम्

तिचेत्तस्याजीमेवाहंजीवतः पुत्रोस्मीति तान्वसर्वसंपत्समृद्धइति निरतिशयहर्षसमन्वितो भवति राजा च स्वपुत्रं जीवंतमरोगमतिम
नोहरदर्शनं विदितसकलवेद्यं श्रुत्वा वाप्तसमस्तपुरुषार्थो भवति पश्चाद्भोगं गच्छेद्वेति वस्तुनः परिनिष्पन्नवस्तुगोचरस्य
वाक्यस्य तज्ज्ञानमात्रेण पिपुरुषार्थपर्यवसानाद्बालानुरागाद्युपच्छंदनवाक्यवत् नार्थसद्भावे प्रामाण्यमिति तदसत् अर्थसद्भा
वाभावेनिश्चितेतातोप्यर्थः पुरुषार्थायनभवति बालानुरागादीनामप्यर्थसद्भावभ्रांत्येव हर्षाद्युत्पत्तिः तेषामेव तस्मिन्न
पितानेविद्यमाने यथार्थाभाव निश्चयो जायेत तस्तदानीमेव हर्षादयो निवर्तेरन् उपनिषद्वेद्यपिवाक्येषु अस्मास्विति
तामर्थाभावनिश्चयेप्रसक्तानेसत्यपिपुरुषार्थपर्यवसानं न स्यात् अतो यतो वा इमानीत्यादि वाक्यं निखिलजग
देककारणं निरस्तनिखिलदोषगंधं सार्वज्ञ्यसत्यसंकल्पत्वाद्यनंतकल्याणगुणाकरमनवधिकातिशयानंदंब्रह्मा
स्तीति बोधयतीति सिद्धम्॥ श्री॥ इति तेनाधिकरणं॥ श्री यतो वा इमानीत्यादिजगत्कारणवादिवाक्यप्रतिपाद्यं सर्वज्ञं सर्वशक्ति
समस्तहेयप्रत्यनीककल्याणगुणैकतानं ब्रह्मजिज्ञास्यमित्युक्तं इदानीं जगत्कारणवादिवाक्यानामानुमानिकप्रधाना
दिप्रतिपादनानर्हतोच्यते ईक्षतेर्नाशब्दमित्यादिना इदमाम्नायते छांदोग्ये सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं
तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोसृजतेत्यादि तत्र संदिह्यते किं सच्छब्दवाच्यं जगत्कारणं परोक्तमानुमानिकं प्रधा
नमुतोक्तलक्षणं ब्रह्मेति किं प्राप्तं प्रधानमिति कुतः सदेव सोम्येदमग्र आसीदेकमेवेतीदंशब्दवाच्यस्य चेतन
भोग्यभूतस्य सत्त्वरजस्तमोमयस्य वियदादिनानारूपविकारावस्थस्य वस्तुनः कारणावस्थावदति कारणस्
तद्द्रव्यस्यावस्थांतरापत्तिरेव हि कार्यता अतो यद्द्रव्यं यत्स्व[illegible]भावं च कार्यावस्थं तत्स्वभावं तदेव द्रव्यं कारणाव

संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो
भवतीति सुप्तं जीवं सता चरि: ५

श्री
भा
५२

रोधित्वाद्धेयत्वेनोपदेशः स्यात् । न चैतत्किंचित्प्रसूतमुपादेयत्वेनैव तत्त्वमसीति स्मतावद्देवचिरमित्युपक्षिप्यते । इतश्च न प्रधा
नं । श्री प्रतिज्ञाविरोधात् श्री प्रधानकारणत्वे प्रतिज्ञाविरोधश्च भवति । कार्यस्योपक्रमे हि एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातं
तच्च कार्यकारणयोरनन्यत्वेन कारणभूतसद्विज्ञानात्तत्कार्यभूतसर्वेन प्रपंचस्य ज्ञाततयैवोपपादनीयं न च प्रधानकारण
त्वे चेतनवर्गस्य प्रधानकार्यत्वाभावात् प्रधानविज्ञानेन चेतनवर्गविज्ञानासिद्धेर्विरुध्यते ॥ इतश्च नैवानं श्री स्वाप्ययात् श्री
तेष्वेव सच्छब्दवाच्यं प्रकृत्याह स्वप्नांतं मे सोम्य विजानीहीति । यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो स्वमपीतः
स्वस्मिन्प्रलीनत्वं प्रतिपादयति प्रलयश्च स्वकारणे लयः न चाचेतने प्रधाने चेतनस्य जीवस्य कारणं भवति स्वमपीतो
भवति आत्मानमेव जीवोऽपीतो भवतीत्यर्थः चिदचिद्वस्तुशरीरकं तदात्मभूतं ब्रह्म जीवशब्देनाभिधीयत इति । नामरूपव्याकर
णाश्च सुकं तज्जीवशब्दाभिधेयं ब्रह्म सुषुप्तिकालेपि प्रलयकाल इव नामरूपपरिष्वंगाभावात् केवलसच्छब्दाभिधेयमिति सता
सोम्य तदा संपन्नो भवति स्वमपीतो भवतीत्युच्यते । तथा समानप्रकरणे नामरूपविभागपरिष्वंगाभावेन प्राज्ञेनैव परिष्वंगात्
प्राज्ञेनात्मना परिष्वक्तो न बाह्यं किंचन वेद नांतरमित्युच्यते । आमोक्षं जीवस्य नामरूपपरिष्वंगाद्देवादिव्यक्तिरिक्तविषय
ज्ञानोदयः सुषुप्तिकाले नामरूपे विहाय सता संपरिष्वक्तः पुनरपि जाग्रद्दशायां नामरूपे परिष्वज्य तत्तन्नामरूपो भवतीत्
तिरस्कृत्य तदेकत्वमभिधीयते । यदा सुषुप्तः स्वप्नं न कंचन पश्यति । अथास्मिन्प्राण एवैकधा भवति । तस्माद्वा एतस्मा
दात्मनः प्राणाः यथायतनं विप्रतिष्ठंते यथा तदिह व्याघ्रो वा सिंहो वा वृको वा वराहो वा दंशो वा मशको वा यद्यद्भवंतीति
वत्तथा सुषुप्तं जीवं प्राज्ञेनात्मना संपरिष्वक्त इति च वदति । तस्मात्सच्छब्दवाच्यः परं ब्रह्म सर्वज्ञः परमेश्वरः पुरुषोत्तम
एव तदाह [illegible]कारः सता सोम्य तदा संपन्नो भवतीति संपत्त्यसंपत्तिभ्यामेतदध्यवसीयते । प्राज्ञेनात्मना संपरिष्वक्त इति वा

म ४

5

५२

अपि तु प्रधानगतं गौणमीक्षणं तत्तेज ऐक्षत ता आप ऐक्षंतेति गौणेक्षणसाहचर्याद्भवति चाचेतनेष्वपि चेतनधर्मो-
पचारः यथा वृष्टिप्रतीक्षा धान्यालयः वर्षेणाबीजं प्रतिसंजिहर्षतीति अतो गौणमीक्षणमिति मामाशंकामनुभाष्य परि-
हरति ॥ श्री गौणश्चेन्नात्मशब्दात् श्री यदुक्तं गौणेक्षणसाहचर्यात्सतोपीक्षणव्यपदेशः स गौणो नियतपूर्वावस्थाभि-
प्रायो गौण इति तन्न ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मेति सच्छब्दप्रतिपादितस्यात्मशब्देन व्यपदेशात् एतदुक्तं भव-
ति ऐतदात्म्यमिदं सर्वं स आत्मेति चेतनाचेतनात्मकस्य प्रपंचोद्दिष्टेन स आत्मेत्यात्मत्वोपदेशोयं नाचेतने प्रधाने
संगच्छत इति अतस्तेजोबन्नानामपि परमात्मैवात्मेति तेजःप्रभृतयोपि शब्दाः परमात्मन एव वाचकाः तथा
हि हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति परमात्मानुप्रवेशादेव तेजःप्र-
भृतीनां वस्तुत्वं तन्नामभाक्त्वं चेति तत्तेज ऐक्षत ता आप ऐक्षंतेत्यपि मुख्य एवेक्षणव्यपदेशः अतः साहचर्यादि-
पि तत्सेक्षणस्य न गौणत्वाशंकावकाश इति सूत्राभिप्रायः इतश्च न प्रधानं सच्छब्दप्रतिपाद्यं श्री तन्निष्ठ-
स्य मोक्षोपदेशात् श्री मुमुक्षोः श्वेतकेतोस्तत्त्वमसीति सदात्मकत्वानुसंधानमुपदिश्यते तन्निष्ठस्य तस्य तावदेव चिरं
यावन्न विमोक्ष्ये अथ संपत्स्य इति शरीरपातमात्रान्तरायो ब्रह्मसंपत्तिलक्षणो मोक्षस्तूपदिशति यदि च प्रधानम-
चेतनं कारणमुपदिश्यते तदा तदात्मकत्वानुसंधानस्य मोक्षसाधनत्वोपदेशो नोपपद्यते यथा क्रतुरस्मिँल्लोके पुरु-
षो भवति तथेतः प्रेत्य भवतीति तन्निष्ठस्याचेतनसंपत्तिरेव स्यात् न च मातापितृसहस्रेभ्योपि वत्सलतरं शास्त्रमेवंविधमपत्र-
याभिहेतुभूतामचित्संपत्तिमुपदिशति प्रधानकारणवादिनोपि हि प्रधाननिष्ठस्य मोक्षं नाभ्युपगच्छंतीति इतश्च न प्रधा-
नं श्री हेयत्वावचनाच्च श्री यदि प्रधानमेव कारणं सच्छब्दाभिहितं भवेत् तदा मुमुक्षोः श्वेतकेतोस्तदात्मकत्वं मोहवि

श्री
भा
५६

सत्यकारेणाभिः श्रुतिभिर्निरस्तो वेदितव्यः पारमार्थिकमुख्येक्षणादिगुणयोगि जिज्ञास्यं ब्रह्मेति स्थापनात् नि
र्विशेषवादे हि साक्षित्वमप्यपारमार्थिकं वेदान्तवेद्यब्रह्मणश्च जिज्ञास्यतया प्रतिज्ञातं ब्रह्म चेतनमितीक्षतेर्नाशब्दमि
त्यादिभिः सूत्रैः प्रतिपाद्यते चेतनत्वं नाम चैतन्यगुणयोगः अत ईक्षणविरहिणः प्रधानतुल्यत्वमेव किंच नि
र्विशेषप्रकाशमात्रब्रह्मवादे तस्य प्रकाशत्वमपि दुरुपपादं प्रकाशो हि नाम स्वस्य च परस्य च व्यवहारयोग्यतामा
पादयन् वस्तुविशेषः निर्विशेषवस्तुनः तदुभयरूपत्वाभावात् घटादिवदचित्त्वमेव तदुभयरूपत्वाभा
वेऽपि तत्तत्समर्थत्वमस्तीति चेन्न तत्समर्थत्वे हि तत्सामर्थ्यमेव सामर्थ्यगुणयोगे हि निर्विशेषवादः परित्यक्तः स्या
त् अथ श्रुतिप्रामाण्यादयमेको विशेषोऽभ्युपगम्यत इति चेत् एतर्हि तत एव सर्वज्ञता सर्वशक्तित्व सर्वेश्वरत्व सर्वक
ल्याणाकरत्व सकलहेयप्रत्यनीकत्वादयः सर्वेऽभ्युपगन्तव्याः शक्तिमत्त्वं च कार्यविशेषानुगुणत्वं तच्च कार्यवि
शेषैकनिरूपणीयं कार्यविशेषस्य निष्प्रमाणकत्वे तदेकनिरूपणीयं शक्तिमत्त्वमपि निष्प्रमाणकं स्यात् किंच निर्वि
शेषवस्तुवादिनो वस्तुत्वमपि निष्प्रमाणकं प्रत्यक्षानुमानागमजन्यानुभवाः सविशेषविषया इति पूर्वमेवोक्तं तस्माद्वि
चित्रचेतनाचेतनात्मकजगद्रूपेण बहु स्यामितीक्षणात्मकः पुरुषोत्तम एव जिज्ञास्यं ब्रह्मेति सिद्धं एवं जिज्ञासितस
ग्रहणाश्रितजन्मभोग्यभूतजडरूपसत्त्वरजस्तमोमयप्रधाना [illegible]व्यक्तिरुक्ता इदानीं कर्मवश्या त्रिगुणात्मकप्रकृतिसं
सर्गनिमित्तनानाविधानन्तदुःखसागरनिमज्जनेनाश्रुद्रष्टुश्च प्रत्यगात्मनोऽन्यो निखिलहेयप्रत्यनीको निर

52

हेति इतश्च न प्रधानं गतिसामान्यात् ॥ आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत् स ऐक्षत लोकान्नु सृजा इति स इमांल्लो
कानसृजत तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी तस्य ह वा एतस्य
महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिश्रुतिवाक्यानां या गतिः प्रवृत्तिस्तत्सामान्यात्तत्समानार्थत्वादस्य तेषु सर्वे
षु सर्वेश्वरः कारणमवगम्यते तस्मादत्रापि सर्वेश्वरः कारणमिति निश्चीयते इतश्च न प्रधानं श्रुतत्वाच्च ॥ श्रुत
मेव ह्यस्यामुपनिषदि अस्य सर्वज्ञवाच्यस्यात्मत्वेन नामरूपव्याकर्तृत्वं सर्वतत्त्वं सर्वशक्तित्वं सर्वाधारत्वमपहतपाप्म
त्वादिकं सत्यकामत्वं सत्यसंकल्पत्वं चानेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि सन्मूलाः सोम्येमाः प्रजाः सदायत
नाः सत्प्रतिष्ठाः ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहितं तस्मिन्कामाः समाहि
ताः एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प इति तथा च श्रुत्यन्तराणि न त
स्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिंगं स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः सर्वाणि
रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन्यदास्ते अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा विश्वात्मानं परायणं पतिं वि
श्वस्यात्मेश्वरं यच्च किंचिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः एष सर्वभूता
न्तरात्मापहतपाप्मा दिव्यो देव एको नारायण इत्यादीनि तस्माज्जगत्कारणवादिवाक्यं न प्रधानप्रतिपादनयोग्यम् ॥
अतः सर्वज्ञः सर्वशक्तिः सर्वेश्वरो निरस्तसमस्तदोषगन्धोऽनवधिकातिशयासंख्येयकल्याणगुणगणमहार्णवः पु
रुषोत्तमो नारायण एव निखिलजगदेककारणं जिज्ञास्यं ब्रह्मेति स्थितं अत एव निर्विशेषचिन्मात्रब्रह्मवादोऽपि

तामयो म नोमयो विज्ञानमय इति तत्र तत्र बुध्यवतरणक्रमेण निर्दिश्य सर्वान्तरभूतं जीवात्मानमन्योन्तर आत्मा आनंद
मय इत्युपदिश्यान्तरात्मपरं परां समापयति । अतो जीवात्मस्वरूपमेव ब्रह्मविदाप्नोतीति प्रक्रान्तं ब्रह्म तदेवानंदमय
इत्युपदिष्टमिति निश्चीयते ननु च ब्रह्म पुच्छं प्रतिष्ठेत्यानंदमयादन्यद्ब्रह्मेति प्रतीयते । नैवं ब्रह्मणो वस्तुस्वभावविशेषेण
पुरुषविधत्वरूपितं शिरः पक्षपुच्छरूपेणोपदिश्यते यथान्नमयो देह एव स्वस्मादनतिरिक्तैः स्वावयवैरेव तस्येदमेव
शिर इत्यादिना शिरः पक्षपुच्छवत्तया निर्दिष्टः । तथानंदमय ब्रह्मापि स्वस्मादनतिरिक्तैः प्रियादिभिर्दिष्टं तत्रा
वयवत्वेन रूपितानां प्रियमोदानंदानामाश्रयतया ऽवएद्ममानंदमयं ब्रह्मपुच्छं प्रतिष्ठेत्युच्यते । यदि चानंदमयादन्यद्
ब्रह्माभविष्यत् । तस्माद्वा एतस्मादानंदमयादन्योन्तर आत्मा ब्रह्मेत्यपि निरदेक्ष्यत न चैवं निर्दिश्यते । एतदुक्तं भवति । ब्रह्मवि
दाप्नोति परमिति प्रक्रान्तं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेति लक्षणतः सकलेतरव्यावृत्ताकारं प्रतिपाद्य तदेव तस्माद्वा एत
दात्मन इत्यात्मशब्देन निर्दिश्य तस्य सर्वान्तरात्मत्वेनात्मत्वं वंजयद्वाक्यमन्नमयादिषु तत्तदन्तरतयात्मत्वेन निर्दिश्यान्न
प्राणमयादीनतिक्रम्यान्योन्तर आत्मानंदमय इत्यात्मशब्देन निर्दिश्यानंदमये समापयति । अत आत्मशब्देन प्रक्रां
तं ब्रह्मानंदमयमिति निश्चीयत इति ननु च ब्रह्मपुच्छं प्रतिष्ठेत्युक्त्वा ऽसन्नेव स भवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चे
द्वेद सन्तमेनं ततो विदुरिति ब्रह्मज्ञानाज्ञानाभ्यामात्मनः सद्भावासद्भावौ दर्शयति नानंदमयज्ञानाज्ञानाभ्यां न ह्यानंदमय
स्य प्रियमोदादिरूपेण सर्वलोकविदितस्य सद्भावासद्भावशंका नाप्युक्ता अतो नानंदमयमधिकृत्यायं श्लोक उदाहृतः ।
तस्मादानंदमयादन्यद्ब्रह्म नैवं इदं पुच्छं प्रतिष्ठा पृथिवी पुच्छं प्रतिष्ठा अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा महः पुच्छं प्रतिष्ठा इत्येवमु

तिशयानंदं ब्रह्मेति प्रतिपाद्यते श्री आनंदमयोऽभ्यासात्. तैत्तिरीया अधीयते. स वा एष पुरुषोऽन्नरसमय इति प्रकृत्य त
स्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानंदमय इति तत्र संदेहः किमयमानंदमयो बंधमोक्षभागिनः प्रत्य
गात्मनो जीवशब्दाभिलपनीयादन्यः परमात्मा उत स एवेति किं युक्तं प्रत्यगात्मेति कुतः तस्यैव एव प्रकृतत्वात् प्र
त्येमानंदमयस्य शरीरत्वश्रवणात् शारीरो हि शारीरसंबंधी जीवात्मा ननु च जगत्कारणतया प्रतिपादितस्य ब्र
ह्मणः सुखप्रतिपत्त्यर्थमन्नमयादीननुक्रम्य तदेव जगत्कारणमानंदमय इत्युपदिश्यते जगत्कारणं चेतदेव ते
तील तिस्रावणात् सर्वज्ञः सर्वेश्वर इत्युक्तं सत्यं उक्तं सतु जीवान्नातिरिच्यते. अनेन जीवेनात्मनानुप्रविश्य
नामरूपे व्याकरवाणीति तच्च मसिस्थानेकैलोदूलिकारणतया निर्दिष्टस्य जीवसामानाधिकरण्यनिर्देशात्.
सामानाधिकरण्यं हि एकत्वप्रतिपादनपरं यथा सोऽयं देवदत्त इत्यादौ इत्थं पूर्विका च सत्त्वेश्वेतनस्य जी
वस्योपपद्यत एव अतो ब्रह्मविदाप्नोतीति जीवस्याचित्संसर्गविमुक्तं स्वरूपं प्राप्यतयोपदिश्यते अचिद्वियुक्त
स्य स्वरूपस्य तस्य लक्षणमिदमुच्यते सत्यं ज्ञानमनंतं ब्रह्मेति तद्रूपप्राप्तिरेव हि मोक्षः न ह वै सशरीरस्य सतः प्रि
याप्रिययोरपहतिरस्ति अशरीरं वाव संतं न प्रियाप्रिये स्पृशत इति अतो जीवस्याचिद्वियुक्तं स्वरूपं प्राप्य
तयोपक्रांतमानंदमय इत्युपदिश्यते तस्याहि व्याख्याता एवं द्रष्ट्या येनात्मस्वरूपं द्रष्टुं विनु अन्नमयः पुरुष इति प्र
थमं शरीरं निर्दिश्यते तदनंतरभूतं तस्य धारकं पंचवृत्तिप्राणं तस्याभ्यंतरभूतं मनः तदनंतरभूतां च बुद्धिं प्रा

श्री. भा. ५

साधारणानिलयनत्वानिलयनत्वादिसिद्धधर्मविशेषैर्विभज्य निर्दिष्टमाकाशं विज्ञानं चाविज्ञानं श्रुतिः ८

श्री. भा. ५५

प्राणमये त्वगत्या स्वार्थिकता श्रीयते- इह तु तद्वतो जीवस्य संभवान्नानर्थकत्वं स्यादेवं मुक्तस्य प्रत्यगात्मात्मा
एवेत्यभ्यधीष्महि प्राणमयादेतु मयट्प्रत्ययसंभवोऽनन्तरमेव वक्ष्यते कथं तर्हि विज्ञानमयविषयश्लोके विज्ञानं य
ज्ञं तनुत इति केवलविज्ञानपदोपादानमुपपद्यते ज्ञातुरेवात्मनः स्वरूपमपि स्वप्रकाशतया विज्ञानमित्युच्यत इति
न दोषः ज्ञानैकनिरूपणीयत्वाच्च ज्ञातुः स्वरूपस्य स्वरूपनिरूपणधर्मशब्दा हि धर्ममुखेन धर्मिस्वरूपमपि प्रतिपादय
ति गवादिशब्दवत् कृत्यल्युटो बहुलमिति वा कर्तरि ल्युडाश्रीयते- नन्द्यादित्वं वाश्रित्य नन्द्यादिना कर्तरि ल्यु
ट्- अत एव विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि चेति यज्ञादिकर्तृत्वं विज्ञानस्य श्रूयते न च बुद्धिमात्रस्य कर्तृत्वं संभ
वति- अचेतने बुद्धिर्हि चेतनोपकरणभूतैव विज्ञानमयात्प्राचीनेष्वन्नमयादिषु न चेतनधर्मभूतकर्तृत्वं श्रूयते- अत
एव च चेतनमचेतनं चेति विज्ञानपदेन तद्गुणं चेतनं वदन्ति- तथान्तर्यामिब्राह्मणे यो विज्ञाने तिष्ठन्निति यस्य काण्व
ठगतस्य पर्यायस्य स्थाने य आत्मनि तिष्ठन्निति पर्यायमधीयानाः माध्यंदिनाः काण्वपाठगतविज्ञानपदं निर्दि
जीवात्मेति स्फुटीकुर्वन्ति- विज्ञानमिति च नपुंसकलिंगं वस्तुत्वाभिप्रायं तदेवं विज्ञानमयाज्जीवादन्यः परमात्मानन्द
मयः- यद्यपि विज्ञानं तनुत इति श्लोके ज्ञानमात्रमेवोपादीयते न ज्ञाता तथाप्यन्योऽन्तर आत्मा विज्ञानमय इति ज्ञा
नृ ज्ञानैवोपदिश्यते- यस्मात्ताः प्रजाः प्रजायन्त इत्यत्र श्लोके केवलान्नोपादानेऽपि स वा एष पुरुषोऽन्नरसमय इत्यत्र
नान्नमात्रं निर्दिष्टं अपि तु तदन्नमयस्याधिकारः एतत्सर्वं हृदि निधाय सूत्रकारः स्वयमेव भेदव्यपदेशाच्चेत्यनन्त
रमेव वदति ॥ यदुक्तं जगत्कारणतया निर्दिष्टस्य प्रधानेन जीवेनात्मनानुप्रविश्य तत्त्वमसीति जीवसामानाधिकर
ण्य निर्देशाज्जगत्कारणमपि जीवरूपान्नातिरिच्यत इति जीवस्यैव स्वरूपं ब्रह्मविदाप्नोति परमिति प्रकारान्तरेण सूत्रं व्याख्या
ति १

प्र २

54

क्ताः । तत्र तत्रोदाहृताः अन्नाद्वै प्रजाः प्रजायंते इत्यादयः श्लोकाः पुच्छमात्रप्रतिपादनपराः अपि त्व
न्नमयादिपुरुषमात्रप्रतिपादनपराः एवमत्राप्यानंदमयस्यापि असन्नेवेति श्लोकेनानंदमयव्यतिरिक्तस्य
पुच्छस्य आनंदमयस्यैव ब्रह्मत्वे प्रियमोदादिरूपेणारूपितस्यापरिच्छिन्नानंदस्य सद्भाववन्नानात्मानन्यकायुक्ते
व पुच्छब्रह्मणोऽप्यपरिच्छिन्नानंदत्वेनैव प्रसिद्धता । किंच प्रियशिरस्त्वाद्यवत्त्वाभावाद्ब्रह्मणो नानंदमयं ब्रह्मेति किंच
ब्रह्मणः पुच्छत्वप्रतिष्ठात्वाभावात्पुच्छमपि ब्रह्म न भवेत् अविद्यापरिकल्पितस्य वस्तुनस्तत्त्वाप्राश्रयभू
तत्वाद्ब्रह्मणः पुच्छं प्रतिष्ठेति रूपणमात्रमित्युच्यते इत्थं तत्सुखाद्यात्मस्यानंदमयस्य ब्रह्मणः प्रियशिरस्त्वादि
रूपणं भविष्यति एवं च सत्यं ज्ञानमनंतं ब्रह्मेति विकारास्पदजडपरिच्छिन्नवस्तुवैलक्षण्यवत्तस्य सुखाद्यात्मकतया
नंदमयत्वमुपदिश्यते तत आनंदैकरसानंदरूपे ब्रह्मणि आनंदमय इति मयट् प्राचुर्ये एव स्वार्थिको द्रष्ट

नंदमा॰

व्यः तस्मादविद्यापरिकल्पितविविधविचित्रदेवादिभेदभिन्नस्य जीवात्मनः स्वाभाविकं एकं रूपमखंडैक
रसमानंदमयं इत्युच्यते इत्यानंदमयः प्रत्यगात्मैव ब्रह्मेत्यवगम्यते । आनंदमयोऽभ्यासात् आनंदमयः परमा
त्मा कुतः अभ्यासात् सैषानंदस्य मीमांसा भवतीत्यारभ्य यतो वाचो निवर्तंत इत्येवमंतेन वाक्येन यतेः श्रुतिर्नेत्र
रकमेणानिरतिशयानंदपर्यायस्य श्रवणादानंदेनैव दुःखासंभिन्नापरिमितसुखलवभागिनि जीवात्मन्यसंभव
न्निखिलहेयप्रत्यनीककल्याणैकतानं सकलेतरविलक्षणं परमात्मानमेव स्वासाधारणमावेदयति । यदाह तस्माद्वा
एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानंदमय इति विज्ञानमयाद्धि जीवाद्बुद्धिमात्रमयाद्व्यतिरेकप्रतीतेः

अथोच्यते यः सर्वं घटत्वपारमार्थिकः कल्पालौकितानस्वभावनानुमिथ्याभूताः हतैवं नापत्रयाभिः ततश्चेत नोज्ञजीवविषयाप्र
वृत्तेषा श्रुता पत्रयाभि हतिरेवाथ पारमार्थिकी कल्पा लौकितान स्वभावस्तम्भीति कल्पित इति बोधयत्स भगु जीव
यति अपेतहो षपरिजिहीर्षया ब्रह्मणो निर्विशेषचिन्मात्रातिरिक्तजीवत्वदुःखित्वादिकं सत्यसंकल्पत्वजगत्का
रणत्वकल्याणगुणत्वाद्यपि मिथ्याभूतमिति कल्पनीयमिति चेत् अहो भवतो वाक्यार्थपर्यालोचनकुशलता एकवि
ज्ञानेन सर्वविज्ञानं प्रतिज्ञातं सर्वस्य मिथ्यात्वे सर्वस्य ज्ञातव्यस्याभावान्न संपद्यते यैकविज्ञानं परमार्थविषयं
तथैव सर्वविज्ञानमपि यदि परमार्थविषयं तदन्तर्गतं च तदात ज्ञानेन सर्वविज्ञानमिति शक्यते वक्तुं नाहि प
रमार्थशुक्तिज्ञानेन तदाश्रयमपरमार्थं रजतं ज्ञातं भवति अथोच्यते एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अय
मर्थः निर्विशेषब्रह्ममात्रमेव सत्यमन्यदसत्यमिति तर्हि येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति न घटेत येन
श्रुतेनाश्रुतमपि श्रुतं भवतीति ह्यस्य वाक्यस्यार्थः कारणतयोपलक्षितनिर्विशेषवस्तुमात्रस्यैव सत्यत्वे स्यादिति श्रुतं ८
ज्ञातः यथा सोम्यैकेन मृत्पिंडेन सर्वं मृण्मयं विज्ञातं स्यादिति दृष्टान्तो न घटते मृत्पिंडविज्ञानेन तद्विकारस्य ज्ञातता निदर्शिता
तत्रापि विकारस्यासत्यताभिहितेति चेत् मृद्विकारस्य रज्जुसर्पादिवदसत्त्वं श्रुत्यैव सिद्धमिति प्रतिज्ञातार्थसंभावना
प्रदर्शनाय यथा सोम्येति प्रसिद्धवदुपन्यासो न युज्यते. न च तत्त्वमस्यादिवाक्यजन्यज्ञानेन तन्नेः प्राग्विकारजातस्या[illegible]मा
पादयितुं तर्कानुगृहीतमननुगृहीतं वा प्रमाणमुपलभामहे इत्ययमर्थः तदनन्यत्वमारंभणशब्दादिभ्य इत्यत्र वक्ष्यते. तथा
सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य ना
मरूपे व्याकरवाणि सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ऐतदात्म्यमिदं सर्वमित्यादिना सजगतः सदात्मक

वक्तव्येनानंदमयः सुपदिष्ट इति न प्युक्तं जीवस्य चेतनत्वे सत्यपि तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्यादिसंकल्प
पूर्विकानंतविचित्रसृष्टियोगानुपपत्तेः अनुभावस्यापि हि तस्य सर्गादिजगद्व्यापारासंभवो जगद्व्यापारवर्जं भोगमात्रसा
म्यलिंगादित्यत्रोपपादयिष्यते कारणभूतस्य ब्रह्मणो जीवस्वरूपत्वानभ्युपगमे अनेन जीवेनात्मना तत्त्वमसीति सामानाधि
करण्यनिर्देशः कथमुपपद्यत इति चेत् कथं वा निरस्तनिखिलदोषगंधस्य सत्यसंकल्पस्य सर्वज्ञस्य सर्वशक्तेरनवधि
कातिशयासंख्येयकल्याणगुणस्य सकलभूतकारणस्य ब्रह्मणो नानाविधानंतदुःखाकरकर्माधीनचिंतितनिमिषि
तादिसकलप्रवृत्तिजीवरूपत्वं अन्यस्य मिथ्यात्वेनोपपद्यत इति चेत् कस्य भोः किं हेयसंबंधस्य किं वा हेयप्रत्यनीकक
ल्याणैकतानस्वभावस्य हेयप्रत्यनीककल्याणैकतानस्य ब्रह्मणो नाद्यविद्याश्रयत्वेन हेयसंबंधः मिथ्याप्रतिभासो
मिथ्यारूपमिति चेत् विप्रतिषिद्धमिदमभिधीयते ब्रह्मणो हेयप्रत्यनीककल्याणैकतानत्वमविद्याश्रयत्वेनानंतदुः
खविषयमिथ्याप्रतिभासाश्रयत्वं चेति अविद्याश्रयत्वं तत्कार्यदुःखप्रतिभासाश्रयत्वं चैव हि हेयसंबंधः तत्सं
बंधित्वे तत्प्रत्यनीकत्वं च विरुद्धमेव तथा हि तस्य मिथ्यात्वान्न विरुद्धमिति माचोचः मिथ्याभूतमप्यपुरुषार्थ
एवप्यनिरसनाय सर्वे वेदान्ताः आरभ्यंत इति ब्रूषे निरसनीयापुरुषार्थयोगश्च हेयप्रत्यनीककल्याणैकतानतया वि
रुध्यते किं कुर्मो येनाश्रुतं श्रुतं भवतीत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय सदेव सोम्येदमग्र आसीदित्यादिना निखिलज
गदेककारणतां तदैक्षत बहु स्यामिति सत्यसंकल्पतां सर्वज्ञस्य सर्वशक्तेरनवधिकातिशयासंख्येयकल्याणगुणस्य स
कलकारणभूतस्य ब्रह्मणः प्रतिपाद्य तस्यैव ब्रह्मणः तत्त्वमसीति सामानाधिकरण्येनानंतदुःखाश्रयजीवैक्यं प्रतिपादितं
तदन्यथानुपपत्त्या ब्रह्मण एवाविद्याश्रय[illegible] जीव इति चेत् [illegible] अन्यथाप्युपपन्नं विरुद्धं च न कल्पनीयं।

श्री. भा.
५७

56

कालत्रयसम्बन्धदेशविशिष्टत्वस्यैतेनैव प्रत्येकं सन्निहितं तद्देशवर्तमानत्वकालविशिष्टतया प्रतिपादनानुपपत्तेः सम्प्रदेशकालोपल
क्षितस्वरूपमात्रैकं सामानाधिकरण्येन प्रतिपाद्यते यद्यपि नीलमित्याद्यनेकपदश्रवणे प्रतीयमाने विशेषणं सामा
नाधिकरण्येनैवार्थविरोधान्न प्रतिपाद्यते तथापि वाच्यार्थप्रधानांशस्य प्रतिपादनाल्लक्षणा अपि तु विशेषणापा
स्यापि च समानं सर्वत्र सामानाधिकरण्यस्यैष एव स्वभाव इति न काप्यत्र दोष इति तदिदमसारं सर्वत्रैव वाक्येषु
पदानामनुमतिसिद्धार्थसंसर्गविशेषमात्रप्रत्यायकत्वं तत्र समानाधिकरणपदानामपि नीलादिपदानां नैल्यादि
विशिष्टैकार्थमनुमतिसिद्धः पदान्तरार्थसंसर्गोऽभिधीयते यथा नीलमुत्पलमानयेत्युक्ते नीलिमादिविशिष्टमेवानीयते
यथा च शिंशपा वृक्ष इत्युदिते मानेन गगनस्थितश्चेति चक्षुषा वगतेन विशेषणविशिष्ट एवार्थः प्रतीयते ॥ एवं वेदान्तवाक्ये
ष्वपि सामानाधिकरण्यनिर्देशेषु लक्षणविशिष्टमेव ब्रह्म प्रतिपत्तव्यम् । न च विशेषणाविवक्षायामितरविशिष्ट
कार्यं वस्त्वमनतिशेषितं अपि तु सर्वैर्विशेषणैर्विशिष्टं स्वरूपमेव विशिष्टत्वं तथा हि भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मि
न्नर्थे वृत्तिः सामानाधिकरण्यं अन्वयेन निवृत्त्या वा पदान्तरप्रतिपाद्याकारादाकारान्तरयुक्ततया तस्यैव वस्तुनः पदान्तर
प्रतिपाद्यत्वं सामानाधिकरण्यकार्यम् ॥ यथा देवदत्तः श्यामो युवा लोहिताक्षः अदीनोऽकृपणोऽनवद्य इति यत्रैवैक
स्मिन्वस्तुनि समन्वयायोग्यविशेषणद्वयं समानाधिकरणपदनिर्दिष्टं तत्राप्यन्यतरस्यार्थस्य वस्तुस्वरूपैकत्वमाश्रीयते यथा ऽयं म.
हिक इति नीलोत्पलादिषु तु विशेषणद्वयस्यान्वयाविरोधादेकमेवोभयविशिष्टं प्रतिपाद्यते अयमनुषङ्ग एकविशेष
प्रतिसंबन्धित्वेनानिरूप्यमाणो विशेषणान्तरप्रतिसंबन्धित्वाच्छिन्नलक्षणमिति घटपटयोरिवैकविभक्तिनिर्देशो ऽप्रति
पादनासंभवात्समानाधिकरणत्वाद्वस्तुनो विशिष्टप्रतिपादनपरत्वं अपि तु विशेषणामुखेन स्वरूपमुपस्थाप्य तदेकप्रति

तासृष्टेः पूर्वकाले नामरूपविभागाभावे तज्जगदुत्पत्तेरस्य स्वरूपं वाच्यस्य प्रकरणः स्वप्रतिष्ठितकं निमित्तांतरानपेक्षत्वं सृष्टिकालेऽप्र
हमेवानेकं स्यामिति बहु स्यामित्यनन्यसाधारणः संकल्पविशेषः यथासंकल्पमनेकविचित्रतत्त्वानां विलक्षण
कमविशेषविशिष्टसृष्टिः समस्तेषु चेतने पुरुषात्मके जीवानुप्रवेशेनानेकनामरूपव्याकरणं स्वप्रतिष्ठितरूपसमस्त
स्वस्य मूलत्वं स्थापनत्वं स्वप्रवर्तकत्वं स्वेनैव जीवनं स्वप्रतिष्ठितत्वमित्याधनेकविशेषाः पूर्वस्मिन्नेक समधिगम्याः प्रति
पादिताः तत्सर्वं छिन्नतया प्रकरणान्तरेऽप्युपपन्नतमाख्यात्वादिनिरस्तानिखिलदोषता सर्वज्ञता सर्वेश्वरत्व सत्यकामत्व
सत्यसंकल्पत्व सर्वानंदकरणानियतिप्राप्त्यानेकादयः सकलेतरप्रमाणाविषयाः सहस्रशः प्रतिपादिताः। एवमनन्य
गोचरानेनविशेषणविशिष्टं प्रकृतब्रह्मपरामर्शिना तच्छब्देन निर्विशेषवस्तुमात्रोपदेशपरत्वमसंगतत्वेनोन्मत्तप्रल
पितमिति तत्पदं च संसारित्वविशिष्टजीववाचितयापि निर्विशेषस्वरूपोपस्थापनपरत्वे स्वार्थः परित्यक्तः स्यात् निर्विशे
षप्रकाशस्वरूपस्य च वस्तुनः स्वाविद्यया तिरोधाने स्वरूपनाशप्रसंगादिभिर्न संभवतीति पूर्वमेवोक्तं एवं च सति समा
नाधिकरण्यवतामपि तत्त्वमपि तच्छब्दयोः मुख्यार्थपरित्यागेन लक्षणा च समाश्रयणीया। अथोच्येत समा
नाधिकरण्यवतामनेकार्थप्रतिपादनपरतया विशेषणांशो नास्य पर्याप्ते भावादेवविशेषणनिवृत्तेर्वस्तुमात्रैकत्वप्र
तिपादनान्न लक्षणाप्रसंगः। यथा नीलमुत्पलमिति पदद्वयस्य विशेष्यैक्यप्रतिपादनपरत्वेन नीलत्वोत्पलत्वरूपविशे
षणद्वयं न विवक्ष्यते न हि तत्राप्याहि नीलत्वविशिष्टाकारेतोत्पलत्वविशिष्टाकारस्यैकत्वप्रतिपादनं प्रकल्पते॥
तन्न संभवति न हि नीलत्वविशिष्टाकारे तन्मुत्पलपदे न विशिष्टाः [illegible] जातिगुणयोरन्योन्यसमवायप्रसंगान्॥
मतो नीलत्वोत्पलत्वोपलक्षितस्य [illegible] सामानाधिकरण्येन प्रतिपाद्यते यथा सोऽयं देवदत्त इत्यत्र तत्

स्वत्वे [illegible] नाभाति [illegible] विशेष्यैक्य [illegible]

वहिशेषणाविशेष्यभावेन संबंधितयाभिहितयोः क्रियायैक कर्मान्वयाविरोधात्तस्मात्तिङः क्रियसाधनम् तैकत्वाद्यन्यान्वयनियमः ।प्रवृ-
त्तिनिमित्तविशेष्यभावेन संबंधितयाभिहितयोः स्यात् तद्वाक्यस्यार्थद्वयविधानं स्यात् न चेत् तदस्ति अरुणायेति पदेनैवारुणिमवि-
शिष्टैकहायन्याः क्रयसंबंधवदरुणिमसंबंधो वाक्यार्थः संभवः स्यात् तद्वाक्यस्यार्थद्वयविधानं स्यात् नगुणसंबंधो विशिष्टद्रव्यैकमेव हि सामानाधि-
शिष्टद्रव्यमभिहितम् एकहायनीपदस्य सामानाधिकरण्येन तस्यैकहायनीत्वमात्रमवगम्यते नगुणसंबंधो विशिष्टद्रव्यैकमेव हि सामाना-
करण्यार्थः। भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकार्थे वृत्तिः सामानाधिकरण्यमिति हि तल्लक्षणम् अत एव रक्तः पटो भवतीत्यादिष्वेकवाक्या
देकवाक्यस्य पटस्य भवनक्रियासंबंधो हि रागस्यार्थो रागसंबंधः रक्तपदेनैवाभिहितः रागसंबंधिद्रव्यं पटद्रव्येतावन्मात्रे सामानाधिकर-
ण्यं नावसेयं एवमेकेन गुणेन द्वाभ्यां वहुभिर्वा तेन तेन पदेन समस्तेन व्यस्तेन वा विशिष्टत्वमुपस्थाप्य सामानाधिकरण्येन सर्वविशेषणानि
विशिष्टद्रव्यार्थ एकत्र तात्पर्येण तस्य क्रियासंबंधाभिधानमविरुद्धं यथा यस्याः पशामीधुवालोहितास्ताः इत्यलं कुण्डलविशिष्टः शुक्लेन वाससा
पदानिकामापादयेत् नीलमुत्पलमानय गामानय शुक्लां गोभनादी अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत् एवमरुणयैक-
हायन्या पिङ्गाक्ष्या सोमं क्रीणातीति एतद्भवति यथा काष्ठैः स्थाल्यामोदनं पचेदित्यनेककारकविशिष्टैकक्रियायुगपत्प्रतीयते तल्लक्षणा
एवास्मानाधिकरण्यपदसंघाताभिहिते एकैककारकेतत्तत्कारकप्रतिपत्तिवेलायामेवानेकविशेषणविशिष्टं युगपत्प्रतिपन्नं क्रियया
मन्वेतीति न कश्चिद्विरोधः रक्तादिरेः शुक्लः कोष्ठः समवायि माणिमाण्डे पायसं पाल्योदनं समर्थः पाचकः पचेदित्यादिष्विति यदुक्तमुपा-
तद्रव्यथोक्तस्य गुणपदः केवलगुणाभिधायी त्वरुणायेति पदेन केवलगुणस्यैवाभिधानमिति तन्नोपपद्यते लोकवेदयोर्द्वयवा
चिपदसमानाधिकरणस्य गुणवाचिनः क्वचिदपि केवलगुणाभिधानादर्शनात् उपात्तद्रव्यकवाक्यस्य गुणपदं केवलगुणाभिधायी
त्यसंगतम् पटः शुक्ल इत्यादिरूपात्तद्रव्यकेष्वपि गुणविशिष्टस्यैवाभिधानात् पटस्य शुक्लः इत्यत्र षोडशविशिष्टपटप्रतिप
त्तिः समानविभक्तिनिर्देशः कृता न पुनरुपात्तद्रव्यकत्वेन ता तत्रैव पटस्य शुक्लो भागः इत्यादिषु समानविभक्तिनिर्देशो शोक्लादिविशि-
ष्टद्रव्यं प्रतीयते यत्पुनः क्रयस्यैकहायन्यवरुद्धतयारुणिमाः क्रयान्वयो न संभवतीति तदपि विरोधिगुणादीति तद्द्रव्यवाचिपदसमा
नाधिकरणगुणपदस्य तदाश्रयगुणाभिधानेन क्रियापदान्वयाविरोधादसङ्गतेरात्तेनोक्तत्वात्मेनारुणिमाः पलाद्रव्यान्वयेसि

तत

पादेन पचत्वमेवेति स्यादेतदेवं यदि विशेषणद्रव्यप्रतिसंबंधित्वमात्रमेवैकं निरूप्यात् नचैतदस्ति एकस्मिन् धर्मिण्युपसंहर्तुम
योग्यधर्मद्वयविशिष्टत्वमेव हि केचिन्निरूपयन्ति अयोग्यतानाञ्च प्रमाणान्तरसिद्धायाः तत्त्वपदत्वयोः नीलमुत्पलमित्यादिषु
तु दण्डित्वकुण्डलित्ववत रूपवत्वरसवत्त्वगंधवत्वादिवच्च विरोधो नोपलभ्यते नकेवलमविरोध एव प्रवृत्तिनिमित्तभेदे
नैकार्थबोधकत्वरूपं सामानाधिकरण्यमुपपादयत्येव धर्म्मद्वयविशिष्टत्वाम् अन्यथास्य रूपमात्रे ऽप्यनेकपदप्रवृत्तौ निमि
त्ताभावात् सामानाधिकरण्यमेव न स्यात् विशेषणानां हि संबंधानादरेणावस्तुस्वरूपोपलक्षणपरत्वे सत्येकेनैव वस्तूपल
क्षितमित्युपलक्षणान्तरमनर्थकमेव उपलक्षणान्तरोपलक्ष्याकारानुपगमे तेनाकारेण सविशेषत्वप्रसंगः सोयं देवद
त्त इत्यत्रापि नलक्षणाभेदो विद्यते विरोधाभावाद् द्वयोः कालयोः संबंधितया प्रतीतस्य सन्निहितदेशसंबंधितया वर्तमानत्वावि
रोधात् अतएव सोयमिति प्रत्यभिज्ञायाः कालद्वयसंबंधिनो वस्तुन ऐक्यमुपपाद्यते वस्तुनः स्थिरत्ववादिभिः अन्यथा प्रती
तिविरोधे सति सर्वेषां क्षणिकत्वमेव स्यात् देशद्वयसंबंधविरोधस्तु कालभेदेन परिहीयते एतत्समानाधिकरणपदानामनेकवि
शेषणविशिष्टैकार्थवाचित्वं अत एवारुणयैकहायन्या गवा सोमं क्रीणातीत्यत्रारुण्यादिविशिष्टैकहायन्याः क्रयसाधनत्व
मभिधीयते यदुक्तं ग्रहैकत्वे द्रव्यगुणयोरेककर्म्मण्यनियमः स्यादिति तत्र एवं पूर्वपक्षी मन्यते पृथगरुणयेतिपदमारुण्येन हि गुणस्या
विद्रव्यप्रकारत्वैकस्वभावत्वात् द्रव्यपर्यन्तमेवारुण्यमानमभिदधाति तथ्याश्चैकहायन्यन्च यनियमारुण्यम्नो न सम्भवति
एकहायन्या सोमं क्रीणातीत्यत्रारुणयेत्यर्थद्वयविधानासंभवात् ततश्चारुणयेति वाक्यं भित्वा प्रकरणविहितसर्वद्रव्यपर्यन्तमेवा
रुण्यमानमविशेषेणाभिदधाति अरुणयेति स्त्रीलिंगनिर्देशः प्रकरणविहितसर्वलिंगकद्रव्यालोचनार्थः तस्मादेकहायन्य
त्वनियमो नारुण्यस्येत्यारुण्ये न स्यादिति अत्राभिधीयते ग्रहैकत्वे द्रव्यगुणयोरेककर्म्मण्यनियमः स्यात् अरुणयैकहायन्ये त्याद्
यपि विशिष्टद्रव्यैकहायिनीद्रव्यं या [illegible] सामानाधिकरण्य [illegible] पर्यन्तमिदमारुण्यमरुणयेति पदेने

श्री
भा.
५९

न् आत्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृत इत्यादि यः पृथिवीमन्तरे संच
रन् यस्य पृथिवी शरीरं यः अपामन्तरे संचरन् यस्यापः शरीरम् ... यो अक्षरमन्तरे संचरन् यस्याक्षरं शरीरं यं मृत्युर्न वेद
एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः इत्यादीनि सचेतनं जगत्तस्य शरीरत्वेन निर्दिश्य तस्यात्मत्वेन परमा
त्मानमुपदिशन्ति अतश्चेतनाचेतनवाचिनोऽपि शब्दाः स्वैतन्निष्ठस्यात्मभूतं चेतनशरीरकं परमात्मानमेवाभिदधतीति यथा चे
तनदेवादिसंस्थानपिण्डवाचिनः शब्दास्तच्छरीरकजीवात्मन एव वाचकाः चत्वारः पञ्चदशरात्रा इव त्वं गच्छतीत्यादिषु देवाः
अश्व इत्यर्थः शरीरस्य शरीरिणं प्रति प्रकारत्वात् प्रकारवाचिनां शब्दानां प्रकारिण्येव पर्यवसानाच्छरीरस्याभिधायिनां शब्दा
नां शरीरिपर्यवसानं न्याय्यं प्रकारो हि नाम इदमित्थमिति प्रतीयमाने वस्तुनीत्थमिति प्रतीयमानोंऽशः तस्य तद्वस्तुपेक्षत्वेन त
त्प्रतीतेस्तदपेक्षत्वात् तस्मिन्नेव पर्यवसानं युक्तमिति तस्य प्रतिपादकोऽपि शब्दः तस्मिन्नेव पर्यवस्यति अत एव गौरश्वो म
नुष्य इत्यादि प्रकारभूताकृतिवाचिनः शब्दाः प्रकारिणि पिण्डे पर्यवसन्तः पिण्डस्यापि चेतनशरीरत्वेन तत्प्रकारत्वात् पिण्डश
रीरकचेतनस्यापि परमात्मप्रकारत्वाच्च परमात्मन्येव पर्यवस्यन्तीति सर्वे शब्दाः परमात्मनैव वाच्या इति परमात्मवाचकशब्देन
सामानाधिकरण्यं मुख्यवृत्तमेव ननु खण्डो गौः शुक्लः इति जातिगुणवाचिनामेव पदानां द्रव्यवाचिपदैः सामानाधिकरण्यं
दृष्टं द्रव्याणां तु द्रव्यान्तरप्रकारत्वे मत्वर्थीयप्रत्ययो दृष्टः यथा दण्डी कुण्डलीति नैवं जातिवद्गुणवद् द्रव्यवानैनैकमेव सामा
नाधिकरण्ये प्रयोजकं अन्योन्यस्मिन्नप्यभिचारात् यस्य कस्यचित्प्रकारतयैव सद्भावः तस्य तदपृथक्सिद्धेः स्थितिप्रतीतिभि
स्तद्वाचकानां शब्दानां स्वाभिधेयविशिष्टद्रव्यवाचित्वात् धर्म्मान्तरविशिष्टतद्द्रव्यवाचिनां शब्देन सामानाधिकरण्यं मुख्यमे
व यत्तु पुनः पृथक्सिद्धस्य द्रव्यस्य क्वचित् द्रव्यान्तरप्रकारत्वमवगम्यते तत्र मत्वर्थीय इति निरवद्यम् तदेवं परमात्मनः श
रीरतया तत्प्रकारत्वाद्विविधविशिष्टजीवस्य अविशिष्टजीवादिशब्दानिर्देशाविशेष... परमात्मानमेवाभिदधत

द्वेहद्वयगुणयोः कृपणत्वाधनत्वानुपपत्त्या पीतरस्वरान्वयः किमत्रानीयव्यवगतं अत्रैतावद्बोद्धव्यं एवार्थः तस्मात्त्वमस्यादिसामानाधि
करण्येऽपि सद्भूयाभिः तद्विशेषणापरित्यागेनैवैक्यप्रतिपादनं वर्तनीयं तत्त्वनाद्यविद्योपहितानवधिकदुःखभागिनः अशुद्धस्य
भयावस्थस्यानेन नादर्थान्तरभूत मवेतत्वेह यमस्य नीकेकल्याणगुणैकतानं परमात्मानमभ्युपगच्छतो न संभवति अभ्युपगच्छतो
पि समानाधिकरणपदानां यथावस्थितविशेषणविशिष्टैक्यप्रतिपादनपरत्वात् अयोत्वं पदप्रतिपन्नसकलदोषभाक्
त्वं परस्य प्रसज्येत इति चेत् नैतदेवं त्वं पदेनापि जीवान्तर्यामिणः परस्यैवाभिधानात् एतदुक्तं भवति सच्छब्दाभिहि
तं निरस्तनिखिलदोषगंधसत्यसंकल्पमित्याद्यनवधिकातिशयकल्याणगुणं समस्तकारणभूतं परं ब्रह्म बहु स्यामिति संक
ल्प्य तेजोबन्नमनु स्वकृत्स्नं जगत्सृष्ट्वा तस्मिन् देवादिविचित्रसंस्थाने संस्थिते जगति चेतने जीववर्गं स्वकर्मानुगुणेषु शरीरेषु
आत्मतया प्रवेशपूर्वकं च स्वेच्छयैव जीवान्तरात्मतया प्रविश्य एवंभूतेषु स्वपर्यन्तेषु देवाद्याकारेषु संघातेषु नामरूपे व्या
करोत् एवंरूपसंघातस्यैव वस्तुत्वं प्राप्तं वाच्यत्वं चाकरोदित्यर्थः अनेन जीवेनात्मनानुजीवेन मयेति निर्दिष्टो जीवस्य ब्रह्मात्म
कत्वं दर्शयति ब्रह्मात्मकत्वं च जीवस्य जीवान्तरात्मतया ब्रह्मणोनुप्रवेशादित्यवगम्यते इदं सर्वमसृजत यदिदं किंच तत्सृ
ष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवदित्यत्र इदं सर्वमिति निर्दिष्टं चेतनाचेतनं वस्तु द्वंद्वं सत्यच्छब्दाभ्यां विज्ञानावि
ज्ञानशब्दाभ्यां विभज्य निर्दिश्य पश्चाद्वस्तुन्यपि ब्रह्मणोनुप्रवेशाभिधानात् अत एव नामरूपव्याकरणात् सर्वे वाचकाः शब्दाः प्रकृतिद्वारेण वि
शिष्टपरमात्मवाचिनः इत्यवगतमिति किं च ऐतदात्म्यमिदं सर्वमिति चेतनाचेतनप्रपंचमिदं सर्वमिति निर्दिश्य तस्यैष आत्मेति प्रतिपादितं
एवं च सर्वं चेतनाचेतनं जगत्तस्य शरीरं भवति तथा च श्रुत्यन्तराणि अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा यः पृथिव्यां तिष्ठन् पृ
थिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति स त आत्मान्तर्याम्यमृत इति प्रारभ्य यः आत्मनि तिष्ठ

प्रातिस्विकमिस्याभियुक्तैरभिधीयते अतो विज्ञानमयाज्जीवादन्य एव परमात्मानंदमयः ननु नायमानंदमयो जीवादन्यो विकारप्रायवचनस्य मयट्प्र
त्ययस्य श्रवणात् मयट् वै न कोशेषु प्रकृत्यर्थे तं दृष्टः शरादिष्व इति विकारार्थे मयट् स्मर्यते नन्वस्य आनंदप्रचुरः ननु प्राचु
र्येपि मयट् स्मृतः तस्य प्रकृतवचने मयडिति स्मृतेः यथान्नमयो यज्ञ इति स एवायं मयड्विधास्यति मैवं अन्नमय इत्युपक्रमे विकारार्थत्वं
दृष्टं अत आनंदमयस्यापि विकारार्थत्वमेव युक्तं किंच प्राचुर्यार्थत्वेपि जीवादन्यत्वं न सिध्यति तथाहि आनंदप्रचुर इत्युक्ते दुःख
मिश्रत्वमवगम्यते आनंदस्य प्राचुर्यं दुःखस्याल्पत्वमवगमयति दुःखमिश्रत्वमेव हि जीवत्वं अतश्चौचित्यप्राप्तविकारार्थत्वमेव
युक्तं किंच लोके मृण्मयं दारुमयमित्यादिषु वेदे च पर्णमयी जुहूः शमीमय्यः स्रुचो दर्भमयी रसनेत्यादिषु मयटो विकारार्थे प्रयोगबहु
त्वात् स एव प्रथममत्र ग्राह्यः प्रियमधिरोहति जीवस्य चानंदविकारत्वमस्त्येव तस्य स्वतः आनंदरूपस्य सतः संसारित्वावस्था तद्विका
र एवेति अतो विकारवाचिनो मयटः श्रवणादानंदमयो जीवादनतिरिक्त इति तदिदमनुभाष्य परिहरति विकारश
ब्दान्नेति चेन्न प्राचुर्यात् श्री नेत्युक्ते कुतः प्राचुर्यात् कस्मिन् ब्रह्मण्यानंदप्राचुर्यात् प्राचुर्यार्थे मयट् संभवात् एतदुक्तं भवति
प्राणमयादिषु क्रमेणाभ्यस्यमानस्यानंदस्य जीवाश्रयत्वासंभवात् ब्रह्मणोऽप्युपमानंद इति निश्चिते सति तत्रास्मिन् ब्रह्म
णि विकारासंभवात् प्राचुर्येपि मयट् संभवाच्चानंदमयः परं ब्रह्मेति औचित्यात् प्रयोगप्राचुर्याच्च मयटो विकारार्थत्वमर्थ
विरोधान्न संभवति किंचौचित्यं प्राणमय एव परिसमाप्तं तत्र विकारार्थत्वासंभवात् अतस्तत्रापि चतुर्थ्योः प्राणवता
तत्त्वेन प्राणमयत्वं प्राणप्राधान्यात् प्राणप्रचुरत्वाद्वा न च प्राचुर्ये मयट् प्रयोगस्य प्रौढिर्नास्ति अन्नमयो यज्ञः प्राकृतम
यीपात्रेत्यादिदर्शनात् यदुक्तमानंदप्राचुर्यमल्पदुःखसद्भावमवगमयतीति तदसत् तत्प्रचुरत्वं हि तत्प्रभूतत्वमेव तद्वेत

कुपंबनु२

इति तत्त्वमसीति सामानाधिकरण्येनोपसंहृते एवं च सति परमात्मानं प्रति जीवस्य शरीरतया हेया जीवगता धर्माः परमात्मानं न स्पृशन्ति यथा स्व
शरीरगता बालत्वयुवत्वादयो धर्मा जीवं न स्पृशन्ति अतस्तत्त्वमसीति सामानाधिकरण्ये तत्पदं जगत्कारणभूतं सत्यसंकल्पं सर्वकल्या
णगुणाकरं निरस्तसमस्तहेयगन्धं परमात्मानमाचष्टे त्वमिति च तमेव सशरीरकं जीवशरीरकमाचष्टे इति सामानाधिकरण्यं मुख्यवृत्तं
प्रकरणाविरोधः सर्वश्रुत्यविरोधश्च त्वमिति निरवद्ये कल्याणैकताने विद्यादिदोषगन्धाभावश्च अतो जीवसामानाधिकरण्यमपि विशे
षणभूताज्जीवादन्यत्वमेवोपपादयतीति विज्ञानमयाज्जीवादन्य एवानन्दमयः परमात्मा यदुक्तं तस्यैष एव शारीर आत्मेत्यानन्दमयस्य शा
रीरत्वश्रवणाज्जीवादन्यत्वं न संभवतीति तदयुक्तं तस्मिन्प्रकरणे सर्वत्र तस्यैष एव शारीर आत्मा यः पूर्वस्येति परमात्मन एव शारीर आत्मे
त्यभिधानात् यद्यपि तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्याकाशादिसृष्टियोगस्य परमकारणत्वेन प्रतिपाद्यत जीवव्यतिरेकैव ब्रह्मणः
आत्मत्वेन व्यपदेशात् तद्व्यतिरिक्तकार्यात्मनामन्नमयपर्यन्तानां तच्छरीरत्वमवगम्यते यस्य पृथिवी शरीरं यस्यापः शरीरं यस्य तेजः श
रीरं यस्य वायुः शरीरं यस्याकाशः शरीरं यस्याहंकारः शरीरं यस्य मृत्युः शरीरं एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायण इति सुबाल
श्रुत्या सर्वतत्त्वानां परमात्मशरीरत्वं स्पष्टमभिधीयते अतस्तस्माद्वा एतस्मादात्मन इत्यत्रैवान्नमयपरमात्मैव शारीर आत्मेत्यवगतं
प्राणमयं प्रस्तुत्याह तस्यैष एव शारीर आत्मा यः पूर्वस्येति पूर्वस्यान्नमयस्य यः शारीर आत्मा श्रुत्यन्तरसिद्धः परमकारणभूतः परमात्मा
स एवैतस्य प्राणमयस्यापि शारीर आत्मेत्यर्थः एवं मनोमयविज्ञानमययोर्द्रष्टव्यं आनन्दमये त्वेष एवेति निर्देशः तस्यानन्यात्मकत्व
दर्शयितुं तत्र विज्ञानमयस्यापि पूर्वोक्तन्यायेन परमात्मैव शारीर आत्मेत्यवगतः एवं सति विज्ञानमयस्य यः शारीर आत्मा
स एवानन्दमयस्यापि शारीर आत्मेत्युक्ते आनन्दमयस्यात्मान्तराभावात् परमात्मनः स्वयमेवात्मेत्यवगम्यते एवं च
स्वव्यतिरिक्तं चेतनाचेतनवस्तुजातं तस्य शरीरमिति स एव निरुपाधिकः शारीर आत्मा अत एवेदं परं ब्रह्माधिकृत्य प्रवर्तमाना

चोनिवर्त्तंते अप्राप्य मनसा सहेति वाङ्मनसयोरगोचरतया निर्विशेषमिति गम्यते अतस्तदेव मांत्रवर्णिकमिति तस्मादन्तरि
क्ष आनंदमय इति अत उत्तरं पठति ॥ नेतरोऽनुपपत्तेः ॥ परमात्मन इतरो जीवप्रभृत्यभिलप्यमानावस्थोपि न भवति मांत्रवर्णि
कः कुतः अनुपपत्तेः तथाविधस्यात्मनो निरुपाधिकविपश्चित्त्वं नोपपद्यते इदमेव हि निरुपाधिकं विपश्चित्त्वं सोऽकामयत बहु स्या
म् प्रजायेयेति सत्यसंकल्पप्रदर्शनेन व्यपदिश्यते विविधप्रपंचचित्रविपश्चित्त्वं हि एषोऽशरीरत्वात् प्रपंचस्य कार्यावयवस्य प्र
स्य लोपकत्वान्मुक्तादितो विपश्चिद्व्यष्टुकः यद्यपि मुक्तस्य विपश्चित्त्वं संभवति तथापि न स्वेवात्मनः संसारदशायामविपश्चि
त्त्वमप्यस्तीति निरुपाधिकं विपश्चित्त्वं नोपपद्यते निर्विशेषचिन्मात्रतापन्नस्य मुक्तस्य विविधदर्शनासंभवात्सुतरां विपश्चित्त्वं न सं
भवतीति न केनापि प्रमाणेन निर्विशेषं वस्तु प्रतिपाद्यत इति पूर्वमेवोक्तं यतो वाचो निवर्त्तंत इति च वाक्ये यदि च वाङ्मनस
योर्ब्रह्मणो निवृत्तिमभिदधीत तर्हि तेनानिर्विशेषतावस्तुनो यगमपि तु शङ्कुर्यात् अपि तु वाङ्मनसयोस्तत्राप्रमाणतां वेद
तथा च सति तस्य तुच्छत्वमेवापद्यते ब्रह्मविदाप्नोतीत्यारभ्य ब्रह्मणो विपश्चित्त्वं जगत्कारणत्वमानंदैकतानत्वमित
रान्नानंदयितृत्वं कामाद्देव चिरचिदात्मकस्य कृत्स्नस्य स्रष्टृत्वं सृज्यवर्गानुप्रवेशात्तदात्मकत्वं भयाभयहेतुत्वं वाय्वादिसा
दीनां प्रशास्तृत्वं शतगुणितोत्तरक्रमेण निरतिशयानंदत्वमन्यच्चानेकं प्रतिपाद्य वाङ्मनसयोर्ब्रह्मणि प्रवृत्त्यभावेन निष्प्र
माणकं ब्रह्मेत्युच्यत इति भ्रांतजल्पितं यतो वाचो निवर्त्तंत इति यच्छब्दनिर्दिष्टमर्थमानंदं ब्रह्मणो विद्वानित्यानंदशब्देन प्रति
निर्दिश्य तस्य ब्रह्मसंबंधित्वं ब्रह्मण इति व्यतिरेकनिर्देशेन प्रतिपाद्य तदेव वाङ्मनसागोचरं विद्वानिति तदिदमभिदधद्वाक्यं जर
द्रवादिवाक्यवदनर्थकं वाच्यानंतर्गतं च स्यात् ॥ अतः शतगुणितोत्तरक्रमेण ब्रह्मानंदस्यातिशयितत्वं वक्तुमुद्यम्यतस्य यत्ताभा

60

रस्य सत्तां नावगमयति अपि तु तस्याल्पत्वं निवर्तयति इतरसद्भावासद्भावौ प्रमाणान्तरावसेयौ इह च प्रमाणान्तरेण तदभावोऽवगम्यते
सुखपरतया भेत्यादिना तत्रैतावदेव वक्तव्यं ब्रह्मानन्दस्य प्रभूतत्वमस्यानन्दस्याल्पत्वमपेक्ष्य तत इति उच्यते तत्स एको मानुष आनन्द
इत्यादिना जीवानन्दापेक्षया ब्रह्मानन्दो निरतिशय इत्यापन्नः प्रभूत इति यच्चोक्तं जीवस्यानन्दविकारत्वं संभवतीति तदपि नो
पपद्यते जीवस्य ज्ञानानन्दैकगुणस्य स्वरूपस्य केनचिदाकारेण मृद्घटाद्याकारेण परिणामः सकलश्रुतिस्मृतिन्या
यविरुद्धः संसारदशायां तत्कर्मणा ज्ञानानन्दौ संकुचितौ विमुक्तौ पुनः प्रादुर्भविष्यते अतश्चानन्दमयो जीवादन्यः परं ब्रह्म इतश्च
जीवादन्य आनन्दमयः॥ तद्धेतुव्यपदेशाच्च॥ को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयाति एष
एव जीवानामानन्दयतीति जीवानामानन्दहेतुरयं व्यपदिश्यते अतश्चानन्दयितव्याज्जीवादानन्दयितायमन्य आनन्दमयः
परमात्मेति विज्ञायते आनन्दमय एवात्रानन्दशब्देनोच्यत इति चानेनतरमेवावगम्यते इतश्च जीवादन्य आनन्दमयः॥ मान्त्रवर्णिक
मेव च गीयते॥ सत्यं ज्ञानमनन्तं ब्रह्मेति मन्त्रवर्णोदितं ब्रह्मैवानन्दमय इति गीयते॥ तज्जीवस्वरूपादन्यत् परं ब्रह्म तथा हि ब्रह्म
विदाप्नोति परमिति जीवस्य प्राप्यतया ब्रह्म निर्दिष्टं तदभिमुखे नेति तद् ब्रह्माभिमुखीकृत्य प्रतिपाद्यतया परिगृह्य सत्यं गेष
श्लेषत्वमभिरुक्ता वृत्तालोकस्यार्थस्य वैशद्यमनेन मन्त्रेणाभिधीयतेऽयमर्थः जीवस्योपासकस्य प्राप्यं ब्रह्म तत्स्वाभिलक्षणमेव॥
अनन्तरं च तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यारभ्यान्तरोऽन्तर आत्मा प्रतिपाद्यते तदेव विशदीक्रियते अतो जीवादन्य आ
नन्दमयः॥ अत्राह य उपासकात्माप्यस्य मे देन भवितव्यं तथापि न वस्तुन्तरं जीवात्मा मोक्षावस्थायां ब्रह्म किं तु तस्यैवोपासकस्य
निरस्ताखिलदोषगन्धनिर्विशेषचिन्मात्रैकरसं स्वरूपं तदेव सत्यं ज्ञानमनन्तं ब्रह्मेति मन्त्रेणाभिधीयते तदेव यतो वा

विज्ञानंब्रह्मेतिव्यजानादितिप्रतिपादनात् आनंदोब्रह्मेतिव्यानंदमयस्यैवप्रतिपाद्यमितिविज्ञायते ततएवतत्राप्यानंदमयमा
त्मानमुपसंक्राम्येत्युपसंहृते अतःप्रधानपाठाभिलप्याद्दर्शितप्रभूतस्यपरस्यब्रह्मणोजीवशब्दाभिलपनीयादपिवस्तुनोऽर्था
न्तरत्वंसिद्धं यद्यपिमनुष्यत्वानांजीवानांकामानुगतत्वस्तुष्टिः अतिशयितानंदयोगाभयाभयहेतुत्वमित्यादिनसंभवति तथापि
१ दि विलक्षणपुण्यानामादित्येंद्रचंद्रप्रजापतिप्रभृतीनांसंभवत्येवेतीमामाशंकांनिराकरोति ॥ अंतस्तद्धर्मोपदेशात् ॥२१॥ इदमाम्ना
यते छांदोग्ये यएषोंतरादित्ये हिरण्मयःपुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः आप्रणखात्सर्वएवसुवर्णः तस्ययथाक
प्यासंपुंडरीकमेवमक्षिणी तस्योदितिनाम सएषसर्वेभ्यःपाप्मभ्यः उदितउदेतिहवैसर्वेभ्यःपाप्मभ्योयएवंवेदतस्यर्क्चसामचगेष्णौ
मणि७ वित्यधिदैवतं अथाध्यात्मं अथयएषोंतरक्षिणिपुरुषो दृश्यते सैवऋक्तत्साम तदुक्थंतद्यजुस्तद्ब्रह्मतस्यैतस्यतदेवरूपंयद
मुष्यरूपंयावमुष्यगेष्णौतौगेष्णौयन्नामतन्नामेति तत्रसंदिह्यते किमयमक्ष्यादित्यमंडलांतर्वर्तीपुरुषःपुण्योप
चयनिमित्तैश्वर्यःआदित्यादिशब्दाभिलप्योजीवएव आहोस्वित्तद्व्यतिरिक्तःपरमात्मेति किंयुक्तं उपचितपुण्योजीवएवेति
कुतःसशरीरत्वश्रवणात् शरीरसंबंधोहिजीवानामेवसंभवति कर्मानुगुणप्रियाप्रिययोगायहि शरीरसंबंधः अतएवहिक
र्मसंबंधरहितस्यमोक्षस्यप्राप्तत्वं अशरीरत्वेनोच्यते नहवैसशरीरस्यसतःप्रियाप्रिययोरपहतिरस्ति अशरीरंवावसंतंन
प्रियाप्रियेस्पृशतइति संभवतिचपुण्यातिशयात् ज्ञानाधिक्यंशक्त्याधिक्यंच अतएवलोककामेशत्वादितस्यैवोपपद्यते
ततएवचोपास्यत्वंचफलदायित्वंचपापक्षपणकरत्वेनमोक्षोपयोगित्वंचमनुष्येष्वप्युपचितपुण्याः केचिज्ज्ञानानंद
शक्त्यादिभिरधिकतराःदृश्यन्ते ततश्चसिद्धगंधर्वादयस्ततश्चदेवास्ततश्चेंद्रादयः अतोब्रह्मादिष्वन्यतमएवएकैकस्मिन्कल्पे

वादेवयोऽन्नमयः ततो निष्कृष्य तैत्तिरीयाचार्यो निवर्त्तितः श्रूयते एवमियत्ताराहित्यं ब्रह्मण आनंदं विद्वान् कुतश्चन न बिभेतीत्युच्य
ते किंचास्य मात्रवर्णिकेऽस्य विपश्चितः सोऽकामयत इत्यारभ्य बहुस्यामिति संकल्पात् कृत्स्नजगत्सृष्टिस्थितिजगदंतरात्मत्वादेर्मुक्त
स्य स्वरूपावस्थानं सुखस्यैव अत एवोभयाव्यपदेशात् आत्मनोऽस्य आनंदमयः ॥ भेदव्यपदेशाच्च ॥ तस्माद्वा एतस्मादात्म
न इत्यारभ्य मात्रवर्णिकं ब्रह्मत्वेन जयप्रकाशं अन्नप्राणमनोमय इव जीवाद्भिन्नस्य भेदं व्यपदिशति तस्माद्वा एतस्माद्विज्ञान
मयात् अन्योऽन्तर आत्मा आनंदमय इति ॥ अतो जीवाद्व्यपदेशाच्च यं मात्रवर्णिक आनंदमयो स एवेति विज्ञायते इतश्च जीवादन्यः
॥ कामाच्च नानुमानापेक्षा ॥ जीवस्याविद्यापरवशस्य जगत्कारणत्वे प्रवर्त्तनीयानुमानिकप्रधानादिशब्दाभिधेयाचिद
संसर्गापेक्षा तथैव हि चतुर्मुखादीनां कारणत्वं इह च सोऽकामयत बहु स्यां प्रजायेयेति अचित्संसर्गरहितस्य स्वकामादेव वि
चित्रचिदचित्सृष्टिः इदं सर्वमसृजत यदिदं किंचेत्याम्नायते अतोऽस्यानंदमयस्य जगत्सृजतो नानुमानिकाचिद
संसर्गापेक्षा प्रतीयते अतश्च जीवादन्य आनंदमयः इतश्च ॥ अस्मिन्नस्य च तद्योगं शास्ति ॥ अस्मिन्नानंदमये अस्य
च जीवस्य तद्योगं आनंदयोगं शास्ति शास्त्रं रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति रसशब्दाभिधेयानंदमयलाभाद्यं जीव
स्याभिलपनीयस्यानंदी भवतीत्युच्यमाने यल्लाभादानंदी भवति स एवेत्यनुमन्तः कोऽन्वीतीयः एवमानंदमयः परब्र
ह्मेति निश्चिन्ते सति यदेष आकाश आनंदो विज्ञानमानंदं ब्रह्मेत्यादिष्वानंदशब्देनानंदमय एव परामृश्यते यथा विज्ञानश
ब्देन विज्ञानमयः अत एवानंदं ब्रह्मणो विद्वानिति व्यतिरेकनिर्देशः अत एवैतमानंदमयमात्मानमुपसंक्रामतीति फलनिर्दे
शश्च उत्तरे चानुवाके पूर्वानुवाकोक्तान्नमयादीनामन्नं ब्रह्मेति व्यजानात प्राणो ब्रह्मेति व्यजानात मनो ब्रह्मेति व्यजानात् ॥

पतयाऽसकलेतरविलक्षणस्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणगणाश्च सन्ति तद्वदेव स्वाभिमतानुरूपैकरू
पाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौगन्ध्यसौन्दर्यसौकुमार्यलावण्ययौवनाद्यनन्तकल्याणगुणगणनिधिदि
व्यरूपमपि स्वाभाविकमस्ति तदेवोपासकानुग्रहेण तत्तत्प्रतिपत्त्यनुरूपसंस्थानं करोति अपारकारुण्यसौशील्यवात्सल्यौदार्यजल
निधिर्निरस्तनिखिलहेयगन्धोऽपहतपाप्मा परमात्मा परब्रह्म पुरुषोत्तमो नारायण इति यतो वा इमानि भूतानि जायन्ते सदेव सोम्येद
मग्र आसीदात्मा वा इदमेक एवाग्र आसीत् एको ह वै नारायण आसीत् न ब्रह्मा नेशानः इत्यादिषु निखिलजगदेककारणतयावगतस्य
परस्य ब्रह्मणः सत्यं ज्ञानमनन्तं ब्रह्म विज्ञानमानन्दं ब्रह्मेत्यादिषु एवंभूतं स्वरूपमित्यवगम्यते निर्गुणं निरञ्जनं अपहतपाप्मा विजरो वि
मृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते परास्य श
क्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतं स कारणं करणाधि
पाधिपो न चास्य कश्चिज्जनिता न चाधिपः सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन् यदास्ते वेदाहमेतं पुरुषं महान्तं आ
दित्यवर्णं तमसः परस्तात् सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधीत्यादिषु परस्य ब्रह्मणः प्राकृतहेयगुणान्निषिध्य तद्देहसंबन्धं तत्क
र्मवश्यतासंबन्धं च प्रतिषिध्य कल्याणगुणान् कल्याणरूपं च वदति तदिदं स्वाभाविकमेव रूपमुपासकानुग्रहेण तत्प्रतिपत्त्य
नुगुणाकारं देवमनुष्यादिसंस्थानं करोति स्वेच्छयैव परमकारुणिको भगवान् तदिदमाह श्रुतिः अजायमानो बहुधा विजायत
इति स्मृतिश्च अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया परित्राणाय साधूनां विना
शाय च दुष्कृताम् इति साधवो ह्युपासकास्तत्परित्राणमेवोद्देश्यं आनुषङ्गिको दुष्कृतां विनाशः संकल्पमात्रेणापि तदुपपत्तेः प्रकृ
तिं स्वामिति प्रकृतिः स्वभावः स्वमेव स्वभावमास्थाय न संसारिणां स्वभावमित्यर्थः आत्ममाययेति स्वसंकल्परूपेण ज्ञानेनेत्यर्थः॥

अतो २

त्मोऽपचितपुण्यविशेषेणैवं प्रभूतमैश्वर्यं प्राप्तः जगत्स्रष्टा भवति करोतीति जगत्कारणत्व जगदंतरात्मत्वादिवाक्यमप्य
न्येनोपचितपुण्यविशेषेण सर्वत्र सर्वं तत्त्वं वर्त्तते न जीवातिरिक्तः परमात्मा नाम कश्चिदस्ति एवं च सत्यसंकल्पत्वमप्येवं
स्वरूपस्यादयो जीवात्मन एव स्वरूपाभिप्राया भवंति मोक्षप्राप्त्याप्यर्पितत्वस्वरूपतत्प्राप्त्युपायोपदेशपरा एते सर्वे श्रुतयोऽभिधी
यते॥ अत उत्तरं प्रोच्यते॥ अंतरादित्ये अंतरक्षिणि च यः पुरुषः प्रतीयते स जीवादन्यः परमात्मैव कुतः तद्धर्मोप
देशात् जीवे असंभवं तदतिरिक्तस्यैव परमात्मनो धर्मो यमपहतपाप्मत्वादिः स एष सर्वेभ्यः पाप्मभ्य उदित इत्यादि
नोपदिश्यते अपहतपाप्मत्वं हि अपहतकर्मत्वं कर्मवश्यतागंधरहितत्वं इत्यर्थः। कर्माधीनसुखभागित्वेन कर्मवश्या हि
जीवाः अतो पहतपाप्मत्वं जीवादन्यस्य परमात्मन एव धर्मः तत्पूर्वकं स्वरूपोपाधिकं लोककामेशत्वं सत्यसंकल्पत्वादिकं सर्व
भूतान्तरात्मत्वं चास्यैव धर्मः॥ यथाह एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंक
ल्प इति॥ तथा एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायण इति सोऽकामयत बहु स्यां प्रजायेयेति सत्यसंकल्प
त्वपूर्वकसमस्तचिदचिद्वस्तुसृष्टियोगो निरुपाधिकभयाभयहेतुत्वं वा ज्ञानसमपरिमितिरूपतपरिच्छेदरहितानवधिकातिश
यानंदयोग इत्यादयोऽकर्मवश्याः स्वाभाविकाः धर्माः जीवस्य न संभवंति यत्तु शरीरसंबंधात् जीवातिरिक्तः इत्युक्तं तदयुक्तं।
नहि सशरीरत्वं कर्मवश्यतां साधयति सत्यसंकल्पस्येच्छयापि शरीरसंबंधसंभवात्॥ अथोच्येत शरीरं नाम त्रिगुणात्मकप्रकृति
परिणामरूपभूतसंघातः तत्संबंधश्चापहतपाप्मनः सत्यसंकल्पस्य पुरुषस्येच्छयापि न संभवति अपुरुषार्थत्वात् कर्मवश्यस्य
तु स्वस्वरूपानभिज्ञस्य कर्मानुगुणफलभोगायानिच्छतोपि तत्संबंधोऽवर्जनीयः अतो देहवत्त्वं यदि त्रिगुणमयप्राकृतो देहः
स्यात् स तु स्वाभिमतस्वानुरूपो [illegible] लोके [illegible] नानादेहः स्वे

आकाशो ह्येवैभ्यो भूतेभ्यो ज्यायानाकाशः परायणमिति श्रूयते अत्र संदेहः किं प्रसिद्धाकाश एवात्राकाशशब्देनाभिधीयते उतो
त्तमलक्षणमेव ब्रह्मेति किं प्राप्तं प्रसिद्ध आकाश इति कुतः शब्दैकसमधिगम्यत्वान्नियत एवात्रार्थो युक्त इति सिद्धः शब्देन प्रतीयते
त एव गृहीतव्यः अतः प्रसिद्ध आकाश एव चराचरभूतजातस्योत्पत्तिकारणं अतस्तस्मान्नातिरिक्तं ब्रह्म ननु ईक्षणार्थवक्तृ
त्वादिभिश्चेतनार्थवाक्त्वमस्तीति किं ब्रह्मेत्युच्यते [illegible] समुत्पन्नत्वं तस्य तथा हि यतो वा इमानि भूतानि जायन्ते तद्ब्रह्म
के कृत्स्न इमानि भूतानि जायन्ते इत्यादिविशेषवाक्यात् सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते इत्यादिना विशेष
प्रतीतेर्युगपदुत्पत्त्यादिकारणमाकाश एवेति निश्चीयते सदेव सोम्येदमग्र आसीदित्यादिष्वपि सदादिशब्दः साधारणाकार
त्वमेव विशेषमाकाशमभिदधाति आत्मा वा इदमेक एवाग्र आसीदित्यादिष्वपि आत्मशब्दस्तथैव वर्तते तस्यापि
चेतनैकान्तत्वं न संभवति यथाऽयमात्मा [illegible] आप्नोतीति आत्मा इति व्युत्पत्त्या सुतरामाकाशेऽप्यात्मशब्दो वर्तते ॥
अत एवमाकाश एव कारणं ब्रह्मेति निश्चीयते सति इत्येवं प्राप्ते यस्तु द्युगुण गौणत्वं वर्णनीयः यदि हि साधारणशब्दैरेव सदा
दिभिः कारणमभ्यधायिष्यत तदा ईक्षणादयश्चेतनविशेषा एवं कारणामिति नाऽनिरदेक्ष्यत आकाशशब्देन तु विशेष
वाचिना अस्ति इति नार्थवाचामिति निर्णेयमस्ति ननु नैतन् आकाशः संभूतः इत्याकाशस्यापि कार्यत्वं प्रतीयते सत्यं सर्वेषामे
वाकाशवाय्वादीनां सूक्ष्मावस्थायाः स्थूलावस्थायां चेत्थं वस्थायं [illegible] न त्वाकाशस्य सूक्ष्मावस्था कारणे स्थूलावस्था तु कार्यं अ
त्मनः आकाशः संभूत इति तस्मादेव सूक्ष्मरूपात्तद्यथा स्थूलरूपः संभूत इत्यर्थः सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्प
द्यन्त इति सर्वस्य जगत आकाशादेव प्रभवाप्ययादिश्रवणात् तदेव जगत्कारणं ब्रह्मेति निश्चितं एतएव प्रसिद्धाकाशाद्व्यतिरि
क्तं ब्रह्म अत एव यदेष आकाश आनन्दो न स्यात् आकाशो ह वै नाम नामरूपयोर्निर्वहिता ते सैव माह निर्देशोऽप्युपपन्नः अतः प्रसिद्धा
काशाद्व्यतिरिक्तं ब्रह्म एव वाच्यं भूमः आकाशस्तल्लिङ्गात् आकाशशब्दाभिधेयं प्रसिद्धाकाशाद्व्यतिरिक्तं ब्रह्म

मायायपुनैस्तानमितिस्तानप्पर्यायमपिमायाशब्दं नैघण्टुका अधीयते आह च भगवान्पराशरः॥ समस्ताः शक्तयश्चैताः नृपयत्र
प्रतिष्ठिताः तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् समस्तशक्तिरूपाणि तत्करोति जनेश्वर। देवतिर्यङ्मनुष्याख्य चेष्टावन्ति
लीलया जगतामुपकाराय न सा कर्मनिमित्तजेति अस्यावतारस्य प्राकृतत्वमुच्यते महाभारतेपि न भूतसं
घसंस्थानो देहोस्य परमात्मन इति अतः परस्यैव ब्रह्मणः एवं रूपत्वादयमपि तस्यैव धर्मः अत आदित्यमण्डलाद्यप॥ वध
धिकरणादित्यजीवव्यतिरिक्तः परमात्मैव॥ भेदव्यपदेशाच्चान्यः श्री आदित्यादिजीवेभ्यो भेदो व्यपदिश्यते अस्य
परमात्मनः य आदित्ये तिष्ठन् आदित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयति य आत्मनि
तिष्ठन्नात्मनोन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति यस्याक्षरं शरीरं यमक्षरं न वेद यो मृ
त्युमन्तरे सञ्चरन् यस्य मृत्युः शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायण इति चापहतपाप्म
नः परमात्मनः सर्वान् जीवान् शरीरत्वेन व्यपदिश्य तेषामन्तरात्मत्वेनैव व्यपदिशतीति अतः सर्वेभ्य एवादित्यादिजीवेभ्यो
न्य एव परमात्मेति सिद्धं यतो वा इमानि भूतानि जायन्त इति जगत्कारणं ब्रह्मेत्यवगम्यते किं तज्जगत्कारणमित्यपेक्षा
यां सदेव सोम्येदमग्र आसीत् तदैक्षत आत्मा वा इदमेक एवाग्र आसीत् स ईक्षत लोकान्नु सृजा इति तस्माद्वा एतस्मादात्मन आका
शः सम्भूत इति साधारणैः शब्दैर्जगत्कारणतो निर्दिष्टे ईक्षणविशेषणान्नेव लिङ्गप्रमाणस्य विशेषार्थ स्वभावात्प्रधानस्येत्यादित्य
रिक्तं ब्रह्मैतत्सूक्ष्मं यतो नामाकाशादिविशिष्टजगत्कारणत्वं ज्ञायते तस्यादि शब्दाकाशादिशब्दाभिधेयत्वप्राप्तिरित्याशङ्क्य
दुक्तेनाः प्रथमसूत्रमुक्तलक्षणमेव ब्रह्मेति प्रतिपाद्यते आकाशस्तल्लिङ्गादित्याद्यधिकरणैः प्रोच्यते श्री आकाशस्तल्लिङ्गात् श्री॥
इदमाम्नायते छान्दोग्ये अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति

प्राणयति सर्वाणि भूतानीति कृत्वा त्रुटिः ८

जायेये स्यादितन्न द्वाक्यशेषात् एवस्थिरीकुर्वंति एवं वाक्यशेषावधारितानन्यसाधारणानेकापूर्वार्थविशिष्टं निखिलजगदेककारणं सदे
सोम्येदमग्र आसीदित्यादिवाक्यसिद्धं ब्रह्मैवाकाशशब्देन प्रसिद्धवत्सर्वाणि ह वा इमानि भूतानीत्यादिवाक्ये न निर्दिश्यत इति सिद्धं श्री
अत एव प्राणः श्री इदमाम्नायते छांदोग्ये ॥ प्रस्तोतर्या देवता प्रस्तावमन्वायत्तेति प्रक्रम्य कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह
वा इमानि भूतानि प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रास्तोष्यो मूर्धा ते व्यपतिष्यदि
ति अत्र प्राणशब्दोप्याकाशशब्दवत् प्रसिद्धप्राणव्यतिरिक्ते परस्मिन्नेव ब्रह्मणि वर्तते तदसाधारणनिखिलजगत्प्रवेशनिःक्र
मणादिलिंगात् प्रसिद्धवन्निर्देशात् आधिकरणिकानुकूल्यं भूतजातस्य प्राणाधीनस्थितिप्रवृत्त्यादिदर्शनात् प्रसिद्ध एव प्राणो जगत्
कारणतया निर्दिश्यत इति परिहारस्तु शिलाकाष्ठादिषु चेतनस्वरूपे च तदभावात् सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंवि
शंति प्राणमभ्युज्जिहत इति नोपपद्यते इति अतः परं ब्रह्मैव प्राणशब्देनाभिधीयते अतः प्रसिद्धाकाशप्राणादेरन्यदेव निखिलज
गदेककारणमपहतपाप्मत्वसार्वज्ञसत्यसंकल्पत्वाद्यनंतकल्याणगुणगणं परं ब्रह्मैवाकाशप्राणादिशब्दाभिधेयमिति सिद्धं
अतः परं जगत्कारणत्वव्याप्तेनैकेनापि निरतिशयोत्कृष्टगुणेन जुष्टं ज्योतिरिन्द्रादिशब्दैरप्यभिधीयमानं परं ब्रह्मै
वेति प्रतिपाद्यते श्री ज्योतिश्चरणाभिधानात् श्री इत्यादिनेदमाम्नायते छांदोग्ये ॥ अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्व
तः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति तत्र संदेहः किमयं ज्योतिःशब्दनिर्दिष्टो निरतिशयदी
प्तियुक्तोऽर्थः प्रसिद्धमादित्यादिज्योतिरेव कारणभूतं ब्रह्म उत समस्तचिदचिद्वस्तुजातविजातीयः परमकारणभूतोऽमितभास्वर
ः सत्यसंकल्पः पुरुषोत्तम इति किं युक्तं प्रसिद्धमेव ज्योतिरिति कुतः प्रसिद्धवन्निर्देशोऽप्याकाशप्राणादिवत्तद्वाक्योपात्तपरमात्म
त्वव्याप्तलिंगविशेषादर्शनात् परमपुरुषमसाधारणाभावात्कौक्षेयज्योतिरैक्योपदेशाच्च प्रसिद्धमेव ज्योतिः कारणत्वव्याप्तनिर
तिशयदीप्तियोगाज्जगत्कारणं ब्रह्मेत्येवं प्राप्तेऽभिदध्महे श्री ज्योतिश्चरणाभिधानात् श्री द्युसंबंधितया निर्दिष्टं निरतिशयदीप्तियु

64

सं

थोऽकलसणः परमात्मैव कुतः तल्लिंगात् निखिलजगदेककारणत्वं सर्वस्मादुपास्यत्वं परायणत्वमित्यादीनि परमात्मलिंगान्युपलभ्यंते
निखिलकारणत्वस्य चिदचित्तुनः प्रसिद्धाकाशशब्दाभिधेयस्यनोपपद्यते चेतनवस्तुनस्तत्कार्यत्वासंभवात् परायणत्वं च
चेतनानां परमप्राप्यत्वं तच्चाचेतनस्य हेयस्य सकलपुरुषार्थविरोधिनो न संभवति सर्वस्मादुपायस्त्वं च निरुपाधि
कं सर्वैः कल्याणगुणैस्सर्वेभ्यो निरतिशयोत्कर्षः तदप्यचितो नोपपद्यते यद्युक्तं जगत्कारणविशेषाकांक्षायामाकाश
शब्देन विशेषसमर्पणात् अस्य सर्वं तदनुरूपमेव वर्णनीयमिति तदयुक्तं सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्प
द्यंत इति प्रसिद्धवन्निर्देशोऽपि प्रमाणांतरप्राप्तिमपेक्षते प्रमाणांतराणि च सदेव सोम्येदमग्र आसीदित्येववाक्यगतानि
चैकत्वादिना प्रकारेण ब्रह्म प्रतिपादयंतीति तत्प्रतिपादितब्रह्माकाशशब्देन प्रसिद्धवन्निर्दिश्यते संभवति च परस्य ब्रह्म
णः प्रकाशकत्वादाकाशशब्दाभिधेयत्वं आकाशते आकाशयति चेति किंचानेनाकाशशब्देन विशेषसमर्पणं तेनेनापि वे
तनेशाप्रसंभावितकारणाभावमचेतनविशेषमभिदधानेन तदैक्षत बहु स्यां प्रजायेयेति सोऽकामयत बहु स्यां प्रजायेयेति इत्या
दिवाक्यशेषावधारित सार्वज्ञसत्यसंकल्पादिविशिष्टापूर्वार्थप्रतिपादनसमर्थवाक्यार्थोन्यथाकरणं न प्रमाणपदवीमधिरोहति
एवमपूर्वानेकविशेषणविशिष्टापूर्वार्थप्रतिपादनसमर्थानेकवाक्यगतिसामान्यं चैकेनानुवादरूपेणान्यथाकर्तुं न शक्यते यत्ता
त्पर्यादर्थं तनेकोऽतो न संभवति प्रदानवदेकोऽयं इत्यादिसूत्रदर्शनादित्युक्तं नेष्टो च यद्यपि चेतनादन्यत्रापि क्वचिदात्मशब्दः प्रयु
ज्यते तथापि शरीरप्रतिसंबंधिन्यात्मशब्दस्य प्रयोगप्राचुर्यात् आत्मा वा इदमेक एवाग्र आसीदात्मनः आकाशस्संभूत इत्यादिश्रुतिशरीर
प्रतिसंबंधी चेतन एव प्रतीयते तथा गोशब्दस्यानेकार्थाभिधानेऽपि प्रयोगप्राचुर्यात् सास्नादिमानेव स्वतः प्रतीयते अप्यन्तरक्षतीति
स तत्रदसाधारणनिर्देशापेक्षा तथात्मशब्दः [illegible] लोकान्नु सृजा इति सोऽकामयत बहु स्याम्

वन्हिर्दे ६

श्री
भा
६६

रतः पूर्व नश्यति तस्मात्परमपुरुष एव निरतिशयतेजस्को दिवः परो ज्योतिर्दीप्यत इति प्रतिपाद्यते एतावानस्य महिमातो
ज्यायांश्च पुरुषः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति प्रतिपादितस्य चतुष्पदः परमपुरुषस्य वेदाहमेतं पुरु-
षं महान्तं आदित्यवर्णं तमसस्तु पारे इत्यत्राभिहिताप्राकृतरूपस्य तेजोऽप्यप्राकृतमिति तच्छब्दवाच्य एव ज्योतिःशब्दाभि-
धेय इति निरवद्यं निरतिशयदीप्तियुक्तं ज्योतिःशब्दाभिधेयं प्रसिद्धवन्निर्दिष्टं परमपुरुष एवेत्युक्तं इदानीं कारणत्वमा-
श्रमत्वमात्मन्युपायतया उपास्यत्वेन श्रुतः इन्द्रप्राणशब्दाभिधेयोऽपि परमपुरुष एवेत्याह श्री प्राणस्तथानुगमात् श्रीकौषीतकि-
ब्राह्मणे प्रतर्दनविद्यायां प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च इत्यारभ्य वरं वृणीष्वेति वक्तारं
इन्द्रं प्रति त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे इति प्रतर्दनोक्तः स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमि-
त्युपास्स्वेति श्रूयते तत्र संशयः किमयं हिततमोपासनकर्मतया इन्द्रप्राणशब्दनिर्दिष्टो जीव एव उत तदतिरिक्तः परमात्मेति
किं युक्तं जीव एवेति कुतः इन्द्रशब्दस्य जीवे एव प्रसिद्धेः तत्समानाधिकरणस्य प्राणशब्दस्यापि तत्रैव वृत्तेः अयमिन्द्राभिधानो हि
जीवः प्रतर्दनेन त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे इत्युक्तः मामुपास्स्वेति स्वात्मोपासनं हिततमत्वेनोपदिष्टवान् हि
ततमश्चायं तत्त्वप्राप्त्युपाय एव जगत्कारणोपासनस्यैवाम् तत्त्वप्राप्त्युपायता तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य
इत्यवगतं अतः प्रसिद्धजीवभावइन्द्रत्वकारणत्वं ब्रह्मलिङ्गतया भान्यामभिधीयते प्राणस्तथानुगमादिति अयमिन्द्रप्राणशब्दनि-
र्दिष्टो न जीवमात्रं अपितु जीवादर्थान्तरभूतं परं ब्रह्म कुतः स एष प्राण एव प्रज्ञात्मानन्दोऽजरोऽमृत इति इन्द्रप्राणशब्दाभ्यां प्रस्तुतस्यानन्दा-
जरामृतत्वशब्दसामानाधिकरण्येनानुगमो हि तथात्वमेवोपपद्यते श्री न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् श्री
यदुक्तं इन्द्रप्राणशब्दनिर्दिष्टस्यानन्दोऽजरोऽमृत इत्यनेनैकार्थ्याद् ब्रह्मत्वं ब्रह्मेति तन्नोपपद्यते मामेव विजानीहि प्राणोऽस्मि प्रज्ञात्माते

विशेष५

हिततममुप
दिदेश

हेतुत्वेन५ तया५

तं ज्योतिः परमपुरुष एव कुतः पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीत्यस्यैव द्युसंबंधिनः चरणत्वेन सर्वभूतानामभिधानात्
एतदुक्तं भवति यद्यपि अथ यदतः परो दिवो ज्योतिर्दीप्यत इत्यस्मिन्वाक्ये परमपुरुषासाधारणलिंगं नोपलभ्यते तथापि पूर्ववा
क्ये द्युसंबंधितया परमपुरुषनिर्देशादिहापि द्युसंबंधिज्योतिः स एवेति प्रत्यभिज्ञायत इति कौक्षेयज्योतिषैक्योपदेशस्य फ
लाय तदात्मकत्वानुसंधानविधिरिति न कश्चिद्दोषः कौक्षेयज्योतिषश्च तदात्मकत्वं भगवता स्वयमेवोक्तम् अहं वैश्वानरो
भूत्वा प्राणिनां देहमाश्रित इति अथ छंदोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगमात्तथा हि दर्शनम् पूर्वस्मिन्वाक्ये गायत्री
वा इदं सर्वमिति गायत्र्याख्यं छंदोऽभिधायानंतरं तदेतदृचाभ्युक्तमिति तु प्रकृतायास्तावानस्य महिमा इत्यस्या ऋचोऽपि छंदोविषयत्वान्ना
त्र परमपुरुषाभिधानमिति चेन्न तथा चेतोऽर्पणनिगमात् न गायत्रीशब्देन छंदोमात्रमिहाभिधीयते छंदोमात्रस्य सर्वात्मकत्वानु
पपत्तेः अपि तु ब्रह्मण एव गायत्री चेतोऽर्पणमिह निगम्यते ब्रह्मणि गायत्रीसादृश्यानुसंधानं कृत्वा योपदिश्यत इत्यर्थः संभवति
च पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति चतुष्पदो ब्रह्मणश्चतुष्पदया गायत्र्या सादृश्यं चतुष्पदा च गायत्री क्वचित् हृदय
ते तद्यथा इंद्रः शचीपतिर्बलेन पीडितः दुश्च्यवनो वृषा समत्सु सासहिरिति तथाह्यन्यत्रापि सादृश्यात् छंदोऽभिधायी शब्दोऽर्थांतरे
प्रयुज्यमानो दृश्यते यथा संवर्गविद्यायां ते वा एते पंचान्ये पंचान्ये दश संपद्यंत इत्यारभ्य सैषा विराडन्नादिरुच्यते इतश्च
गायत्रीशब्देन ब्रह्मैवाभिधीयते अथ भूतादिपादव्यपदेशोपपत्तेश्चैवं अथ भूतपृथिवीशरीरहृदयानि निर्दिश्य सैषा चतुष्प
देति व्यपदेशोऽत्र ब्रह्मण्येव गायत्रीशब्दाभिधेयमुपपद्यते अथ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् अथ पूर्ववाक्ये त्रिपा
दस्यामृतं दिवीति दिवोऽधिकरणत्वेन निर्देशात् इह त्वथ यदतः परो दिव इत्यवधित्वेन निर्देशादुपदेशस्याभिन्नरूपत्वेन पूर्ववाक्यैक्यमपर
स्मिन्न प्रत्यभिज्ञायत इति चेन्न उभयस्मिन्नप्युपदेशे ऽर्थैक्ये न प्रत्यभिज्ञाया अविरोधात् यथा वृक्षाग्रे श्येनो वृक्षाग्रात्

इत्यत्राह । शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ श्रीप्रज्ञानजीवभावेनेन्द्रेण मामेव विजानीहि मामेवोपास्स्वेति उपास्यत्वेन
णः स्वात्मत्वेनोक्तं हे सौम्येन प्रमाणान्तरप्राप्तस्वात्मत्वलोकेन कृतः अपि तु शास्त्रेण स्वात्मदृष्ट्या कृतः एतदुक्तं भवति अ
नेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति ऐतदात्म्यमिदं सर्वं अन्तःप्रविष्टः शास्ता जनानां सर्वात्मा यः आत्म
नि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः य आत्मनि
संचरन् यस्यात्मा शरीरं यमात्मा न वेद एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायण इत्येवमादिशास्त्रे
णा जीवात्मशरीरकं परमात्मानमवगम्य जीवात्मवाचिना अहंत्वमादिशब्देन परमात्मन्येव पर्यवसानेनात्मा मामेव
विजानीहि मामुपास्स्वेति स्वात्मशरीरं परमात्मानमेवोपास्यत्वेनोपदिशतीति वामदेववत् यथा वामदेवः परस्य ब्रह्म
णः सर्वान्तरात्मत्वं सर्वस्य च शरीरत्वं शरीरवाचिनां शब्दानां सशरीरिणि पर्यवसानं च पश्यन् इति स्वात्मशरी
रकं परं ब्रह्म निर्दिश्य तत्सामानाधिकरण्येन मनुसूर्यादीन् व्यपदिशति तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं म
नुरभवं सूर्यश्च अहं कक्षीवानृषिरस्मि विप्र इत्यादि यथा वामदेवः इति प्रसिद्धः प्रह्लादः सोऽब्रवीत् अहमेकः प्रथममासं वर्तामि
च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इत्यादिवत् यथा च प्रह्लादः सर्वगत्वादनन्तस्य स एवाहमवस्थितः मत्तः सर्व
महं सर्वं मयि सर्वं सनातने इत्यादिवत् अस्मिन्प्रकरणे जीववाचिभिः शब्दैः रविहितोपासनाभिधायिभिः अप्रोपास्यभूतस्य ब्रह्मणो
अभिधाने कारणोऽयं पूर्वपक्षः माह ॥ जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ न वा
चं विजिज्ञासीत वक्तारं विद्यात् त्रिपुण्यनिर्णिन्त्वा मह नमुन्नु त्वानुपतीन् कालाव के प्रः प्राण इत्याह जीवलिङ्गात् यावद्ध्यस्मिन्
शरीरे प्राणो वसति तावदायुः अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति मुख्यप्राणलिङ्गात् नाथास्मसंवे

मामायुरमृतमित्युपास्वेति वक्तासीन्द्रस्य प्रतर्दनं प्रत्याप्रभृ महनमित्येवमादिना त्वाष्ट्रवधादिभिः प्रज्ञातजीवभावस्यात्मन
एवोपास्यतोपनदर्शनायोपदिशतीति अत उपक्रमे जीवविशेषेषु स्वगते समाने देजेरोमृत इत्यादिभिरुपसंहारस्तदनुगुण ए
व वर्णनीय इति चेत् परिहरति अध्यात्मसंबंधभूमात्र्यस्मिन् आत्मनियः संबंधः सोध्यात्मसंबंधः तस्य भूमा भूयस्त्व
मित्यर्थः आत्मन्याधेयतया संबध्यमानानां बहुत्वेन संबंधबहुत्वं तच्चास्मिन्वक्तरि परमात्मन्येव हि संभवति ते
षु पारस्य स्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणे अर्पिताः स ए
ष प्राण एव प्रज्ञात्मानंदोजरोमृत इति भूतमात्रा प्रज्ञामात्रा जातमभिधाय प्रज्ञामात्राशब्देन तदाधारतया चेतनत्वे
नाभिधाय तस्याप्याधारतया प्रकृतमिन्द्रप्राणशब्दाभिधेयं निर्दिश्य तमेवानंदोजरोमृत इत्युपदिशतीति तदेतच्चेतनाचे
तनात्मककृत्स्नवस्त्वाधारत्वं जीवादर्थान्तरभूते तस्मिन्परमात्मन्येवोपपद्यत इत्यर्थः अथवा अध्यात्मसंबंधभूमात्वस्मि
न्परमात्मसाधारणो धर्मस्संबंधो अध्यात्मसंबंधः तस्य भूमा बहुत्वमस्मिन्प्रकरणे विद्यते तथाहि अथ मेत्तमेव वरं वृणीष्व यं त्वं मनु
ष्याय हिततमं मन्यस इति मामुपास्वेति च परमात्मसाधारणो मोक्षसाधनोपासनकर्मत्वं प्राणप्राज्ञनिर्दिष्टस्येन्द्रस्य प्रतीयते"
तथा एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष एवासाधु कर्म कारयति तं यमधो निनीषतीति सर्वस्य
कर्मणः कारयितृत्वं च परमात्मधर्मः तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैताः भूतमात्राः
प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेर्पिता इति सर्वाधारत्वं चेतनस्यैव धर्मः तथा स एष प्राण एव प्रज्ञात्मानंदोजरोमृत इ
त्येतेपि परमात्मन एव धर्माः एष लोकाधिपतिरेष सर्वेश्वर इति च परमात्मन्येव संभवति तदेवमध्यात्मसंबंधभूम्नोप
विद्यमानत्वात्परमात्मैवात्रेन्द्रप्राणशब्दनिर्दिष्टः ... परमात्मन उपास्यत्वोपदेशात् संगच्छत

जीवेषु

शरीरा... तनवग...

प्राणा शरीरे परमात्मनि उ

निर्दिष्टो भवति १ उपपादितवन्तः २

67

परमपुरुषार्थभूतेऽपरस्मिन्ब्रह्मणि वेदान्तवाक्यानां समन्वय इत्युक्तम् । इदानीं निखिलजगदेककारणतया वेदान्तवेद्यं ब्रह्म
चेतनात्प्रत्ययाद्वानुमानिकप्रधानादर्थान्तरभूतचेतनविशेषमेवेत्युपपादयामः । स्वाभाविकानवधिकातिशयानन्दविपश्चि
त्त्वनिखिलचेतनभयाभयहेतुत्वसत्यसंकल्पत्वसमस्तचेतनान्तरात्मत्वादिभिर्बद्धमुक्तोभयावस्थाज्जीवप्राकाभिलपनीयाच्चापी
न्तरभूतमिति च समाश्रिष्महि । स च प्राकृतकर्मनिमित्तस्थूलसाधारणदेहरूपः परं तु देहिनामप्राकृतप्राणापानचेतनविशेषाभि
धायिभिर्जगत्कारणतया प्रसिद्धैरपि शब्दैर्वक्ष्यमाणः सकलेतरचेतनाचेतनविलक्षणः सर्वेति समर्थ्यते हि परतत्त्वसाधार
णलिङ्गतया प्रसिद्धैरपि पुच्छज्योतिः शब्दाभिधेयस्य सर्वविधतया प्रत्यभिज्ञानात्सर्वेश्वरतयैव परमकारणासाधारणामृत
त्वप्राप्तिहेतुभूतः पुरुषः परमपुरुष एव प्रतिपाद्यत इत्युक्तम् । इदानीमपि रभिधीयत इत्यव्यूह्महि । तदेवमतिपतितसकलेतरप्रमाणसंभा
वनाभूमिः सार्वज्ञसत्यसंकल्पत्वाद्यपरिमितोदारगुणसागरतयाखिलेतरसमस्तवस्तुविलक्षणः परं ब्रह्म पुरुषोत्तमो नारायण
एव वेदान्तवेद्य इति स्थितम् । अतः परं द्वितीयतृतीयचतुर्थेषु पादेषु प्रधानपि वेदान्तवेद्यं ब्रह्मैव तत्प्रापिकानि चिन्त्यवेदान्तवाक्या
नि प्रधानक्षेत्रज्ञान्तरभूतवस्तुविशेषस्वरूपप्रतिपादनपराण्येवेत्यपास्यन्त इति सनत्कुमारेण तत्र द्वाकौ दितकल्याणगुणाक
रत्वं ब्रह्मणः प्रतिपाद्यते । तत्रास्पष्टजीवलिङ्गकानि वाक्यानि द्वितीये विचार्यन्ते स्पष्टलिङ्गकानि तृतीये प्रतिपादनच्छायानु
सारीणि चतुर्थे ॥ श्री सर्वत्र प्रसिद्धोपदेशात् ॥ श्री ॥ इदमाम्नायते छान्दोग्ये अथ खलु क्रतुमयोऽयं पुरुषो यथाक्रतुरस्मिंल्लोके पु
रुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूपः इत्यादि । अत्र स क्रतुं कुर्वीतेति प्रतिपादितस्योपास
नस्योपास्यो मनोमयः प्राणशरीर इति निर्दिष्ट इति प्रतीयते । अत्र संशयः किं मनोमयत्वादिगुणकः प्रत्यगात्मा उत परमात्मेति
किं युक्तं प्रत्यगात्मेति कुतः मनःप्राणयोः प्रत्यगात्मोपकरणत्वात् परमात्मनस्तु अप्राणो ह्यमना इति तत्प्रतिषेधाच्च न च सर्वं

भ्रमेति चेन्न उपासात्रैविध्यप्रदर्शनहेतोः उपासनात्रैविध्यमुपदेष्टुं तत्तच्छब्देनाभिधानं निखिलकारणभूतब्रह्मणः स्वरूपे
णानुसंधानं भोक्तृवर्गशरीरकत्वानुसंधानं भोग्यभोगोपकरणशरीरकत्वेनानुसंधानं चेति त्रिविधमनुसंधानमुप
देष्टुमित्यर्थः तदिदं त्रिविधं ब्रह्मानुसंधानं प्रकरणत्रयेणाभिहितं सत्यं ज्ञानमनन्तं ब्रह्म आनन्दो ब्रह्मेत्यादिषु स्वरूपानुसंधानं
तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च
सत्यं चानृतं च सत्यमभवदित्यादिषु भोक्तृशरीरतया भोग्यभोगोपकरणशरीरतया चानुसंधानं इहापि प्रकरणे त्रिविधम
नुसंधानमुपन्यस्तमित्यर्थः एतदुक्तं भवति यत्र हिरण्यगर्भादिजीवविशेषाणां प्रकृत्यादिचेतनविशेषाणां च परमात्मासा
धारणो धर्मयोगः तदभिधायिनां शब्दानां परमात्मवाचित्वात् सामानाधिकरण्यं वा दृश्यते तत्र परमात्मनस्तत्तच्छरीरि
विशेषणतयात्वानुसंधानं प्रतिपिपादयिषितमिति अतो ऽत्रेन्द्रप्राणशब्दनिर्दिष्टो जीवादर्थान्तरभूतः परमात्मेति सिद्धं इति
श्रीभगवद्रामानुजाचार्योभयवेदान्ताचार्यविरचिते शारीरकमीमांसाभाष्ये प्रथमस्याध्यायस्य प्रथमः पादः ॥ प्रथमे
पादे ऽधीतवेदः पुरुषः कर्ममीमांसाश्रवणाधिगतकर्मयाथात्म्यविज्ञानः केवलकर्मणामल्पास्थिरफलत्वमवगम्य वेदान्तवा
क्येषु च आपातप्रतीतानन्तस्थिरफलब्रह्मस्वरूपतदुपासनसमुपजातपरमपुरुषार्थलक्षणमोक्षापेक्षो वेधाश्रित परिनिष्पन्न
वस्तुबोधनशक्तिमद्वेदान्तवाक्यानामपरस्मिन् ब्रह्मणि निश्चितप्रमाणभावस्तीति कर्मप्रधानारूपशारीरकमीमांसाश्रवण
मारभते तस्य केषां त्वारंभः सिद्धये अनन्तविविधविचित्रस्थिरत्रसरूपभोक्तृभोग्यभोगोपकरणभोगस्थानलक्षणनिखिलजगदुद
यविभवलयमहानन्दैककारणं परं ब्रह्म यतो वा इमानि भूतानीत्यादिवाक्यं बोधयतीति च यत्सर्वादिजगदेककारणं परं ब्रह्मस्व
लेतरसमस्तवस्तुविलक्षणतया शास्त्रैकप्रमाणकमिति प्रथमः पादः प्रतिपादितम् नन्विति निरवद्यत्वे यदि रहे ऽपि स्वरूपेणैव

श्री॰ भा॰ ६४

विद्यादिदोषगंधस्य समस्तहेयाकारस्य सर्वभावो नोपपद्यते प्रत्यगात्मन्यपि कचित्कचिद् ब्रह्मशब्दः प्रयुज्यते अत एव परमात्मा परं
ब्रह्मेति परमेश्वरस्य कचित्तद्विशेषणतो निर्दिश्यते प्रत्यगात्मनस्तु निर्मुक्तोपाधेर्बृहत्त्वं चाविद्यते स चानंत्याय कल्प्यते इति
श्रुतेः अविदुषस्तस्यैव कर्मनिमित्तत्वात् सगात्रमस्थितिलयानां तज्जलानिति हेतुनिर्देशोऽनुपपद्यते तेनेह [illegible] प्रपं
जीवात्मा स्वतः परिच्छिन्नरूपत्वेन ब्रह्म संभृतः सन्ननाद्यविद्यायादेवतिर्यङ्मनुष्यस्थावरात्मना वतिष्ठते इति अत्राभि
धीयते सर्वत्र प्रसिद्धोपदेशात् सर्वं खल्विदं ब्रह्मेति निर्दिष्टे सर्वस्मिन् जगति ब्रह्मप्रादेन तदात्मतयाभिधीयमानं परं ब्रह्मैव
न प्रत्यगात्मा कुतः प्रसिद्धोपदेशात् तज्जलानिति हेतुना सर्वं खल्विदं ब्रह्मेति प्रसिद्धवन्निर्देशात् ब्रह्मणो जातत्वात् तद्ब्र
ह्मणि लीनत्वात् ब्रह्माधीनजीवनत्वाच्च हेतोर्ब्रह्मात्मकं सर्वं खल्विदं जगदित्युक्ते यस्माज्जन्मस्थितिलयावेदांते प्र
सिद्धस्तदेवात्र ब्रह्मेति प्रतीयते तच्च परमेव ब्रह्मत्वान्यत् यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्य
भिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति प्रकृत्य आनंदो ब्रह्मेति व्यजानात् आनंदाद्ध्येव खल्विमानि भूतानि जायंते
इत्यादिना पूर्ववाक्ये प्रतिपादितान बाधिकानि प्रायानंदयोगिनो विपश्चितः परस्माद् ब्रह्मण एव जगदुत्पत्तिस्थिति
लया निर्दिश्यंते तस्यास कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः इति करणाधिपस्य जीवस्याधिपः परं
ब्रह्मैव कारणत्वमपदिश्यते एवं हि सर्वत्र परस्यैव ब्रह्मणः कारणत्वं प्रसिद्धम् अतः परब्रह्मणो जातत्वात्तस्मिन् लीनत्वात्तेन प्रा
णनात्तदात्मकतया तादात्म्यमुपपन्नम् अतस्सर्वप्रकारं सर्वशरीरं सर्वात्मभूतं परं ब्रह्म शांतो भूत्वा उपासीतेति श्रुतिरेव
परस्य ब्रह्मणः सर्वात्मकत्वमुपपाद्य तस्योपासनमुपदिशतीति परं ब्रह्मैव इहकारणोपास्यं [illegible] स्थूलचि

पूर्वानुवाके

68

खल्विदं ब्रह्म पूर्वं निर्दिष्टं ब्रह्मात्रोपास्यतया संबध्यते शांत उपासीतेत्युपासनोपकरणं शांतिर्निर्दिष्टस्युपायभूतं ब्रह्मात्मकत्वो
पदेशायोपात्तत्वात् नन्वक्रतुं कुर्वीतेत्युपास्यमनस्योपास्याकांक्षत्वाद् आकांतरस्य मपि ब्रह्मणे संबध्यत इति प्राकं वक्तुं स्ववाक्योपात्ते
न मनोमयत्वादिगुणकेन निराकांक्षत्वान्मनोमयः प्राणशरीर इत्यनन्यार्थतया निर्दिष्टस्य विभक्तिपरिणाममात्रेणोभया
कांक्षानिवृत्तिसिद्धेः एवं निर्दिष्टे जीवत्वे एतद्ब्रह्मेत्युपसंहारस्य ब्रह्मपदमपि जीव एव पूजार्थं प्रयुक्तमित्यध्यवसीयत इत्येवं प्रा
प्ते ब्रूमः श्री सर्वत्रप्रसिद्धोपदेशात् श्री मनोमयत्वादिगुणकः परमात्मैव कुतः सर्वत्र वेदान्तवाक्येषु परस्मिन्ब्रह्मणि प्रसि
द्धस्य मनोमयत्वादेरुपदेशात् प्रसिद्धं हि मनोमयत्वादि ब्रह्मणः यथा मनोमयः प्राणशरीरो नेता सत्य एषोऽन्तर्हृदय आकाश
स्तस्मिन्नयं पुरुषो मनोमयः अमृतो हिरण्मयः हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवंति नचक्षुषा गृह्यते
नापि वाचा मनसा तु विशुद्धेन तथा प्राणस्य प्राणः अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति सर्वाणि ह वा इ
मानि भूतानि प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहत इत्यादिषु मनोमयत्वं विशुद्धेन मनसा ग्राह्यत्वं प्राणशरीरत्वं सर्वस्या
प्याधारत्वं नियंतृत्वं च एवं तस्यैव गृह्यमाणत्वं हृदयगतत्वं ब्रह्मलिंगत्वेन विमृश्यत एवं भवति अप्राणो ह्यमना इति मनःप्राणयोर्न
प्राणयत्तास्थितिं च ब्रह्मणो निषेधति श्रुत्यंतरं सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेत्युपासनेविधीयते सर्वात्मकं ब्रह्म प्र
तः सन्नुपासीतेति स क्रतुं कुर्वीतेति तस्य च गुणोपादानार्थानुवादः उपादेयाश्च गुणा मनोमयत्वादयः अतः सर्वात्मकं ब्रह्म म
नोमयत्वादिगुणकमुपासीतेति वाक्यार्थः ननु संदेहः किमिह ब्रह्म प्रसिद्धं न प्रत्यगात्मा निर्दिश्यते उत परमात्मेति किं युक्तं प्रत्य
गात्मेति कुतः न तेषां सर्वत्र सामानाधिकरण्यान्निर्देशोपपत्तेः सर्वं खल्विदं ब्रह्म ब्रह्मादिस्तंबपर्यंतं कृत्स्नं जगत् ब्रह्मादिभावश्च
प्रत्यगात्मनो नाद्यविद्यामूलकर्मविशेषोपाधिकोऽस्तीति तेषां परमात्मकरणेः सर्वात्मत्वं सर्वकर्मकर्तृत्वं पाप्मनो निवृत्तस्य समला

आकाशात्मा आकाशवत् सूक्ष्मस्वच्छरूपः सकलेतरकारणभूतस्याकाशस्यात्मभूत इति वा आकाशात्मा स्वयं च प्रकाशते अन्यान् प्रका-
शयतीति वा आकाशात्मा सर्वकर्मा क्रियत इति कर्म सर्वं जगद् यस्य कर्म सर्वा वा क्रिया यस्य सो सर्वकर्मा सर्वकामः काम्यन्त इति
कामाः भोग्यभोगोपकरणादयस्ते परिशुद्धाः सर्वविधास्तस्य सन्तीत्यर्थः सर्वगन्धः सर्वरसः अप्राकृतमस्य दिव्यादिना
प्राकृतगन्धरसादिनिषेधाद् अप्राकृताः स्वासाधारणा निरवद्या निरतिशयाः कल्याणगुणाः स्वभोग्यभूताः सर्वविधा
गन्धरसास्तस्य सन्तीत्यर्थः सर्वमिदमभ्यात्तः उक्तमिदं सर्वपर्यन्तं सर्वं कल्याणगुणजातं स्वीकृतवान् अभ्यात्त इत्यभि-
व्याप्त्या आत्त इति वा तत्कर्तरि क्तः प्रतिपत्तव्यः अवाकी वाक् उक्तिः सास्य नास्तीति अवाकी कुतः इत्याह अनादर इत्यप्र-
वाप्तसमस्तकामत्वेनादर्तव्याभावात् आदररहितः अत एवावाकी अजस्य कप्रपूर्णैश्वर्यत्वाद्ब्रह्मादिस्तम्बपर्यन्ते
निखिले जगत् तृणीकृत्य सजोषमासीन इत्यर्थः अत एते गुणाः विवक्षिताः परमात्मन्येवोपपद्यन्ते श्री अनुपपत्तेस्तु
न शारीरः श्री तस्मिन् गुणसागरे पर्यालोचयतां खद्योतकल्पस्य शारीरसम्बन्धनिबन्धनापरिमितदुःखसम्बन्धयोग्यस्य ब-
द्धमुक्तोभयावस्थस्य जीवस्य प्रकृतगुणलेशसम्बन्धगन्धोऽपि नोपपद्यत इति नास्मिन् प्रकरणे शारीरपरिग्रहशङ्का जायत
इत्यर्थः श्री कर्मकर्तृव्यपदेशाच्च श्री एतमितः प्रेत्याभिसंभवितास्मीति प्राप्यतया परं ब्रह्म व्यपदिश्यते प्राप्तृतया च जी-
वः अतः प्राप्ता जीव उपासकः प्राप्यं परं ब्रह्मोपास्यमिति प्राप्तुरन्यदेवेदमिति ज्ञायते श्री शब्दविशेषात् एष म आत्मान्तर्हृ-
दय इति शारीरः षष्ठ्या निर्दिष्टः उपास्यस्तु प्रथमया एवं समानप्रकरणे वाजिनां च श्रूयते शब्दविशेषः अपि जीवपरयोः यथा
व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वा एवमयमन्तरात्मन् पुरुषो हिरण्मयो यथा ज्योतिरधूममिति अत्रान्तरात्मनी-
ति सप्तम्यन्तेन शारीरो निर्दिष्टः पुरुषो हिरण्मय इति प्रथमयोपास्यः अतः पर एवोपास्यः श्री स्मृतेश्च श्री इतश्च शारीरा-

६९

७६

नि१

द्विदकस्य शरीरतया सर्वदा सर्वात्मभूतं एवंभूततादात्म्यस्य प्रतिपादने परस्य ब्रह्मणः सकलहेयप्रत्यनीककल्याण
गुणाकरत्वं न विरुध्यते प्रकारभूतशरीरगतानां दोषाणां प्रकारिण्यात्मन्यप्रसंगात्तेषु ते निवृत्तिप्रयोग
दनेन गुणायैव भवतीति एवमेवोक्तं यदुक्तं जीवस्य सर्वतादात्म्यमुपपद्यत इति तदसत् जीवानां प्रतिशरीरभिन्ना
नामन्योन्यतादात्म्यासंभवात् मुक्तस्यानवच्छिन्नस्वरूपस्यापि जगत्तादात्म्यं जगज्जन्मस्थितिप्रलयकारणत्वेन संभ
वतीति जगद्व्यापारवर्जमिति वक्ष्यते जीवकर्मनिमित्तत्वाज्जगज्जन्मस्थितिलयानां स एव कारणमिति चेन्न स्वाधीनः
तत्कर्मनिमित्तत्वेपीश्वरस्यैव जगत्कारणत्वादतः परमात्मैवात्र ब्रह्मशब्दाभिधेयः इममेव सूत्रार्थमभियुक्ताम
न्यन्ते यदाह वाक्यकारः सर्वं खल्विदं ब्रह्मेति श्री विवक्षितगुणोपपत्तेश्च श्री वक्ष्यमाणाश्च गुणाः परमा
त्मन्येवोपपद्यन्ते मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्व
मिदमभ्यात्तोऽवाक्यनादर इति मनोमयः परिशुद्धेन मनसैकेन ग्राह्यः विवेकविमोकादिसाधनसप्तकानुगृहीतपरमा
त्मोपासननिर्मलीकृतेन हि मनसा गृह्यते अनेन हेयप्रत्यनीककल्याणैकतानतया स्वेतरसमस्तविलक्षणस्वरूपतात्
तेन भक्तिमनोभिर्मलिनानामेव ग्राह्यत्वात् प्राणशरीरः जगति सर्वेषां प्राणिनां धारकः प्राणो यस्य शरीरं आधेयं विधेयं शेष
भूतं च स प्राणशरीरः आधेयत्वविधेयत्वशेषत्वानि शरीरपदप्रवृत्तिनिमित्तानीत्युपपादयिष्यते भारूपः भास्वरूपः
अप्राकृतस्वासाधारणनिरतिशयकल्याणदिव्यरूपत्वेन निरतिशयदीप्तियुक्तः इत्यर्थः सत्यसंकल्पः अप्रतिहतसंकल्पः

क

३२

र्यमवस्थानमुक्तायएषमआत्मान्तर्हृदयेज्यायान्पृथिव्याज्यायानन्तरिक्षाज्ज्यायान्दिवोज्यायानेभ्योलोकेभ्यः सर्वकर्म्मा सर्वका
मः सर्वगंधः सर्वरसः [illegible] सर्वमिदमभ्यात्तोवाक्यनादर इत्येतहृदयेऽवस्थितस्योपास्यमानस्यप्राप्याकारेणनिर्दिष्टस्य
एषमआत्मान्तर्हृदयएतद्ब्रह्मेत्यविभूतपरब्रह्मपरमकारुण्येनास्मदुज्जिजीविषयाऽस्मद्धृदयेसन्निहितमितीदमनुसं
धानंविधाय एतमितःप्रेत्याभिसंभवितास्मीति यथोपासनं प्राप्तिनिश्चयानुसंधानंचविधाय इतियस्यस्या
द्धानविचिकित्सास्तीति एवंविधप्राप्यप्राप्तिनिश्चयोयेनतस्योपासकस्यप्राप्तेनसंशयोस्तीत्युपसंहृतं अतउपासना
र्थमर्भकौकस्त्वमणीयस्त्वंच श्री संभोगप्राप्तिरितिचेन्नवैशेष्यात् श्री जीवस्येवपरस्यापिब्रह्मणः शरीरान्तर्वर्ति
त्वमभ्युपगतंचेत्तद्वदेवशारीरसंबंधप्रयुक्तसुखदुःखोपभोगप्राप्तिरितिचेन्नहेतुवैशेष्यात् नहिशारीरान्तर्वर्तित्व
मेवसुखदुःखोपभोगेहेतुः अपितुपुण्यपापरूपकर्म्मपरवशत्वंतच्चापहतपाप्मनः परमात्मनोनसंभवति तथाचश्रुति
स्तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योभिचाकशीतीति श्री परमात्मानभोक्ता एवंतर्हि भोक्तृतयाप्रतीयमानोजीवएवस्या
दित्याशंक्याह श्री अत्ताचराचरग्रहणात् । कठवल्लीष्वाम्नायते यस्यब्रह्मचक्षत्रंचोभेभवतओदनः मृत्युर्यस्योपसेचनंक
इत्थावेदयत्रसः इति अत्रओदनोपसेचनसूचितोऽत्ताकिंजीवउतपरमात्मेतिसंदेहे किंयुक्तंजीवइति कुतः भोक्तृत्वस्यकर्म
निमित्तत्वात् जीवस्यैवतत्संभवात् अत्रोच्यते अत्ताचराचरग्रहणात् अत्तापरमात्मैव कुतः चराचरग्रहणात् चराचर
स्यकृत्स्नस्यभोक्तृत्वंलयस्यैवसंभवति नचेदंकर्मनिमित्तंभोक्तृत्वं अपितुजगज्जन्मस्थितिलयहेतुभूतस्यपरस्यब्रह्मणोलि
लोःसंहर्तृत्वं सोऽध्वनःपारमाप्नोतितद्विष्णोःपरमंपदमित्यत्रैवदर्शनात् तथाचमृत्युर्यस्योपसेचनमितिवचनात्

ह्मयः सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च यो मामेवमसंमूढो जानाति पुरुषोत्तमं ईश्वरः सर्वभूता
नां हृद्देशेऽर्जुन तिष्ठति भ्रामयन् सर्वभूतानि यंत्रारूढानि मायया तमेव शरणं गच्छेति च शारीरमुपास्यं के परमात्मा
त्मानं चोपास्यं स्मृतिर्दर्शयति ॥ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ अल्पायतनत्वे
मर्भकौकस्त्वं तद्व्यपदेशोऽल्पव्यपदेशः एष म आत्मान्तर्हृदये अणीयसि हृदयायतने स्थितत्वादणीयान् व्रीहिर्यवो वेत्या
दिनाऽणीयस्त्वस्य स्वरूपेण व्यपदेशाच्च नायं परमात्मा अपि तु जीव एव नित्यं विभुं सर्वगतं सुसूक्ष्मं यद्भूतयोनिं परिपश्य
न्ति धीराः इत्यादिभिः परमात्मनोऽपरिच्छिन्नत्वावगमात् जीवस्य चाराग्रमात्रव्यपदेशादिति चेन्नैतदेवं परमात्मैव ह्यणी
यानित्येवं निचाय्यत्वेन व्यपदिश्यते एवं निचाय्यत्वेन द्रष्टव्यत्वेन एवमुपास्यत्वेनेति यावत् न पुनरणीयस्त्वमे
वास्य रूपमिति व्योमवच्चापि व्यपदिश्यते स्वाभाविकमहत्त्वं चास्यैवं व्यपदिश्यते ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्या
यान् दिवो ज्यायानेभ्यो लोकेभ्य इति उपासनार्थ एवाल्पत्वव्यपदेशः तथा हि सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासी
तेति सर्वात्मत्वे प्रलयकारणत्वेन सर्वस्यात्मत्वं तयाख्यातं प्रकृते प्रकृतं जीवनियन्तृत्वेन सर्वात्मकं ब्रह्म उपासीतेत्युपासनं विधाय
अथ खलु क्रतुमयोऽयं पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति यथोपासनं प्राप्यसिद्धिमभिधाय स क्रतुं कु
र्वीतेति गुणविधानार्थमुपासनमनूद्य मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगंधः
सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर इति जगद्धैश्वर्यविशिष्टस्य स्वरूपगुणोऽभ्यावादेयान् प्रतिपाद्य एष म आत्मान्तर्हृदयेऽणीयान्
व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वेत्युपासकस्य हृदयेऽणीयस्त्वमतद्वाक्यमेतेनोपास्यस्य परमपुरुषस्योपासना

विविधा जायते एवं च सति अन्तेपि वेतावितिभ्यां देवाः छत्रिणो गच्छन्तीतिवत् अतिपत्तव्यः यद्वा प्रयोज्यप्रयोजकरूपेण पाने
कर्तृत्वं जीवपरयोरुपपद्यते श्रीविष्णुवल्लभवत् ॥ अस्मिन् प्रकरणे जीवपरमात्मानावेवोपास्यत्वोपासकत्वप्राप्यत्वप्राप
कत्वविशिष्टौ सर्वत्र प्रतिपाद्येते ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेतीति ब्रह्मजज्ञो जीवः ब्रह्मणो जा
तत्वात् ज्ञत्वाच्च तं देवमीड्यं विदित्वा जीवात्मानमुपासके ब्रह्मात्मकत्वेनावगम्यते इत्यर्थः स्वाध्यायः सेतुरीजानानामक्षरं ब्रह्म
यत्परं अभयं तितीर्षतां पारं नाचिकेतं शकेमहीत्युपास्यः परमात्मा उच्यते नाचिकेतं नाचिकेतस्य कर्मणा प्राप्यमित्यर्थः ॥
आत्मानं रथिनं विद्धि शरीरं रथमेव च इत्यादिना उपासको जीव उच्यते तथा विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः सो
ऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति प्राप्यप्राप्तारावेवाभिधीयेते जीवपरमात्मानौ इहापि छायातपौ विलक्षणत्वं सर्वज्ञत्वा
ल्पज्ञतावेव विशिष्यप्रतिपाद्येते अत एव स्यात् येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके एतज्जीवस्वरूपयाथात्म्य
प्रश्नोपक्रमत्वात् सर्वमिदं प्रकरणं जीवपरमितिप्रतीयते इति तन्न देवं नहि जीवस्य देहातिरिक्तस्य अस्तित्वनास्तित्वशंकायां प्रश्नः
तथा सति पूर्ववरद्वयवरणानुपपत्तेः तथाहि पितुः सर्ववेदसदक्षिणाकं क्रतुसमाप्तिवेलायां दीयमानदक्षिणो वैगुण्येन क्रतु
वैगुण्यं मन्यमानेन कुमारेण नचिकेतसा आस्तिकाग्रेसरेण बालत्वेनापि पितुः क्रतु साद्गुण्यमिच्छता कस्मै मां दास्यसीत्यसक्
रुक्त्युत्तरं मृत्यवे त्वा ददामीति निर्बन्धरूपपितुर्वचनात् मृत्युसदनं प्रविष्टेन तस्य सदनासोऽपि विषये तद्दर्शनात् तत्र तिस्रो रात्री
रुपोषितवत्स्वोपवासभीतेन अतिविधानप्रवृत्तेन मृत्युप्रदत्ते वरत्रये अस्मात्प्रथमेन वरेण स्वात्मानं प्रति पितुः
प्रसादो वृतः एतच्च सर्वं देहातिरिक्तमात्मानमजानतो नोपपद्यते द्वितीयेन वरेणाग्निर्देहान्तरभाव्यफलसाधनभूता
ग्निविद्या वृता तदपि देहातिरिक्तात्मानभिज्ञस्य न संभवति अतस्तृतीयेन वरेणायं यदिदं व्रियते येयं प्रेते विचिकित्सा मनुष्ये

सर्वं चैतत्कृत्स्नं चराचरं जगदिहाऽदनीयोऽदनत्वेन गण्यते उपसेचनं नाम स्वयमद्यमानं सदन्यस्यादनहेतुरत उपसेचनं ते
न मृत्युरप्यद्यमानत्वात्तदुपसेच्यमानस्य कृत्स्नस्य ब्रह्मक्षत्रपूर्वकस्य जगतश्चराचरस्यादनमत्र विवक्षितमित्यवग
म्यते ईदृशोऽत्ताऽदनमुपसंहार एव तस्मादीदृशं जगदुपसंहारित्वरूपभोक्तृत्वं परमात्मनः एवं श्रीप्रकरणात्प्रकरणाच्चेदं पर
स्यैव ब्रह्मलिङ्गः महान्तं विभुमात्मानं मत्वा धीरो न शोचति नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमे
वैष वृणुते तेन लभ्यः तस्यैष आत्मा वृणुते तनुं स्वामिति प्रकृतं क इत्था वेद यत्र सः इत्यपि हितस्य प्रसादः इति तस्य दुर्विबो
धत्वमेव पूर्वं प्रस्तुतं प्रत्यभिज्ञायते अप्रत्यक्षान्तायं ब्रह्मलक्षणोऽहं नस्थितः पुरुषोत्तमोऽपहतपाप्मा परमात्मा अनन्तर
म् ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेता इति ऋक्
तभोक्तृत्वेन सह द्वितीयस्याभिधानात् द्वितीयस्य प्राणो बुद्धिर्वा स्यात् ऋतपानं हि कर्मफलभोग एव स च परमात्मनो न सं
भवति बुद्धिप्राणयोस्तु भोक्तृजीवस्योपकरणभूतयोः यस्मात्कर्तृत्वाभिमानेः न्यपः संभवतीति तयोरन्यतरेण सह द्वितीयो
जीव एव प्रतिपाद्यते तदेवं प्रकरणत्वात्पूर्वप्रस्तुतात्मापि स एवं भवितुमर्हतीत्येवं प्राप्ते उच्यते श्रीगुहां प्रविष्टावात्मानौ हि तद्दर्श
नात् श्रीनं प्राणजीवौ बुद्धिजीवौ वा गुहां प्रविष्टावृतं पिबन्ताविति मुच्येते अपि तु जीवात्मपरमात्मानौ हि तथा व्यपदिश्येते कुतः
तद्दर्शनात् अस्मिन्प्रकरणे जीवपरयोरेव गुहाप्रवेशव्यपदेशो दृश्यते परमात्मनस्तावत् तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरे
ष्ठं पुराणम् अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति श्रीर्यस्यापि या प्राणेन संभवत्यदितिर्देवतामयी गुहां प्र
विश्य तिष्ठन्तीं या भूतेभिर्व्यजायत इति कर्मफलान्यत्तीत्यदितिर्जीव उच्यते प्राणेन संभवति प्राणेन सहवर्तते देवतामयी
इन्द्रियाधीनभोगा गुहां प्रविश्य तिष्ठन्तीं हृदयपुण्डरीकोदरवर्तिनीं भूतेभिर्व्यजायत पृथिव्यादिभूतैः सहिता देवादिरूपेण

श्री

सर्वं समंजसमतः परमात्मैवाग्नेनेति सिद्धं ॥ श्री अन्तर उपपत्तेः ॥ श्री इदमामनंति छंदोगाः य एषोऽक्षिणि पुरुषो दृश्यत एष
आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तत्र संदेहः किमयमक्ष्याधारतया निर्दिश्यमानः पुरुषः प्रतिबिंबात्मा उत चक्षु
रिन्द्रियाधिष्ठाता देवताविशेषः उत जीवात्मा अथ परमात्मेति किं प्राप्तं प्रतिबिंबात्मेति कुतः प्रसिद्धवन्निर्देशात् दृश्यत इति
प्रत्यक्षाभिधानाच्च जीवात्मा वा तस्यापि हि चक्षुषि विशेषेण सन्निधानात्प्रसिद्धिरुपपद्यते उन्मीलिते हि चक्षुषि दृष्टस्य
जीवात्मनः शरीरे स्थितिं गमयति निष्क्रान्ते विरश्मिभिरेषोऽस्मिन्प्रतिष्ठित इति श्रुतेः प्रसिद्धं चक्षुः प्रतिष्ठो देवताविशेषो वा
एष एव प्रसिद्धवन्निर्देशोपपत्तेरेवामन्यन्त इति प्राप्ते प्रचक्ष्महे अन्तर उपपत्तेः अक्ष्यन्तरः परमात्मा कुतः एष आत्मेति
होवाचैतदमृतमभयमेतद्ब्रह्मेति संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभिसंयंति एष उ एव वामनिः एष हि सर्वा
णि वामानि नयति एष उ एव भामनिरेष हि सर्वेषु लोकेषु भाति इत्येषां गुणानां परमात्मन्येवोपपत्तेः ॥ श्री स्थानादिव्यप
देशाच्च ॥ श्री चक्षुषि स्थितिनियमनादयः परमात्मनः एव यश्चक्षुषि तिष्ठन्नित्यादिना व्यपदिश्यंते अतस्तत्रापि य एषोऽ
क्षिणि पुरुष इति स एव प्रतीयते अतः प्रसिद्धवन्निर्देशोऽप्यस्य परमात्मन्युपपद्यते तत एव दृश्यत इति साक्षात्कारव्यपदेशो
पि योगिभिर्दृश्यमानत्वात् उपपद्यते ॥ श्री सुखविशिष्टाभिधानादेव च ॥ इतश्चाक्ष्याधारपुरुषोत्तमः कं ब्रह्म खं ब्रह्मेति
प्रक्रान्तस्य सुखविशिष्टस्य ब्रह्मण उपासनस्थानविधानार्थं संयद्वामत्वादिगुणविधानार्थं च य एषोऽक्षिणि पुरुष इत्यभिधाना
त् एवकारान्तरपेक्ष्यत्वाद्ब्रह्मैव नयति ॥ नन्वग्निविद्याव्यवधानात् कं ब्रह्मेति प्रक्रान्तं ब्रह्म नेह सन्निधत्ते तथा हि अग्नयः प्रा

अस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय इति अत्र परमपुरुषार्थरूपब्रह्मप्राप्ति
लक्षणमोक्षे याथात्म्यविज्ञानाय तदुपायभूतपरमात्मोपासनपरावरात्मतत्त्वजिज्ञासयायं प्रश्नः क्रियते एवं च
येयं प्रेत इति निःशरीरवियोगमात्राभिप्रायमपि तु सर्वबन्धविनिर्मोक्षाभिप्रायं यथा न प्रेत्य संज्ञास्तीति अयमर्थः
मोक्षाधिकृते मनुष्ये प्रेते सर्वबन्धविनिर्मुक्ते तत्स्वरूपविषयवादिविप्रतिपत्तिनिमित्तास्तित्वनास्तित्वालिकायेयं वि
चिकित्सा तदपनोदनाय तत्स्वरूपयाथात्म्यं त्वयानुशिष्टोऽहं विजानीयामिति तथा हि बहुधा विप्रतिपद्यन्ते केचि
दित्तिमात्रस्यात्मनः स्वरूपोच्छित्तिलक्षणो मोक्ष इत्याचक्षते अन्ये वित्तिमात्रस्य वस्तुनः अविद्यास्तमयं अपरे पाषाण
कल्पस्यात्मनो ज्ञानाद्यशेषवैशेषिकगुणोच्छेदलक्षणं कैवल्यरूपं अपरे अपहतपाप्मानं परमात्मानमभ्युपगच्छन्तः
तस्यैवोपाधिसंसर्गनिमित्तजीवभावस्योपाध्यपगमेन तद्भावलक्षणं मोक्षमिच्छन्ति त्रय्यन्तनिष्णातास्तु निखिलजगदेकका
रणस्याशेषहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपस्य स्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणाकरस्य सकलेतरविल
क्षणस्य सर्वात्मभूतस्य परस्य ब्रह्मणः शरीरतया प्रकारभूतस्यानुकूलापरिच्छिन्नज्ञानस्वरूपस्य परमात्मानुभवैकरसजी
वस्यानादिकर्मरूपाविद्यातिरोहितस्वरूपस्याविद्योच्छेदपूर्वकस्वाभाविकपरमात्मानुभवमेव मोक्षमाचक्षते अत्र मोक्षस्व
रूपं तत्साधनं च वक्ष्यमाणद्विद्यामिति नचिकेतसा पृष्टो मृत्युस्तस्यात्यन्तदुर्लभत्वप्रदर्शनेन विविधभोगवितरणप्र
लोभनेन चैनं परीक्ष्य मोक्षयोग्यतामभिज्ञाय उपसन्नायास्मै परावरात्मतत्त्वविद्यां प्रवक्ष्यामीति मत्वा प्राप्तिलक्षणमोक्षे च दुर्
विज्ञेयत्वप्रदर्शनेन मत्वा परमात्मोपासनस्य विशेषेण नैनमुपदिशन् देवैरत्रापि विचिकित्सितं पुरेति

विद्यायैभ्यः परिपालयाम इति अग्नीनामग्निविद्यायाः ब्रह्मविद्यांगत्वेन तत्सन्निधानाविरोधात्सुखविशिष्टं प्रकृतमेव ब्र
ह्मोपासनं विधानार्थं गुणविधानार्थं चोच्यते नन्वाचार्यस्तु ते गतिं वक्तेति गतिमात्रपरिशेषणादाचार्येणागति
रेवोपदिश्यत इति गम्यते तत्कथं स्यात् न गुणविधय इत्युच्यते तद्विधीयते आचार्यस्तु ते गतिं वक्तेत्यस्यायमभिप्रा
यः ब्रह्मविद्यामनुपदिश्य प्रोषिते गुरौ तदलाभादनाश्वासमुपकोसलमुज्जीवयितुं स्वपरिचरणप्रीता गार्हपत्या
दयोग्नयः स्वयं तस्मै ब्रह्मस्वरूपमात्रं तदंगभूतां चाग्निविद्यामुपदिश्य आचार्याद्धैवाविद्या विदिता साधिष्ठं प्रा
पयतीति श्रुत्यर्थमालोच्य साधुतमत्वप्राप्त्यर्थमाचार्य एवास्य संयद्वामत्वादिगुणकं ब्रह्म [illegible] ब्रह्मतदुपासन
स्यानमर्चिरादिकां च गतिमुपदिष्टवन्तीति मत्वाचार्यस्तु ते गतिं वक्तेत्यवोचन् गतिग्रहणमुपदेश्यविद्याविशेषप्र
दर्शनार्थमत एवाचार्योऽपि यथेह तु ते तद्वक्ष्यामीत्यभिधाय यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न
श्लिष्यत इत्युपक्रम्य संयद्वामत्वादिकल्याणगुणविशिष्टं ब्रह्मोक्त्वा तद्ब्रह्मोपासस्याप्यर्चिरादिकां च गतिमुपदिदेश। अतः कं
ब्रह्म खं ब्रह्मेति सुखविशिष्टस्यैव ब्रह्मणोऽभिधानादयमन्तःस्थाधारः परमात्मा ननु च कं ब्रह्म खं ब्रह्मेति परं ब्रह्माभिधीयत इ
ति कथमवगम्यते यस्मैऽतद्व्याधारतयाभिधाने कं ब्रह्म खं ब्रह्मेति प्रसिद्धाकाशलौकिकसुखयोरेव ब्रह्मदृष्टिर्विधीयत इति
प्रतिभाति नाम ब्रह्म मनो ब्रह्मेत्यादिवच्च न सा रूप्याव्याह॥ श्री ब्रह्म एव च स ब्रह्म यतः तत्र यदेव कं तदेव खमिति सुख
मिति सुखविशिष्टस्याकाशस्याभिधानेऽतः एव खशब्दाभिधेयः स्वाकाशः परं ब्रह्म एतदुक्तं भवति अग्निभिः प्राणो ब्रह्म कं ब्र
ह्म खं ब्रह्मेत्युक्ते उपकोसलः विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीत्यस्यायमभिप्रायः न तावत्प्राणादिप्रतीकोपा

वि

सर्वाश्रमसिद्धिनं १६७

५ आचार्यप्रश्नावद्ब्रह्मचारिन्भु... स्व

लोवाच ब्रह्मखं ब्रह्मेति किं ब्रह्मेति विद्यामुपदिश्य अथ हैनं गार्हपत्योनुशशासेत्यारभ्य अग्नीनामुपासनमुपदिदिशुरग्न
चाग्निविद्या ब्रह्मविद्याङ्गमिति वक्तुं प्राक्यं ब्रह्मविद्याफलानन्तरं नतद्विरोधि सर्वायुःप्राप्तिसंततत्वविछेदादिफ
लश्रवणात् । उच्यते प्राणो ब्रह्मेतिदमनमभयमेनद्ब्रह्मेत्युभयत्र ब्रह्मसंपादनात् । आचार्यस्तु ते गतिं वक्तेत्यग्नि
वचनाच्च गत्युपदेशार्थत्वादेवं ब्रह्मविद्यायाः अस्मादेनमन्यथा गतानाग्निविद्या ब्रह्मविद्याङ्गमिति निश्चीयते अथ हैनं गा
र्हपत्योऽनुशशासेति ब्रह्मविद्याधिकृतस्यैवाग्निविद्योपदेशाच्च किं च व्याधिभिः परिपूर्णोऽस्मि ब्रह्मप्राप्तिव्यवनिरि
क्तनानाविधकामोपहतिपूर्णगर्भजन्मजरामरणादिभवभयाभिलम्बायोपकोसलायैवासौ मनेऽ ब्रह्मविद्या
त्मविद्यां चेति समुच्चित्योपदेशात् अन्येकफलात्मविद्याङ्गत्वमग्निविद्यायाः प्रतीयते एवं चाङ्गत्वेऽवगते सति
फलानुकीर्तनमर्थवाद इति गम्यते न चैमोक्षविरोधिफलं किंचिच्छ्रूयते अपहते पापकृत्यां लोकीभवति सर्वमायुरेति
ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्ते उपवयं तं भुञ्जामोऽस्मिंश्च लोकेऽमुष्मिंश्चेत्यमीषां फलानां मोक्षाधिकृतस्या
नुगुणत्वात् अपहते पापकृत्यां ब्रह्मप्राप्तिविरोधि पापं कर्माभिहत्य लोकीभवतीति न द्विरोधिनि पापे निरस्ते ब्रह्मलोके प्राप्ते
ति सर्वमायुरेति ब्रह्मोपासनपरिसमाप्तेर्यावदायुरपेक्षितं तत्सर्वमेति ज्योग्जीवति आधिभिरनुपहतो यावद्ब्रह्मप्राप्ति जीवति
नास्यावरपुरुषाः क्षीयन्ते अस्य शिष्यप्रशिष्या आद्यन्तः पुत्रपौत्रादय अब्रह्मविद एव भवन्तीति नास्याब्रह्मवित्कुले भवतीति श्रुत्यन्तरे
ब्रह्मविद्याफलत्वेन श्रूयते उपवयं तं भुञ्जामोऽस्मिंश्च लोकेऽमुष्मिंश्च य एवमेतमेवं विद्वानुपास्ते यावद्ब्रह्मप्राप्ति

पाधिकानां तेषु संभवान्न परमात्मनः इतरच्छ्रुत्यादिलिङ्गेषु हृद्व्योमविनुर्महितिप्रतिबिंबस्य नावकाशः हृदंतरसन्निधा
नापन्नत्वान्नियमेनावस्थानसंभवः जीवस्यापि सर्वेन्द्रियव्यापारानुगुणत्वात्सर्वेन्द्रियकेंद्रभूते स्थानविशेषे
व स्थितिरिति च सुषुप्तिनावस्थानेऽदेवताया अङ्गुरश्मिभिरेषोऽस्मिन्प्रतिष्ठित इति रश्मिद्वारेणावस्थितिवचनादेतांतरा
वस्थितस्यापीन्द्रियाधिष्ठानोपपत्तेर्न चक्षुष्यवस्थानं सर्वेषामेवैषां निरुपाधिकामृतत्वादयो न संभवन्त्येव तस्माद्भिन्न
रूपः परमात्मा स्थानादिव्यपदेशात्स्तुत्यत्र चक्षुष्यवस्थितिर्लिङ्गमादिनाभिहितापादनाने च सुषुप्तिस्थानानियमात्किंच परमा
त्मनः एवेति सिद्धे कृत्वा लिङ्गरूपस्य परमात्मत्वेन साधितः इदानीं तद्देवसमर्थयते अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्य
पदेशात् श्रीकाण्वमाध्यंदिनाश्च वाजसनेयिनः समामनंति यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथि
वी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्मान्तर्याम्यमृत इत्येवमप्स्वग्नावन्तरिक्षे वाय्वादिसदिक्चन्द्रतारकाकाशतमस्ते
जस्सु चाधिदैवेषु भूतेषु च सर्वेषु प्राणवाक्चक्षुःश्रोत्रमनस्त्वग्विज्ञानरेतस्स्वात्मनीषु चातिष्ठन्तमन्तरो दत्तरभूतं तत्तद्वेद्य
तत्तच्छरीरकं तत्तन्नियमयन्तं केचिन्निर्दिश्य एष त आत्मान्तर्याम्यमृत इत्युपदिशन्ति माध्यंदिनपाठे तु यः सर्वेषु लोकेषु तिष्ठन्
यः सर्वेषु यः सर्वेषु वेदेषु यः सर्वेषु यज्ञेष्विति त्रयः पर्याया अधिका विज्ञाने तिष्ठन्नित्यस्य पर्यायस्य स्थाने य आत्मनि तिष्ठन्नि
ति पर्यायः स एवात्मान्तर्याम्यमृत इति च विप्रतिपत्तिश्च संप्राप्यते किमन्तर्यामी प्रत्यगात्मा उत परमात्मेति किं युक्तं प्रत्यगात्मेति कुतः
वाक्यशेषात् तद्वाक्यशेषे श्रोतेति करणायत्तज्ञानश्रुतेः एवं द्रष्टृत्वं चान्तर्यामित्वोपदेशान्नान्योऽतोऽस्ति द्रष्टेति द्रष्टन्तरनिषेधाच्चेत्येवं प्रा
प्तेऽभिधीयते अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात् ॥ अधिदैवादिलोकादिपदचिह्नितेषु वाक्येषु श्रूयमाणोऽन्त

७४

श्री

क्षेपे २

सनत्कुमारेणाभिहितं जरामरणादिभयभीतस्य मुमुक्षोर्ब्रह्मोपदेशाय प्रवृत्तत्वात् । अतो ब्रह्मैवोपास्यमुपदिष्टं तत्र प्रसिद्धैः प्राणा
दिभिः समानाधिकरणं ब्रह्म निर्दिष्टं तेषु च प्राणविशिष्टत्वं जगद्धितरणयोगेन वा प्राणशरीरतया एव वास्य निर्वर्तत्वेन वा
ब्रह्मण उपपद्यते इति विजानाम्यहं यत्प्राणो ब्रह्मेत्युक्तवान् तथा सुखाकाशयोरपि ब्रह्मशरीरतया तन्नियाम्यत्वेन विशे
षणत्वमुतान्योन्यव्यवच्छेदकतया निरतिशयानन्दरूपब्रह्मस्वरूपसमर्पणपरत्वेन वा तत्र प्रथमकल्पे तयोः शरीरतया
विशेषणत्वे वैषयिकसुखभूताकाशयोर्नियामकत्वं ब्रह्मणः स्यादिति स्वरूपावगतिर्न स्यात् । अन्योन्यव्यवच्छेदकत्वेप
रिच्छिन्नानन्दस्वरूपत्वं ब्रह्मणः स्यादिति अन्यतरप्रकारनिर्दिधारयिषया कं च तु खं च न विजानामीत्युक्तवान् उपकोस
लस्यैवमप्रज्ञानेनातो अग्नयो यद्वाव कं तदेव खं यदेव खं तदेव कमिति सुखविशिष्टब्रह्मणः सुखरूपत्वमेवापरिच्छिन्नमित्यूचुः अ
तः प्राणशरीरतया प्राणविशिष्टं यद्ब्रह्म तदेवापरिच्छिन्नसुखस्वरूपं चेति निर्णीतम् प्राणं च हास्मै तदाकाशं चोचुरिति श्रुतः
कं ब्रह्म खं ब्रह्मेत्यत्रापरिच्छिन्नसुखं ब्रह्म प्रतिपादितमिति परं ब्रह्मैव तत्र प्रकृतं नेदं वा तस्याधारतयाभिधीयते
तस्याधारः परमात्मा श्रुतोपनिषत्कगत्यभिधानाच्च । श्रुतोपनिषत्कस्याधिगतपरमपुरुषयाथात्म्यस्यानुसन्धे
यतया श्रुतत्वात् तत्र प्रतिपाद्यमानार्चिरादिकां गतिं यातामपुनरावृत्तिलक्षणपरमपुरुषप्राप्तिकरीमुपकोसलायाग्नि
पुरुषं श्रुतवते तेऽर्चिषमेवाभिसंभवन्ति अर्चिषोऽहः अह्नः आपूर्यमाणपक्षमित्यारभ्य चन्द्रमसो विद्युतं तत्पुरुषोऽमा
नवः स एनान् ब्रह्म गमयति एष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते इत्यनेनोपदिश्यते तेनाप्य
यमक्षिपुरुषः परमात्मा । अनवस्थितेरसंभवाच्च नेतरः । छायात्मनामधिष्ठितिनियमेनानवस्थानादमृतत्वासंभवाच्च नेतर

कर्मलितिरोहितस्वाभाविकज्ञानस्य जीवस्य चतुराद्विकरणात् जन्मापरस्यतुस्वतएव नान्योतोस्ति द्रष्टेत्येतदपि पूर्ववाक्यादिनानि
यतुर्देष्टुरन्यो द्रष्टा नास्तीतिवदति यं पृथिवी न वेद यमात्मा न वेदेत्येवमादिभिर्वाक्यैः पृथिव्यात्मादिनियमैरनुपलभ्य
मान एव नियमयतीति तत्त्वमुक्तं तदेवाह द्रष्टाद्रष्टाश्रुतः श्रोतेति नियामकत्वं नान्योतोस्तीत्यादिनानस्य नियंतुर्नियंतृत्वं तरं नि
विध्यते एवं तस्यात्मास्तस्तु आत्मेति तद्रतिमतिरेक विभक्ति निर्दिष्टस्य जीवस्यात्मत्वं तत्रोपपादितुं यमानीतर्यामीन प्रसमर्था
त्मा भवितुमर्हति श्री न च तस्मात्तत्त्वमतदृर्माभिलापात् शरीरश्च श्री स्मार्तं प्रधानं शारीरो जीवः स्मार्तंच शारीरश्चाना
तर्यामी श्रुतदृर्माभिलापात् तयोरसंभावितधर्माभिलापात् स्वभावतएव सर्वस्य द्रष्टृत्वं सर्वस्य नियंतृत्वं सर्वस्यात्मत्वं
स्वतएवामृतत्वं च तयोर्न संभावनार्हमर्हति एतदुक्तं भवति यथा स्मार्तमचेतनं सर्वज्ञत्वनियंतृत्वसर्वात्मत्वादिकं ना
र्हति तथा जीवोप्यनवद्यत्वादिसमीचीनगुणानां परमात्मत्वमनन्यः प्रसंगात्मनिष्प्रतिरेकश्रुतिस्वरूपेन दर्शितोनिरपेक्षं चर्ह
त्वं तदमाह श्री उभयेपिहि भेदेनैनमभिधीयते श्री उभयेमाध्यंदिनाः काण्वाश्चान्तर्यामिणो नियाम्यत्वेन वागादिभिः स्वैस्तैः
समत्वेन शारीरमपि विभज्याधीयते यश्चात्मनि तिष्ठन्नात्मनोंतरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमंतरो यमयति स्व
आत्मांतर्याम्यमृत इति माध्यंदिना योविज्ञाने तिष्ठन्नित्यादि च काण्वाः परमात्मत्वं नियामकत्वं तथापि स्याद्विलक्षणत्वेनेनम
धीयते सर्वैः अन्तर्यामी प्रसमगात्मकोनिवलत्वोपहतपाप्मा परमात्मा नारायण इति ततः श्री अदृश्यत्वादिगुणकोध
र्मोक्तेः आथर्वणिकाः प्रधीयते अथ परा यया तदक्षरमधिगम्यते यत् [illegible] मगोत्रमवर्णमचक्षुः श्रोत्रं
तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः इति तथोत्तरत्राह अक्षरात्परतः पर इति तत्र

प्रीत्यपहतपाप्मा परमात्मा नारायणः काण्वपाठे सिद्धेभ्यो विदेवादिमनुष्येभ्यो पितृभ्यः काम्यधिलोकादिमन्ति वाक्यानि मा
ध्यंदिनपाठे सन्तीति तावन्नार्थमधिदेवाध्यधिलोकादिषूभयोः पाठानन्तदेवमुभयेष्वपि वाक्येषु तद्यो मे परमात्मेत्यर्थः
कुतः तस्मैव्यपदेशात्परमात्मन एव मध्यादेवमदेक एव सन् सर्वलोकसर्वभूतसर्वदेवादीन्नियमयतीति तथा ह्युद्दालकं प्रत्युः
यस्त्वं च लोकं परं च लोकं सर्वाणि भूतानि योऽन्तरो यमयतीत्युपक्रम्य तमेतमक्षरमिति ब्रूहीति तस्य चोत्तरं यः पृथिव्यां तिष्ठन्नित्यार
भ्योऽक्षं तदेतत् सर्वान् लोकान् सर्वाणि च भूतानि सर्वाणि चैव देवतानि सर्वान्वेदान् सर्वांश्च यज्ञानेतत्प्रविश्य सर्वप्रकारं नि
यमनेन सर्वशरीरतया सर्वस्यात्मत्वेन च सर्वज्ञात्सत्यसंकल्पात्सुहृदोऽन्यस्य न संभवति तथा हि श्रुतः प्रविष्टः शास्ता
जनानां सर्वात्मा तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवदित्यादौ श्रेयोपनिषदादिवाक्यानि परमात्मन
एव सर्वस्य प्रभुत्वं सर्वस्मात्मत्वमित्यादीनि वदन्ति तथा सुबालोपनिषदि । नैवेह किंचनाग्र आसीदमूलमनाधारा इ
माः प्रजाः प्रजायन्ते दिव्यो देव एको नारायणश्चक्षुश्च द्रष्टव्यं च नारायणः श्रोत्रं च श्रोतव्यं च नारायण इत्यारभ्यान्तःशरी
रे निहितो गुहायामज एको नित्यः यस्य पृथिवी शरीरं यः पृथिवीमन्तरे संचरन् यं पृथिवी न वेद यस्यापः शरीरमित्यादि यस्या
सुः शरीरं यो मृत्युमन्तरे संचरन् यं मृत्युर्न वेद एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायण इति परस्यैव ब्रह्मणः सर्वात्म
त्वं सर्वशरीरत्वं सर्वनियन्तृत्वं च प्रतिपाद्यते स्वाभाविकं चास्य नियन्तृत्वं परमात्मन एव धर्मः न च परस्यात्मनः करणायत्तदृ
ष्ट्यादिकमपि तु स्वभावत एव सर्वं तथा सत्यसंकल्पत्वात् तथा च श्रुतिः पश्यत्यचक्षुः स शृणोत्यकर्णः अपाणिपादो जवनो
ग्रहीतेति न च दर्शनश्रवणादिहेतोश्चक्षुरादिकरणजन्मनो ज्ञानस्याभावे चक्षुराद्यविषयरूपादिसाक्षात्कारस्य सचक्षुरूपादिसाक्षात्कारः

भूतमपरोक्षज्ञानं तच्च भक्तिरूपापन्नं यमेवैष वृणुते तेन लभ्य इत्यत्रैव विशेष्यमाणत्वात्तदुपाय श्रुतिः ८

श्री: भा: ७७

प्रतीतस्य एकविज्ञानेन सर्वविज्ञानोपपादनादिभिः तथा तात्पर्यमस्या आहरस्य भेदश्च व्यपदिश्यते अक्षरात्परतः
परः इत्यादिना तथा हि सः ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहेति सर्वविद्याप्रतिष्ठा भक्ताब्रह्मवि
द्यामुक्त्वा तां परविद्यैव च सर्वविद्याप्रतिष्ठात्वात् मिमां सर्वविद्याप्रतिष्ठाविद्यां चतुर्मुखादथर्वादिगुरुपरंपरया प्राप्ता
र संप्रति प्राप्तो जिज्ञासुः शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ कस्मिन्नु भगवो विज्ञाते सर्वमिदं
विज्ञातं भवतीति ब्रह्मविद्यायाः सर्वविद्याश्रयत्वात् ब्रह्मविज्ञानेन सर्वं विज्ञातं भवतीति कृत्वा ब्रह्मलक्षण
मनेन पृष्टः तस्मै स होवाच द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा चेति ब्रह्मप्रेप्सुना द्वे विद्ये वेदि
तव्ये ब्रह्मविषये परोक्षापरोक्षरूपे द्वे ज्ञाने उपादेये तत्र अपरोक्षपूर्वकजन्यं ज्ञानं अपरोक्षं योगजन्यं ज्ञानं त
योः ब्रह्मप्राप्त्युपायः श्रवणागमजन्यं विवेकादिसप्तकानुगृहीतं ज्ञानं तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन
दानेन तपसानाशकेनेति श्रुतेः आह च भगवान् पराशरः तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने आगमोत्थं विवे
काद्द्विधा ज्ञानं तथोच्यते इति तत्रापरा ऋग्वेदो यजुर्वेद इत्यादिना धर्मशास्त्राणीत्यन्तेन आगमोत्थं ब्रह्मसाक्षा
त्कारहेतुभूतं परोक्षज्ञानमुक्तं साङ्गस्य इतिहासपुराणस्य धर्मशास्त्रस्य मीमांसस्य वेदस्य शब्दज्ञानोत्पत्तिहेतुभूतत्वात्
अपरात्वं यया तदक्षरमधिगम्यते इत्युपासनाख्यब्रह्मसाक्षात्कारलक्षणं भक्तिरूपापन्नं ज्ञानमुच्यते यत्तदद्रेश्यमित्यादि
नापरोक्षापरोक्षरूपज्ञानद्वयविषयस्य परस्य ब्रह्मणः स्वरूपमुच्यते यथोर्णनाभिः सृजते गृह्णते चेत्यादिना यथोक्तलक्षणा
त्परस्माद्ब्रह्मणोऽक्षरात्कृत्स्नस्य चेतनाचेतनात्मकप्रपंचस्योत्पत्तिरुक्ता विश्वमिति वचनान्नाचेतनमात्रस्य तपसा चीयते ब्रह्म

७७

संदिह्यते किमिहादृश्यत्वादिगुणकमक्षरमक्षरात्परतः परश्च प्रकृतिरुताहो उभयत्र परमात्मैवेति किं प्राप्तं प्रकृति
पुरुषाविति कुतः अस्याक्षरस्यादृश्यत्वादिवचनादृश्यत्वादिचेतनधर्मविशेषश्रवणे अक्षरात्परतः पर इति च सर्वस्मा
द्विकारजातात्परभूतादक्षरादस्मात्परः श्रूयमाणः समष्टिपुरुषः प्रतिपाद्यते एतदुक्तं भवति रूपादिमत्स्थूलरूपाचेतनपृथि
व्यादिभूतान्यदृश्यत्वादिके प्रतिषिध्यमाने पृथिव्यादिसजातीयसूक्ष्मरूपाचेतनमेवोपस्थापयति तच्च प्रधानमेव
तस्मात्परत्वेन च समष्टिपुरुषस्यैव प्रसिद्धं तदधिष्ठितं च प्रधानं महदादिविशेषपर्यन्तं विकारजातं प्रसूत इति तत्र दृष्टान्तमप्युप
न्यस्यते यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति यथा सतः पुरुषात्केशलोमानि तथाक्षरा
त्संभवतीह विश्वमिति अतोऽस्मिन्प्रकरणे प्रधानपुरुषावेव प्रतिपाद्येते इत्येवं प्राप्तेऽभिधीयते अदृश्यत्वादिगुणको
धर्मोक्तेः अदृश्यत्वादिगुणकोऽक्षरात्परतः परश्च परमपुरुष एवोक्तः कुतः धर्मोक्तेः यः सर्वज्ञः सर्ववित् इत्यादिना सर्व
ज्ञत्वादिकास्तस्यैव धर्माः उच्यन्ते नन्वाहि यथा तदक्षरमधिगम्यते इत्यादिना अदृश्यत्वादिगुणकमक्षरमभिधाय तत
थाक्षरात्संभवतीह विश्वमिति तस्माद्विश्वसंभवं चाभिधाय यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूप
मन्नं च जायते इति भूतयोनेरक्षरस्य सर्वज्ञत्वादि प्रतिपाद्यते पश्चादक्षरात्परतः पर इति प्रकृतमदृश्यत्वादिगुणकं भ
तयान्यदक्षरं सर्वमेव परत्वेन व्यपदिश्यते अतोऽक्षरात्परतः पर इत्यक्षरशब्दः प्रधानं प्रकृतमदृश्यत्वादिगुणकम
क्षरं नाभिधत्ते तस्य सर्वज्ञस्य विश्वयोनेः सर्वस्मात्परत्वेन तस्मादक्षरात्परत्वाभिधानादतो भूतयोनिभूतसूक्ष्ममचेतने
इति श्री विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ इतरौ न प्रधानपुरुषौ विशेषणभेदव्यपदेशाभ्यां प्रधानानुवृत्त्या तयोऽन्यदक्षरं व्यावर्त्त

शार्ङ्गे जिज्ञासमानस्यैवाचार्योपसदनं विधाय तदेतत्सर्वं यथा सुदीप्तादित्यादिना सोविद्याग्रन्थिं विकिरतीह सोम्येत्यन्ते
न पूर्वोक्तस्याक्षरस्य भूतयोनेः परस्य ब्रह्मणः परमपुरुषस्यानुक्तैः स्वरूपगुणैः सह सर्वभूतान्तरात्मतया विश्वशरी
रत्वेन विश्वरूपत्वेन स्याहिरण्मयपुष्टिं च विस्पष्टमभिधाय आविः सन्निहितमित्यादिना तस्यैवाक्षरस्याकाशकृता
न्तरतोपि गुहाशरभूतस्य परस्य ब्रह्मणः परमव्योम्नि प्रतिष्ठितस्यानवधिकातिशयानन्दस्वरूपस्य हृदयगुहायां
मुपासनप्रकारमुपासनस्य च भक्तिरूपत्वमुपासीनस्याविद्याविमोकपूर्वकं ब्रह्मणा समं ब्रह्मानुभवफलं चोपदिश्यो
पसंहृतं अत एव विष्णुपुराणे द्रव्यपदेशाज्ज्ञ चास्मिन्प्रकरणे प्रधानपुरुषौ प्रतिपाद्येते भेदव्यपदेशोपि हि नाभ्योपरस्य
ब्रह्मणः ज्ञ विद्यते दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः इत्या
दिभिरक्षराद्व्याकृतात्मनोयः समष्टिपुरुषस्यापि परभूतो रूपत्वादिगुणकोक्षरपादाभिहितः परमात्मेत्यर्थः
दिभिः तदर्शनादिना तर्ती लिवा अहरं तदव्याकृतमपि स्वविकारव्यापकत्वात् महतः परत्वमभिलापयेत्य हरणाभावा
शङ्कातरस्त्वे कथंचिदुपपद्यते श्री रूपोपन्यासाच्च ॥ अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः वायुः
प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मेति हृदयं एष सर्वभूतान्तरात्मनः परमात्मनः एव संभवति अत श्च
परमात्मा श्री वैश्वानरः साधारणशब्दविशेषात् श्री इदमामनन्ति छन्दोगाः आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषितमेव
नो ब्रूहीति प्रक्रम्य यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते इति तत्र संदेहः किमयं वैश्वानरशब्दा
त्मा परमात्मेति शब्दनिर्णयजननेति किं प्राप्तं शब्दनिर्णय इति कुतः वैश्वानरशब्दस्य चतुर्ष्वर्थेषु प्रयोगदर्शनात् जाठरा

ततोऽन्नमभिजायते अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतमिति ब्रह्मणो विश्वोत्पत्तिप्रकार उच्यते तपसा ज्ञाने
न यस्य ज्ञानमयं तप इति वक्ष्यमाणत्वात् चीयते उपचीयते बहु स्यामिति संकल्परूपेण ज्ञानेन ब्रह्म [illegible] भवतीत्यर्थः
ततोऽन्नमभिजायते [illegible] विश्वस्य भोक्तृ [illegible] भोग्यभूतं [illegible] व्याकृतं [illegible] तस्मात् [illegible] जायते इत्यर्थः प्रा
णो मनः प्रभृति च [illegible] फलसाधनभूतकर्मपर्यन्तं सर्वं विकारजातं तस्मादेव जायते यः सर्वज्ञः सर्ववित्
[illegible] उपकरणभूतं साधनं [illegible] सत्यसंकल्पत्वादिकमुक्तं सर्वज्ञत्वसत्यसंकल्पत्वाद्यस्माद्ब्रह्मणो [illegible] कार्याकार
लनामरूपविभक्तं भोक्तृभोग्यरूपं च जायते तदेतत्सत्यमिति परस्य ब्रह्मणो निरुपाधिकसत्त्वमुच्यते मंत्रेषु कर्मा
णि कवयो यान्यपश्यन् तानि त्रेतायां बहुधा संततानि तान्याचरत नियतं सत्यकामा इति सार्वज्ञसत्यसंकल्पत्वादि
कल्याणगुणाकरमदेरपुरुष [illegible] स तानि यत्नं कामयमानास्तत्प्राप्ये फलान्तरेभ्यो विरक्ताः [illegible]
वेषु कविभिर्दृष्टानि वर्णाश्रमोचितानि त्रेतायामग्निषु बहुधा संततानि कर्माण्याचरतेति एष वः पन्थाः [illegible]
षवः पुण्यः सुकृतो ब्रह्मलोकः [illegible] कर्मस्विकतरकर्म [illegible]
तानामपि निष्कामत्वम [illegible] स्थानं [illegible]
पुक [illegible] इति मूढाः जरामृत्युं ते पुनरेवापियन्ति [illegible] फलाभिसंधिपूर्वं [illegible]
[illegible] कर्माचरतां पुनः [illegible] फलाभिसंधिरहितानि नानुष्ठितकर्म [illegible]
[illegible] कर्मफले [illegible] सर्वपापभृतं

वात्मनामात्मभूतं ब्रह्मेति जिज्ञासमानेस्तु ज्ञानमप्यविच्छिन्नः वैश्वानरात्मत्वसकाममागम्य पृच्छमानो वैश्वान
रात्मा परमात्मेति विज्ञायते अत एवात्मशब्देन तदुपक्रम्योपश्चात् सर्वत्रात्म वैश्वानरशब्दाभ्यामवधारणात्त्व
त्र यावत्स्थाने निर्दिश्यमानो वैश्वानरः परं ब्रह्मैवाभिधत्ते इति विज्ञायते किं च सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्म
स्वन्नमत्तीति यच्छ्रोषिकान्तलम् स्तोभ्योतं यद्रूपते वेहास्य सर्वे लोकाः प्रदूयन्त इति वक्ष्यमाणो वैश्वानरात्मवि
ज्ञानफले वैश्वानरात्मानं परं ब्रह्मेति ज्ञापयति स्मृतौ च वैश्वानरः परमात्मा स्मर्यमाणमनुमानं स्या
दिति यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नम इति परम
पुरुषरूपतया प्रसिद्धं तदिह तदेव दर्शितमिति स्मर्यमाणं प्रत्यभिज्ञायमानं वैश्वानरस्य परमपुरुषत्वेऽनुमानलिंगमित्यर्थः
इति शाङ्करभाष्यकारवचनैः इत्थंरूपं प्रत्यभिज्ञायमानं वैश्वानरस्य परमात्मत्वेऽनुमानं स्यात् श्रुतिस्मृतिषु हि परमपु
रुषस्य रूपं प्रसिद्धं यथाऽग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः वायुः प्राणो हृदयं विश्वमस्य
पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मेति अग्निर्मूर्धेति श्रुतेः। स्मरति च द्युनयः धां च मूर्धानं यस्य विप्रा वदन्ति खं वै नाभिश्चन्द्रसूर्यौ
च नेत्रे दिशः श्रोत्रे विद्धि पादौ क्षितिं च सोऽचिन्त्यात्मा सर्वभूतप्रणेतेति यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः
सूर्यश्चक्षुर्दिशः श्रोत्रे तस्मै लोकात्मने नम इति च इह च द्युप्रभृतयो वैश्वानरस्य मूर्धाद्यवयवत्वेनोच्यन्ते तथाहि वैश्वानरो
पमन्यवप्रभृतिभिः षड्भिर्ऋषिभिरात्मानमेवेमं वैश्वानरं संप्रत्यध्येषितमेव नो ब्रूहीति पृष्टः केकयपुत्रोऽश्वपतिर्वैश्वानरात्मान
मुपदिदिक्षुर्विशेषप्रश्नाद्यनुपपत्त्या वैश्वानरात्मन्येतैः किं चिज्ज्ञातं किं विज्ञातमिति विज्ञाय ज्ञातांशा

अग्निरिति द्युलोकः असौ वै लोको श्रुतिः ५

विश्वस्मै भुवनाय वैश्वानरमग्निं प्रदातु केतुम्[illegible]
यं मन्त्रे एव [illegible] कृतवन्तो देवास्त उदयेऽह्न नमवहार[illegible]

वैश्वानरस्याग्नेः [illegible] तु देवस्य सुमतौ शोभनायां बुद्धौ स्याम वयं भवेम तस्या सन्निहिताया सुमतिरस्त्वित्यर्थः
तत्र हेतु राजा हीति यतो भुवनानां राजा सम्भवति किं सुखहेतुसुखरूपो वा आभिमुख्येन श्रीरस्येति सश्रीरित्यर्थः ३

नौतावद् अयमग्निर्वैश्वानरः येनेदं मन्त्रेण पच्यते यदिदमद्यते तस्यैव घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदो-
त्क्रमिष्यन्भवति नैनं घोषं शृणोतीति महाभारते ली ये च विश्वस्मा अग्निं भुवनाय देवाः वैश्वानरं केतुमह्नामकृण्व-
न्निति देवतायां च वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीरिति परमात्मनि तत्सत्वमेव हृदयेऽन्तो वैश्वा-
नरे श्रावणत्वात् तस्यैव च वैश्वानरो विश्वरूपः प्राणोऽग्निरूपदय तदिति [illegible] कापक्रमादिषु चोपलभ्यमानान्यपि
लिङ्गानि सर्वाणि गुणत्वात्तेषु पाक्यानीति प्राप्तेऽभिधीयते वैश्वानरः साधारणशब्दविशेषात् वैश्वानरः पर एवा-
त्मा साधारणशब्दविशेषात् विशेष्यतइति विशेषः साधारणस्य वैश्वानरशब्दस्य परमात्माऽसाधारणो धर्मैः
विशेष्यमाणत्वादित्यर्थः तथाहि योपमन्यवप्रभृतयः समेत्य को न आत्मा किं ब्रह्मेति विचार्य उद्दालको ह वै भग-
वन्तोऽयमारुणिः सम्प्रतीममात्मानं वैश्वानरमध्येति तं हन्ताभ्यागच्छामेति उद्दालकस्य वैश्वानरात्मविज्ञा-
नमवगम्य तमभ्याजग्मुः सचोद्दालक एतान् वैश्वानरस्य नविज्ञानमभिलक्ष्य अहं कृत्स्नं वेदितुमलं
तान् होवाचाश्वपतिर्वै भगवन्तोऽयं कैकेयः सम्प्रतीममात्मानं वैश्वानरमध्येति तं हन्ताभ्यागच्छामेति ते चोद्दालक्षष्ठास्त-
मश्वपतिमभ्याजग्मुः स चैतान् महर्षीन् यथाह न मे स्तेनो जनपदे न कदर्यो न मद्यपो नानाहिताग्निर्नाविद्वान् न स्वैरी स्वैरिणी कुतः इत्यादिना धर्मस्य मार्गेण हे भगवन्तोऽहम-
स्मीति तेन आत्मनो [illegible] लक्ष्य याचित [illegible] स्वात्मा [illegible] विद्यया [illegible] पञ्चमहारणीय तान् विहितकर्म
कर्तव्यतां च प्रज्ञाप्य यावदेकैकस्मा [illegible] निजे [illegible] तावद्दास्यामि वसन्तु भगवन्त इत्युपवोचत् ते च
मुमुक्षवो वैश्वानरात्मानं जिज्ञासमानाः आत्मानमस्मा [illegible] ते ते कोऽनत्तदेवो को न आत्मा किं ब्रह्मेति जी

सर्वदाध्यायति अधिकं जानाति वा ७

तु वै:
यः ५
तु वै में
वयः
तत्रा

श्री.
भा.
८१

विश्वेषां निखिलानां प्राणिनां नरो नेता प्रवर्त्तकः सर्वेश इति यावत् अथवा विश्वे सर्वे नरा यस्मात् स विश्वानरः विश्वश्चासौ नरश्चेति वा नरे संज्ञायामिति सूत्रात् दीर्घः स एव वैश्वानरः प्रज्ञादित्वात्स्वार्थिकोऽण्
अग्नि गताविस्य तोऽङ्गे र्नलोपश्चेति नि प्रत्ययेऽग्निरिति रूपं तन्निरुक्तिश्च अग्रं यत्यग्रं जन्म प्रापयतीति निखिलजन्मप्रद इत्यर्थः ९

वाद्यंतः प्रतिष्ठानाच्च वैश्वानरस्य जाठरत्वमपि प्रतीयते इति नैकांततः परमात्मत्वमिति चेन्न तथाहि स्वरूपदेशात् सर्वात्मस
त्रैलोक्यशरीरस्य परस्य ब्रह्मणो वैश्वानरस्य जाठराग्निशरीरतया तद्विशिष्टस्योपासनोपदेशात् अग्निशब्दादिभिर्हि न
केवलो जाठरः प्रतिपाद्यते अपि तु जाठराग्निविशिष्टः परमात्मा कथमिदमवगम्यत इति चेदसंभवाज्जाठरस्य केवल
स्य त्रैलोक्यशरीरत्वासंभवात् त्रैलोक्यशरीरतया प्रतिपन्नवैश्वानरसमानाधिकरणो जाठरविशिष्टतया प्रतीयमानो
ग्निशब्दो जाठरशरीरतया तद्विशिष्टं परमात्मानमेवाभिदधातीत्यर्थः यथोक्तं भगवता अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः प्रा
णापानसमायुक्तः पचाम्यन्नं चतुर्विधमिति जाठरानलशरीरो भूत्वेत्यर्थः अतस्तद्विशिष्टस्योपासनमत्रोपदिश्यते किं च पुरुष
मपि चैनं समधीयते वाजसनेयिनः स एषोऽग्निर्वैश्वानरो यत्पुरुष इति नहि जाठरस्य केवलस्य पुरुषत्वं परमात्मन एव
निरुपाधिकपुरुषत्वं यथा सहस्रशीर्षा पुरुषः पुरुष एवेदं सर्वमित्यादेः श्रीः अत एव न देवता भूतं च श्रीः उक्तेभ्य एव हेतुभ्यो
देवतायाश्चात्र तृतीयस्य महाभूतस्यापि न वैश्वानरत्वप्रसंगः श्रीः साक्षादप्यविरोधं जैमिनिः ॥ वैश्वानरसमानाधिकरणस्या
ग्निशब्दस्य जाठराग्निशरीरतया तद्विशिष्टस्य परमात्मनो वाचकत्वे तथैव च परमात्मन उपास्यत्वे चोक्ते जैमिनिस्त्वाचा
र्यो वैश्वानरशब्दवदग्निशब्दस्यापि परमात्मन एव साक्षादनवधानेन वाचकत्वे न कश्चिद्विरोध इति मन्यते एतदुक्तं भवति
यथा वैश्वानरशब्दः साधारणोऽपि परमात्मासाधारणधर्मविशेषितोऽपि विश्वेषां नराणां नेतृत्वादिना गुणेन परमात्मानमेवा
भिदधातीति निश्चीयते एवमग्निशब्दोऽपि अग्रनयनादिना येनैव गुणेन योगाज्ज्वलने प्रवर्त्तते तस्यैव गुणस्य निरुपाधि
कस्य काष्ठागतस्य परमात्मनि संभवादस्मिन् प्रकरणे परमात्मासाधारणधर्मविशेषितः परमात्मानमेवाभिधत्त इति यस्त्वेकमेवं

तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मा संदेहो बहुलो वस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीय इत्यादिः
नानावर्त्मगमनात् पृथग्वर्त्मा वायुः एवं नानागतित्वगुणकस्त
सुतेजस्त्वगुणा द्यौस्तस्य वैश्वानरस्य मूर्द्धा भवति विश्वरूपत्वगुणकः सूर्यस्तस्य चक्षुः विश्वरूपत्वं विविधरूपत्वं शुक्लनीलत्वमेव इत्यादिश्रुतेः ... उर एव वेदिरित्यादि बर्हिः कुशाः ४
स्य प्राणः बहुलत्वगुणकः आकाशस्तस्य संदेहो मध्यकायः रयिर्धनं तद्धेतुका आपस्तस्य वस्तिर्नाभेरधःस्थानं पृथिवी तस्य पादौ भवतः तस्य होमाधारत्वसिद्धये

तान्प्रावभुक्षयांतानेकैकं पप्रच्छ औपमन्यवं कं त्वमात्मानमुपास्से इति प्र[illegible] दिवमेव भगवो राजन्निति तेन चोक्ते दिवि तस्य [illegible]
वैश्वानरात्मबुद्धिं निवर्त्तयन् वैश्वानरस्य द्यौर्मूर्द्धेत्युपदिशन् तस्या वैश्वानरांगभूताया: दिव: सुतेजा इति गुणनाम
धेयं प्राचिख्यपत् एवं सत्ययज्ञादिभिरादित्यवाय्वाकाशापः पृथिवीनामेकैकेनैकैकमुपास्यमानं तया कथितानां
विश्वरूपः पृथग्वर्त्मा [illegible] बहुलो रयिः प्रतिष्ठेत्येकैकगुणानां मध्ये यानि वैश्वानरात्मनश्चक्षुः प्राणः संदेहो वस्ति
पादावयवत्वेनोपदिष्टः संदेहो मध्यकायः [illegible] अत एवंभूतस्य मूर्द्धत्वादिविशिष्टं परमपुरुषस्यैव रूपमिति
वैश्वानरात्मा परमपुरुष एव पुनरुत्पन्निर्णयमापाद्य [illegible]पहरति ॥श्री॥ शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न त
थादृष्ट्युपदेशादसम्भवात्पुरुषमपि चैनमधीयते ॥श्री॥ यदुक्तं वैश्वानरः परमात्मेति निश्चीयत इति तन्न शब्दा
दिभ्योऽन्तःप्रतिष्ठानाच्च जाठरस्याग्नेरिह प्रतीयमानत्वात् [illegible] वाजसनेयिनां वैश्वानरविद्याप्रकरणे स एषोऽग्निर्वै
श्वानर इति वैश्वानरशब्दसामानाधिकरण्येनाग्निरिति श्रूयते अस्मिन्प्रकरणे च हृदयं गार्हपत्यो मनोऽन्वाहा
र्यपचन आस्यमाहवनीयमिति वैश्वानरस्य हृदयादिस्थानस्याग्नित्रयपरिकल्पनं क्रियते तथा च तद्भक्तं प्रथममाग
च्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेत्यादिना प्राणाद्याहुत्याधारत्वं च वैश्वानर
स्यावगम्यते तथा वैश्वानरस्याग्निरूपस्य अन्तःप्रतिष्ठानं वाजसनेयिनः समामनन्ति स यो हैतमेवमग्निं वैश्वान
रं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेति [illegible] अग्नित्रेतापरिकल्पनात्प्राणाहुत्याधारभा

न्नपोह्य भस्मनि जुहुयात्तादृक्तत्स्यात् अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भव
ति तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त इति श्री आमनन्ति चैनमस्मिन् श्री एनं परमपुरुषं द्यु
मूर्धत्वादिविशिष्टं वैश्वानरमस्मिन्नुपासकशरीरे प्राणाहुत्याधारत्वेनामनन्ति च तस्य ह वा एतस्यात्मनो वैश्वानर
स्य मूर्धैव सुतेजा इत्यादिना अयमर्थः यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त इति त्रैलोक्यशरीरस्य
परमात्मनो वैश्वानरस्योपासनं विधाय सर्वेषु लोकेष्वित्यादिना ब्रह्मप्राप्तिं च फलमुपदिश्यास्यैवोपासनस्याङ्गभूतं प्रा
णाग्निहोत्रं तस्य ह वा एतस्येत्यादिनोपदिशति यः एवमुपास्त इत्युपदिष्टो वैश्वानरस्तस्यैवावयवभूतानवाप्यादि
त्यादीन् सुतेजो विश्वरूपादिनामधेयानुपासकशरीरमूर्धादिषु पादान्तेषु संपादयतीति मूर्धैव सुतेजा उपासकस्य मूर्धैव परमा
त्मनो मूर्धभूतो द्युलोक इत्यर्थः चक्षुर्विश्वरूपमित्यादिष्वप्ययमर्थः प्राणः पृथग्वर्त्मा वायुरित्यर्थः सन्देहो बहुलः उपासकस्य
मध्यकाय एव परमात्मनो मध्यकायभूत आकाश इत्यर्थः बस्तिरेव रयिः अस्य बस्तिरेव तदवयवभूता आप इत्यर्थः पृथिव्येव पादाव
स्य पादावेव तत्पादभूता पृथिवीत्यर्थः एवमुपासकः स्वशरीरे परमात्मानं त्रैलोक्यशरीरं वैश्वानरं सन्निहितमनुसन्धाय स्वकी
यासुरोलोमहृदयमनआस्यानि प्राणाहुत्याधारस्य परमात्मनो वैश्वानरस्य वेदिबर्हिर्गार्हपत्यान्वाहार्यपचनाहवनीयानग्निहो
त्रोपकरणभूतान् परिकल्प्य प्राणाहुतेरग्निहोत्रत्वं परिकल्प्य एवंविधेन प्राणाग्निहोत्रेण परमात्मानं वैश्वानरमाराधयेदि
त्युर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्य इत्यादिनोपदिश्यते अतः परमात्मा पुरुषोत्तम एव वैश्वानर इति सिद्धं इति श्रीभगवद्रामा
नुजाचार्यविरचिते शारीरकमीमांसाभाष्ये प्रथमस्याध्यायस्य द्वितीयपादः श्री कृष्ण[illegible] वाद्यापन्नेन स्वेशाकावत् आयवीति

प्रादेशमात्रमभिविमानमित्यपरिच्छिन्नस्य परस्य ब्रह्मणो द्युप्रभृतिपृथिव्यन्तप्रदेशसंबंधिन्यामात्रयापरिच्छिन्नत्वं
च कथमुपपद्यते तत्राह श्री अभिव्यक्तेरित्याश्मरथ्यः श्री उपासकाभिव्यक्त्यर्थं प्रादेशमात्रत्वं परमात्मन इत्याश्म
रथ्याख्या आचार्या मन्यन्ते द्यौर्मूर्धा आदित्यश्चक्षुर्वायुः प्राण आकाशो मध्यकाय आपो वस्तिः पृथिवी पादाविति द्यु
प्रभृति प्रदेशसंबंधिन्या मात्रया परिच्छिन्नत्वं कृत्स्नमभिव्याप्य वर्तमानस्याप्यभिव्यक्तेरेव हेतोर्भवति मूर्धप्र
भृत्यवयवविशेषैः पुरुषधर्म्मविधत्वं परस्य ब्रह्मणः किमर्थमिति चेत्तत्राह श्री अनुस्मृतेर्बादरिः ॥ तथोपासना
र्थमिति बादरिराचार्यो मन्यते यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वा
त्मस्वन्नमत्तीति ब्रह्मप्राप्तये ह्युपासनमुपदिश्यते एतमेवमित्युक्तप्रकारेण पुरुषाकारमित्यर्थः सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वे
ष्वात्मसु वर्त्तमानं यदन्नं भोग्यं तदखिलं सर्वत्र वर्त्तमानं स्वात्मत्वेनानवधिकातिशयानन्दं ब्रह्मानुभवति यत्तु सर्वैः कर्मवश्यैरा
त्मभिः प्रत्येकमन्नस्य साधारणमन्नं भुज्यते तन्मुमुक्षुभिस्त्याज्यत्वादिह न गृह्यते यदि परमात्मा वैश्वानरः कथं तर्हि उरःप्र
भृतीनां वेद्यादित्वोपदेशः यावत्प्रत्यग्निपरिग्रह एव नह्युपपद्यते इत्यत्राह ॥ श्री संपत्तेरिति जैमिनिस्तथा हि द
र्शयति श्री अस्य परमात्मन एव वैश्वानरस्य द्युप्रभृति पृथिव्यन्तः शरीरस्य समाराधनभूता या उपासकैरहरहः क्रि
यमाणाः प्राणाहुतेरग्निहोत्रत्वसंपादनाय उरःप्रभृतीनां वेद्यादित्वोपदेश इति जैमिनिराचार्यो मन्यते तथा
हि परमात्मोपासनोचितमेव फलं प्राणाहुत्याः अग्निहोत्रसंपत्तिं च दर्शयति श्रुतिः स य इदमविद्वानग्निहोत्रं जुहोति यथाङ्गारा

यते तस्य धीराः परिजानंति योनिमिति देवादीनां समाश्रयणीयत्वाय तत्तज्जातीयरूपसंस्थानगुणकर्मसमन्वितं स्वकीयं स्वभाव मजहदेव स्वेच्छया बहुधा विजायते परमपुरुष इत्यभिधानात् स्मृतिरपि अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्प्रकृ तिं स्वामधिष्ठाय संभवाम्यात्ममाययेति मनःप्रभृतिजीवोपकरणाधारत्वं च सर्वाधारस्य परस्यैवोपपद्यते इति अयं परमपुरुषः श्री मुक्तोपसृप्यव्यपदेशाच्च ॥ अयं द्युभ्वाद्यायतनं पुरुषः संसारबंधमुक्तैरपि प्राप्य तया व्यपदिश्यते यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं तदा विद्वान्पुण्यपापे विधूय निरंजनः परमं साम्यमुपैति यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमु क्तः परात्परं पुरुषमुपैति दिव्यमिति संसारबंधाद्विमुक्ता एव हि विधूतपुण्यपापा निरंजनाः नामरूपाभ्यां विमुक्ताः पुण्य पापनिबंधनाचित्संसर्गप्रयुक्तो नामरूपभाक्त्वमेव हि संसारः अतो विधूतपुण्यपापैर्निरंजनैः प्रकृतिसंसर्गरहि तैः परेण ब्रह्मणा परमसाम्यमापन्नैः प्राप्यतया निर्दिष्टो द्युभ्वाद्यायतनभूतः पुरुषः परं ब्रह्मैव एवं परं ब्रह्मासाधारणधर्मादिभिः परमेव ब्रह्मेति प्रसाध्य प्रत्यगात्मासाधारणधर्माभावाच्चापि परमेव सा हे ॥ श्री नानुमा नमतच्छब्दात् प्राणभृच्च ॥ यथास्मिन्प्रकरणे प्रधानप्रतिपादकशब्दाभावात्प्रधानं न प्रतिपाद्यं एवं प्राणभृद पीत्यर्थः अनुमीयते इत्यनुमानं परोक्तं प्रधानमनुमानं इति वा प्रधानमनुमानप्रतिपादितत्वादनुमानमिति वा अतच्छब्दात्तद चिशब्दाभावादित्यर्थः अर्थाभावेऽव्ययमित्यव्ययीभावः ॥ तथाह्यायेन प्रत्यगात्मा श्री भेदव्यपदेशात् ॥ समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इत्यादिभिः ॥

भूतः

२ एवं

कास्वधीयते यस्मिन् द्यौः पृथिवी चान्तरीक्षमोतं मनः सह प्राणैश्च सर्वैस्तमेवैकं जानथ आत्मानमन्या वाचो वि-
मुञ्चथ अमृतस्यैष सेतुरिति तत्र संशयः किमयं द्युपृथिव्यादीनामायतनत्वेन श्रूयमाणो जीव उत परमात्मेति
किं युक्तं जीव इति कुतः अरा इव नाभौ संहता यत्र नाड्यः स एषोऽन्तश्चरते बहुधा जायमान इति परस्मिन् श्लोके पूर्ववाक्य-
प्रस्तुतं द्युपृथिव्याद्यायतनं यत्तेति पुनरपि सम्बन्धेन परामृश्य तस्य नाड्याधारत्वमुक्त्वा पुनरपि स एषोऽन्तश्चरते ब-
हुधा जायमान इति तस्य बहुधा जायमानत्वं चोच्यते नाडीसंबन्धो देवादिरूपेण बहुधा जायमानत्वं च जीवस्यैव धर्मः
अस्मिन्नपि श्लोके ओतं मनः सह प्राणैश्च सर्वैरिति प्राणपञ्चकस्य मनसश्चाश्रयत्वमुच्यमानं जीवधर्म एव एवं जीव-
त्वे लिङ्गे सति द्युपृथिव्याद्यायतनत्वादिकं यथाकथंचित्संगमनीयमिति एवं प्राप्ते प्रचक्ष्महे द्युभ्वाद्यायतनं स्व-
शब्दात् द्युपृथिव्यादीनामायतनं परं ब्रह्म कुतः स्वशब्दात् परब्रह्मासाधारणशब्दात् अमृतस्यैष सेतुरिति हि पर-
स्य ब्रह्मणोऽसाधारणः शब्दः तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यत इति सर्वेषूपनिषत्सु स एवामृत-
त्वप्राप्तिहेतुः श्रूयते सिनोतेर्बन्धनार्थत्वात् सेतुरमृतस्य प्रापकः स उच्यते सेतुरिव वा सेतुः नद्यादिप्रवाहे सेतुर्हि कूलस्य प्राप्ति-
लम्भकः संसारार्णवपारभूतस्यामृतस्यैष प्राप्तिलम्भक इत्यर्थः आत्मशब्दश्च निरुपाधिकः परे ब्रह्मणि मुख्यवृत्तः आप्नो-
तीति ह्यात्मा ह्येतरस्य स्वरूपनिर्देशत्वेन व्याप्तिः स्वस्यैव संभवति शृणु तः सो वित्तस्यैव मुख्यः यः सर्वज्ञः सर्वविदित्यादयश्चोप-
रितनाः परस्यैव ब्रह्मणः प्रादाः नाड्याधारत्वमस्याप्युपपद्यते नित्यमनः शिरा ज्ञानक्षिप्तं वृत्त्यावेपाक्षन्निभमिस्या रभ्यतस्याः स्थि-
रचायाः मध्ये परमात्मावस्थितोऽभिवचनात् बहुधा जायमानः अपि परस्मिन् ब्रह्मणि संगच्छते अजायमानो बहुधा विजा-

सनत्कुमारं प्रति

ति कुतः अत एव मे भगवद्दृशेभ्यः श्रुतं तरति शोकमात्मविदिति आत्मजिज्ञासयोपसन्नाय नारदाय नामादिप्राणपर्यन्तेषूपास्य त्वेनोपदिष्टेष्वस्ति च भगवो नाम्नो भूयोऽस्ति भगवो वाचो भूय इत्यादयः प्रश्नाः वाग्वाव नाम्नो भूयसी मनो वाव वाचो भूय इत्यादीनि च प्रतिवचनानि प्राणात्प्राचीनेषु दृष्टानि प्राणे तु न पश्यामः अतः प्राणपर्यन्त एवात्मा अस्मात्ज्ञेय इति प्रतीयते तेनेह प्राणशब्दनिर्दिष्टः प्राणसहचारी प्रत्यगात्मैव न वायुविकारमात्रं च प्राणो ह पिता प्राणो माता इत्यादयश्च प्राणस्यैव तत्तन्नामवत्त्वमयं तिपितृहा मातृहेत्यादिना सप्राणेषु पितृप्रभृतिषूपमर्दकारित्वे हि सकृत्वनिमित्तोपक्रोशवचनात् तेष्वेव विगतप्राणेषु शूलेनोपमर्दकारिण्यप्युपक्रोशाभाववचनाद्धि हिंसायोग्यत्वेनैव प्राणशब्दनिर्दिष्टः अप्राणेषु स्थावरेष्वपि चेतनेषूपमर्दभावाभावयोर्हि हिंसात्वदभावदर्शनाद्यं हिंसायोग्यतया निर्दिष्टः प्राणः प्रत्यगात्मैवेति निश्चीयते अत एव चाऽरनाभिदृष्टान्तोपन्यासेन प्राणशब्दनिर्दिष्टः पर इति नष्टमितं परस्य हिंसाप्रसङ्गाभावात् जीवादितरस्य तद्भोग्यभोगोपकरणभूतस्य तस्याचिद्वस्तुनो जीवायत्तस्थितित्वेन प्रत्यगात्मैवैवारनाभिदृष्टान्तोपपत्तेश्चात्मैव प्राणशब्दनिर्दिष्टो भूमास्ति भगवः प्राणाद्भूय इति प्रश्नस्य प्राणो वाव प्राणाद्भूय इति प्रतिवचनस्याभावात् भूमसंज्ञो न नामादिप्राणप्रकरणस्याविच्छेदात् प्राणवेदिनोऽतिवादित्वमुक्त्वा तमेवैष तु वा अतिवदतीति प्रत्यभिज्ञाप्य यः सत्येनातिवदतीति तस्य सत्यवदने प्राणोपासनाङ्गतयोपदिष्टस्योपादेयस्य सत्यवदनस्योपायतया पूर्वं निर्दिष्टप्राणयाथात्म्यविज्ञाने यदा वै विजानाति अथ सत्यं वदतीत्युपदिष्टत्वात्तद्विमर्शस्य मनन श्रद्धानिष्ठाप्रयत्नानुपदिष्टत्वात् तदङ्गभावाच्च प्राणशब्दनिर्दिष्टप्रसङ्गात् तस्य रूपस्वरूपतानन्तगुणतामतामादिष्टस्य तस्य चेतसुखस्य विपुलताभूमात्वेन विजिज्ञासितव्य इत्युपदिष्टत्वात् एव प्रत्यगात्मन एवायं विद्या विद्युक्ते

जीवादिलक्षणत्वेनायं व्यपदिश्यते अनीशया भोग्यभूतया प्रकृत्या मुह्यमानः शोचति जीवः । अयं यदा स्वस्मादन्यं सर्वस्ये
शं प्रियमाणमस्येश्वरस्य महिमानं निखिलजगन्नियमनरूपं पश्यति तदा वीतशोको भवति ॥ प्रकरणात् अत्र प्रकरणं चेदं
परस्यैव ब्रह्मणः । इत्याद्युपपत्तो दिव्युभ्वाद्यायतनत्वादिधर्म्माणां केवलत्वेनैव प्रतिपादिते नाडीसंबंधाद्बहुधा जायमानत्व मनःप्राणाधारत्वश्च
पर प्रकरणविच्छेदशंकामात्रमत्र पर्यहारि श्रीस्थित्यदनाभ्यां च । द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति इत्येकस्य कर्मफलादनमन्यस्य कर्मफलमनश्नत एव
दीप्यमानतया शरीरावस्थितिमात्रं प्रतिपाद्यते तत्र कर्मफलमनश्नन् दीप्यमान एव सर्वज्ञोऽमन्तेनुस
वीत्वात् द्युभ्वाद्यायतनं भवितुमर्हति न पुनः कर्मफलमदन् शोचन् प्रत्यगात्मा । अतो द्युभ्वाद्यायतनं परमात्मेति
सिद्धं ॥ भूमा संप्रसादादध्युपदेशात् ॥ श्री इदमाम्नायते छांदोग्ये यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति
जा स भूमा । अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पमिति तत्रायं भूमशब्दो भावप्रत्ययान्तो व्युत्पाद्यते तथा हि पृथ्वा
दिषु बहुलादेः पठ्यते ततः पृथ्वादिभ्य इमनिच् प्रत्यये कृते बहोर्लोपो भू च बहोरिति प्रकृतिप्रत्यययोर्विकारे भूमेति भव
ति भूमा बहुत्वमित्यर्थः । अत्रापि बहुशब्दो वैपुल्यवाची न संख्यावाची यत्रान्यत्पश्यति तदल्पमिति अल्पप्रतियोगि
त्वश्रवणात् अल्पशब्दनिर्दिष्टधर्मिप्रतियोगिप्रतिपादनपरत्वादेव धर्मिपरश्चेति निश्चीयते न धर्ममात्रपरः
तदेवं भूमेति विपुलमित्यर्थः । तेष्वल्पविषयोपपन्नेष्वाहतमेतत्सकाशात् तरति शोकमात्मविदिति प्रक्रम्य भूमविज्ञानमुपदि
श्यत्रात्मैवेदं सर्वमिति तस्यैवोपसंहारात् अन्यत्र ... भूमा श्रुतोविशिष्टः प्रत्यगात्मा उत परमात्मेति किं प्राप्तं प्रत्यगात्मे

नामवाक्मनःसंकल्पचित्तध्यानविज्ञानबलान्नापस्तेजआकाशस्मराशाप्राणाः पंचदशार्थाः ३

स्य प्राणस्य सत्येन ज्ञानं मननं तु ब्रह्मणे स्मादि द्युपास्य ब्रह्मणो प्रश्नः अतस्तन्निष्ठस्यातिवादिनः पूर्वस्मादधिकत्वं से भवतीति वा
क्यस्य रस्यासिद्धमनस्य त्वेन वाद्धि तकं अतिवादित्वे हि वस्तुत्वेन रास्य पुरुषार्थतयातिक्रान्तस्योपास्य वस्तुनो वादित्वं नामाद्या
प्राणपर्यन्तोपास्यवस्त्वतिक्रान्तस्योपास्य प्राणशब्दनिर्दिष्टप्रत्यगात्मवादित्वात् प्राणविदेति वादित्वे तस्यापि स्मातिशायपु
रुषार्थत्वान्निरतिशयपुरुषार्थतयोपास्य परब्रह्मवादिन एव साक्षादतिवादित्वमित्येष तु वा अतिवदति यः सत्येनाति
वदतीत्युक्तं सत्येनेतीत्थंभूतलक्षणे तृतीया सत्येन परेण ब्रह्मणोपास्येनोपलक्षितो योऽतिवदतीत्यर्थः अत एवैवं प्रोष्टः
पार्थयते सोऽहं भगवः सत्येनातिवदानीति आचार्यश्च सत्यं त्वेव विजिज्ञासितव्यमित्याह आत्मनः प्राण इति च प्राण
प्राणशब्दनिर्दिष्टस्यात्मनः उत्पत्तिरुच्यते अतस्तरति शोकमात्मविदिति प्रश्नोत्तरात्मा प्राणशब्दनिर्दिष्टादन्य इति गम्यते ॥
एवं सति भगवः प्राणाद्भूय इति प्रश्नस्यादेव प्राणाद्भूय इति प्रतिवचनं स्यादतो नारदस्य कृतात्मोपदेशाः प्राणो
पदेशपर्यन्तं वसानो गम्यत इति तदयुक्तं नहि प्रश्नप्रतिवचनाभ्यामेवार्थनिर्णये गम्यते प्रमाणान्तरेणापि तत्संभवात् उक्तं च प्र
माणान्तरमस्ति भगवः प्राणाद्भूय इत्यप्रश्नतोषमभिप्रायः नामाद्या प्राणपर्यन्तेषु चेतनेषु पुरुषार्थभूयस्तया पूर्वपूर्व
मतिक्रान्तेषूत्तरोत्तरेषूपदिष्टेषु तत्तद्वेदिनश्चाचार्येणातिवादित्वेनोक्ते प्राणशब्दनिर्दिष्टप्रत्यगात्मयाथात्म्यवेदिनस्तु पु
रुषार्थभूयस्त्वातिशयं मन्वानेन स एष एव परमपुरुषार्थ इत्यतोऽभिमन्यमानस्य विज्ञानान्तिवादी भवतीति प्रतिक्रान्तवक्तृवादित्वमुक्तं अतो
ऽत्रैवात्मोपदेशः समाप्त इति मत्वा शिष्यो भूयो न पप्रच्छ आचार्यस्त्वेवमपि सातिशयं मत्वा निरतिशयपुरुषार्थभूतं सत्यशब्दा
भिधेयं परं ब्रह्म एष तु वा अतिवदति यः सत्येनातिवदतीति स्वयमेवोपदिदेश शिष्योऽपि परमपुरुषार्थरूपं परं ब्रह्मोपदेष्टुं तस्य

प्रत्यगात्मा एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इत्युपनिषत्प्रसिद्धेः संप्रसादात् त्रुटिः ४

त्यगात्मन्यहमेवाधस्तादहमुपरिष्टादित्यारभ्य अहमेवेदं सर्वमिति प्रत्यगात्मनो वैभवमुपदिश्य तिरस्क्रि

त्यं विपुलसुखमित्युपदिष्टमिति तत्र तिरस्कारो भूमात्मविदित्युपक्रमाविरोधश्चातो भूमगुणविशिष्टं प्रत्यगात्मा यत एवं भूमगुणविशिष्टः प्रत्यगात्मा अत एवाहमर्थे प्रत्यगात्मत्वे निश्चिते सति तदनुगुणतया वाक्यशेषः नेतव्य इत्येवं प्राप्तेऽभिधीयते भूमा संप्रसादादध्युपदेशात् ॥ भूमगुणविशिष्टो न प्रत्यगात्मा अपि तु परमात्मा कुतः संप्रसादादध्युपदेशात् संप्रसादः प्रत्यगात्मनोऽधिकतया भूमगुणविशिष्टस्य सत्यशब्दाभिधेयस्योपदेशादित्यर्थः सत्यशब्दाभिधेयं परं ब्रह्म एतदुक्तं भवति यथा नामादिषु प्राणपर्यन्तेषु पूर्वपूर्वाधिकतयोत्तरोत्तराभिधानात् पूर्वस्मादुत्तरोत्तरस्य सामर्थ्यात् तत्त्वे एवं प्राणशब्दनिर्दिष्टात् प्रत्यगात्मनोऽधिकतया निर्दिष्टः सत्यशब्दाभिधेयस्तस्मादर्थान्तरम् भूमा एव ततः सत्यशब्दनिर्दिष्ट एव भूमेति सत्यस्यैव परं ब्रह्मत्वेन भूमत्वमुपदिश्यत इति तदाह एष तु वा अतिवदति यः सत्येनातिवदतीति सत्यातिवादित्वे नातिवादिने नुप्राकृन्नपूर्वस्मादिति वादिनो व्यावर्तयति अत एवमेव तु वा अतिवदतीत्यत्र प्राणातिवादिनोऽनन्यपि तत्र तु सत्यातिवादित्वमिति तत्त्व संपूर्वातिवादित्वेनाभिन्नात्प्राणादधिकमिति विज्ञायते ननु च प्राणवेदिन एव सत्यवदनमङ्गत्वेनोपदिश्यते अनः प्राणप्रकरणाविच्छेद इत्युक्तं नेत्युच्यते शब्दान्तरात्प्रत्येवान्यः प्रतीयते नन्वस्यैवातिवादिनः सत्यवदनाङ्गविशिष्टतामात्रमेव तु वाग्निहोत्रीयः सत्यं वदतीत्यादिष्वग्निहोत्रनराभिमतेनः प्रतीतस्यैवाग्निहोत्रिणः सत्यवदनाङ्गविधानमिति तद्वाग्निहोत्रीयत्वे अत एव नात्र तत्त्वेनोक्तं सत्यशब्दाभिधेयं परं ब्रह्म प्रतीयते स

णोऽन्यत्पश्यतीत्यस्मिन्सुखत्वेन च जगदनुभवस्य कर्मनिमित्तत्वात्कर्मरूपाविद्यानिर्मुक्तस्य तस्य तदेव जगद्विभूतिगुण
विशिष्टब्रह्मानुभवान्तर्गतत्वं सुखमेव भवति यथा पित्तोपहतेन पीयमानं पयः पित्तनाशे तस्मिन्नाल्पसुखं ... परीतं च
भवति तदेव पयः पित्तानुपहतस्य सुखायैव भवति यथा च राजपुत्रस्य पितुर्लीलोपकरणं अतत्त्वात्वेनानुसंधी यमा
नं प्रियत्वमनुपगतं तथात्वेनानुसंधीयमानत्वे प्रियतमं भवति तथा निरवधिकातिशयानन्दरूपस्य ब्रह्मणोऽनव
कधिकातिशयासंख्येयकल्याणगुणाकरस्य लीलोपकरणं तदात्मकत्वेनानुसंधीयमानं जगन्निरतिशयप्रीतये
भवत्येव अतो जगदैश्वर्यविशिष्टमनवधिकातिशयसुखरूपं ब्रह्मानुभवंस्ततोऽन्यत्किमपि न पश्यतीत्येत
देवोपपादयति वाक्यशेषः स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आ
त्मानन्दः स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोकाः भ
वन्ति तेषां सर्वेषु लोकेष्वकामचारो भवतीति स्वराडकर्मवश्यः अन्यराजानः कर्मवश्याः तथा न पश्यो मृत्युं पश्य
ति न रोगं नोत दुःखतां सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः इति निरतिशयसुखरूपत्वेन च ब्रह्मण आनन्दमयो
ऽभ्यासादित्यत्र प्रपञ्चितं अतः प्राणशब्दनिर्दिष्टात्प्रत्यगात्मनोऽर्थान्तरभूतस्य सत्यपूर्वाभिधेयस्य ब्रह्मणो भूमे
त्युपदेशाद् भूमा परं ब्रह्म ॥ श्री धर्मोपपत्तेश्च ॥ अस्य भूम्नो ये धर्मा आम्नायन्ते तेऽपि परमात्मन्येवोपपद्यन्ते एतदमृतमि
ति स्वाभाविकममृतत्वं स्वे महिम्नीत्यनन्याधारत्वं स एवाधस्तादित्यादिना स एवेदं सर्वमिति सर्वात्मत्वमात्मनः प्राण

७५ ना५ मुच्च

रूपं तदुपास्स्वेत्याख्यात्मतत्त्वबुभुत्सया सोऽहं भगवः सत्येनातिवदानीति प्रार्थयामास ततो ब्रह्मसाक्षात्कारनिमित्तानि गादि
त्वेति ह्येव ब्रह्मसाक्षात्कारोपायभूतं ब्रह्मोपासनं सत्यं त्वेव विजिज्ञासितव्यमित्युपदिश्य तदुपायभूतं ब्रह्ममननं मतिस्त्वेव
विजिज्ञासितव्येत्युपदिश्य श्रवणप्रतिष्ठार्थत्वान्मननस्य मननं नोपदेशो न श्रवणमप्यर्थसिद्धं मत्वा श्रवणो
पायभूतां श्रद्धां श्रद्धा त्वेव विजिज्ञासितव्येत्युपदिश्य तदुपायभूतां तन्निष्ठां निष्ठा त्वेव विजिज्ञासितव्येत्युपदिश्य
तदुपायभूतां तद्योगरूपप्रयत्नभूतां कृतिमपि कृतिस्त्वेव विजिज्ञासितव्येत्युपदिश्य श्रवणाद्युपक्रमस्य सुखं कृतिसि
द्धेप्राप्यभूतस्य सत्यपदाभिहितस्य ब्रह्मणः सुखरूपतां ज्ञापयितुं सुखं त्वेव विजिज्ञासितव्यमित्युपदिश्य निरतिशयविपु
लमेव सुखं परमपुरुषार्थरूपं भवतीति तस्यैव ब्रह्मणः सुखरूपस्य निरतिशयविपुलतां ज्ञापयितुं भूमा त्वेव जिज्ञासितव्य
इत्युपदिश्य निरतिशयविपुलसुखरूपस्य ब्रह्मणो लक्षणमाह यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजाना
ति स भूमेति अयमर्थः यत्र यस्मिन्नवधिकातिशयसुखरूपे ब्रह्मण्यनुभूयमाने ततोऽन्यत्किमपि न पश्यत्ययमनुभविता ब्रह्म
स्वरूपतद्विभूत्यन्तर्गततया तद्व्यतिरिक्तस्य वस्तुजातस्य ब्रह्मणैश्वर्यपर्यायविभूतिगुणविशिष्टं निरतिशयसुखरूपं
ब्रह्मानुभवंस्तद्व्यतिरिक्तस्य वस्तुनोऽभावादेवान्यत्किमपि न पश्यति अनुभाव्यस्य सर्वस्य सुखरूपत्वादेव दुःखं च न पश्य
ति तदेव हि सुखं यदनुभूयमानं पुरुषानुकूलं भवति न तु दुःखमेव जगद्ब्रह्मणोऽन्यदनुभूयमानं सुखरूपं यद्यपि न सुखरूपं
च भवत्यपि ब्रह्मविभूतित्वेन तदात्मकतयानुभूयमानं कृत्स्नं जगत्तन्न कर्मानुरूपं दुःखं च परिमितसुखं च भवति एतो ब्रह्म

सुखरूपमेव भवति ... नानुभूयमानं ... अ० ७

रभूतं प्रमाणान्तरप्रसिद्धं प्रधानमिति प्रतीयते। अतोऽक्षरं प्रधानमिति प्राप्त उच्यते ॥ अक्षरमम्बरान्तधृतेः ॥ अक्षरं
परं ब्रह्म कुतः अम्बरान्तधृतेः अम्बरस्याकाशस्यान्तः पारभूतमव्याकृतमम्बरान्तस्तस्य धृतेः तदाधारतया
स्यादक्षरस्योपदेशादिति यावत् प्रथमप्रश्नः कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेत्यत्राकाशशब्दनिर्दिष्टं न वायुम
म्बरं अपितु पारभूतमव्याकृतमन्तस्तस्याप्याधारत्वेनोच्यमानमक्षरं नाव्यक्तं भवितुमर्हति
इति नन्वाकाशशब्दनिर्दिष्टो न वायुमात्रमिति कथमवगम्यते उच्यते यदूर्ध्वं गार्गि दिवो यदवाक् पृथिव्या यदन्तरा
द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते आकाश एव तदोतं च प्रोतं चेत्युक्ते त्रैकाल्यवर्तिनो विकारजा
तस्याधारतया निर्दिष्ट आकाशो न वायुमदाकाशो भवितुमर्हति तस्यापि विकारान्तर्गतत्वात् अतोऽत्राकाशशब्दनिर्दिष्टं
भूतसूक्ष्ममिति प्रतीयते तत्तस्यापि भूतसूक्ष्मस्याधारभूतं किमित्यपेक्षिते कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति
अन्तस्तदाधारतया निर्दिश्यमानमक्षरं न प्रधानं भवितुमर्हतीति यत्तु श्रुतिप्रसिद्धं प्रमाणान्तरप्रसिद्धं प्रधानं प्रतीय
ते इति तन्न अक्षरशब्दस्यावयवप्रसिद्ध्या सर्वव्यापित्वप्रतिपादनेन शास्त्रसमपेक्षणीयं एवं तर्ह्यक्षरशब्दनिर्दिष्टो जीवोऽस्तु तत
स्य भूतसूक्ष्मपर्यन्तस्य कृत्स्नस्याचिद्वस्तुन आधारत्वोपपत्तेः अस्थूलत्वादिश्रूयमाणविशेषणोपपत्तेश्च अव्यक्त
मक्षरे लीयते यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते इत्यादिषु प्रत्यगात्मन्य
क्षरशब्दप्रयोगदर्शनादित्यत्रोत्तरं श्री सा च प्रशासनात् तथा हि सा चाम्बरान्तधृतिरस्याक्षरस्य प्रशासनादेव भवतीत्यु

प्रमाणान्तरानपेक्षणात्संबंधग्रहण श्रु.८

त्मा परमात्मा । अथात आत्मादेश इत्यादिना आत्मेदं सर्वमित्यंते नोच्यते तदेवोपपादयितुं प्रत्यगात्मनोप्या तृ० ५

इत्यादिप्रमाणप्रमितेः सर्वस्योत्पादकत्वनिमित्तादयो हि धर्माः परमात्मन एव व्युत्पत्त्यमधस्तादित्यादिना सर्वात्मकत्वमुपदि
ष्टं तद्भूमगुणविशिष्टस्य ब्रह्मणोऽहंग्रहणोपासनमुपदिश्यते अथातोऽहंकारादेश इत्यहंग्रहोपदेशोपक्रमात् अ
हमर्थस्य प्रत्यगात्मनोपि व्यात्मा परमात्मेत्यन्तर्यामिब्राह्मणादिसिद्धत्वम् अतः प्रत्यगर्थस्य परमात्मपर्यवसाना
दहं शब्दोपि परमात्मपर्यवसायीति प्रत्यगात्मशरीरत्वेन परमात्मानुसंधानार्थाय मह्यं अहंग्रहोपदेशः परमात्मनः सर्वश
रीरतया सर्वात्मत्वात्प्रत्यगात्मनोऽप्यात्मभूतात्परमात्मनः सर्वस्योत्पत्तिरुच्यते तस्य ह वा एतस्यैवं पश्यत एवं मन्वा
नस्यैवं विजानत आत्मनः प्राण आत्मन आकाश इत्यादिना उपासकस्यान्तर्यामितया वस्थितात्परमात्मनः सर्वस्यो
त्पत्तिः सर्वा अतः परमात्मनः प्रत्यगात्मशरीरकत्वानुसंधानार्थमहंग्रहोपासनं कर्तव्यं तस्माद्भूमगुणविशि
ष्टः परमात्मेति सिद्धम् ॥ अक्षरमंबरांतधृतेः ॥ ११ वाजसनेयिनो गार्गीप्रश्ने समामनंति स होवाचैतद्वै तदक्षरं
गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमित्यादि तत्र संशयः किमे
तदक्षरं प्रधानं जीवो वा तत्परमात्मेति किं युक्तं प्रधानमेवेति कुतः अक्षरात्परतः पर इत्यादि प्रदेशप्रसिद्धस्य
नेमयोगादस्थूलत्वादीनां च तत्र समन्वयात् यथा तदक्षरं अधिगम्यत इत्यादिषु परस्मिन्नपि प्रयुक्तमक्षर
शब्दं नेति चेन्न प्रमाणांतरप्रसिद्धरूढिप्रसिद्धयोः प्रमाणांतरप्रसिद्धस्य प्रथमप्रतीतेः प्रतीतपरिग्रहेविरोधाभावा
त् किंच यदूर्ध्वं गार्गि दिवो यदर्वाक्पृथिव्या इत्यारभ्य सर्वस्य कालत्रयवर्तिनः कार्यस्याकाशपर्यंतस्य आधारत्वेन
प्रति पादितेऽस्मिन्
[illegible] महदहंकारसर्वविकारकारणतया तदाधा

तदाधारभूतं २

रयाप्रवर्त्तितेतदक्षरं परं ब्रह्म। अतः पुरुषोत्तम एवास्याभिमतार्थे अपि च यो वा एतदक्षरं गार्ग्यविदित्वा यस्मिंल्लोके
जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रै
ति स कृपणः। अथ य एतदक्षरं गार्गि विदित्वास्माल्लोकात्प्रैति स ब्राह्मण इति यदज्ञानात्संसारप्राप्तिर्यद्विज्ञा
नाच्चामृतत्वप्राप्तिस्तदक्षरं परं ब्रह्मैवेति सिद्धम्॥ श्री॥ ईक्षतिकर्मव्यपदेशात्सः॥ आथर्वणिकाः सत्यकामप्रश्ने
अधीयते यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नो। यथा पादोद
रस्त्वचा वि॰ निर्मुच्यत एवं हैव स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्प
रं पुरिशयं पुरुषमीक्षत इति। अत्र ध्यायतीक्षतिशब्दाभ्यामेकविषयो ध्यानफलत्वादीक्षणस्य यथाक्रतुरस्मि
न्लोके पुरुष इति न्यायेन ध्यानविषयस्यैव प्राप्यत्वात्। परमपुरुषमित्युभयत्र कर्म। तस्यार्थस्य प्रत्यभिज्ञा
नाच्च। तत्र संशय्यते किं परं पुरुष इति निर्दिष्टो जीवसमष्टिपुरुषोऽण्डाधिपतिश्चतुर्मुख उत सर्वेश्वरः पु
रुषोत्तम इति। किं प्राप्तं। समष्टिदेहो ब्रह्मेति। कुतः स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोंकारमभिध्यायीत कत
मं वाव स तेन लोकं जयतीति प्रश्ने एकमात्रं प्रणवमुपासीनस्य मनुष्यलोकप्राप्तिमभिधाय द्विमात्रमुपासीन
स्यान्तरिक्षलोकमभिधाय त्रिमात्रमुपासीनस्य प्राप्यतयाभिधीयमानो ब्रह्मलोकोऽन्तरिक्षात्परो जीवसमष्टि
रूपस्य चतुर्मुखस्य लोक इति विज्ञायते तद्गतेन चेक्ष्यमाणस्तल्लोकाधिपतिश्चतुर्मुख एव एतस्माज्जीवघनात्

ब्रह्मलोकगते।

पर्युदस्यते एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृ
थिव्यौ विधृते तिष्ठतः एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवः सं
वत्सरा विधृतास्तिष्ठन्तीत्यादिना प्रशासनं प्रकृष्टं शासनं चेतनस्य प्रशासनाधीने सर्वशक्ति विधरणं वक्ष्यमाणो
भया वस्थस्यापि प्रत्यगात्मनः संभवति अतः पुरुषोत्तम एव प्रशास्तितादृशम्। श्री अन्यभावव्यावृत्तेश्च श्री
अन्यभावोऽन्यत्वं प्रधानादिभावः अस्याक्षरस्य परमपुरुषादन्यत्वं वाक्यशेषे व्यावर्त्यते एतद्वै तदक्षरं गार्ग्य
दृष्टं द्रष्टृ अश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मं
तृ नान्यदतोऽस्ति विज्ञात्रेतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेत्यद्रष्टृत्वं श्रोतृत्वादिपदेशादेत
स्याक्षरस्याचेतनभूतप्रधानभावो व्यावर्त्यते सर्वैर्दृष्टत्वेन चेतनः सर्वैरदृष्टत्वाद्युपदेशाच्च प्रत्यगात्मभा
वो व्यावर्त्यते अतः स्वमन्यभावव्यावृत्तेरस्य परमपुरुषतां दर्शयति एवं वा अन्यभावव्यावृत्तेरक्षरस्य सद्भा
व व्यावृत्ति [illegible] पदे तदक्षरमन्यैरदृष्टं सर्वस्य द्रष्टृ च समस्तव्यतिरिक्तस्य समस्तस्याधार
भूतमेवानेनादृष्टमेतस्य द्रष्टृ समस्तदेतस्याधारभूतमन्यन्नास्तीति वदन्नान्यदतोऽस्ति द्रष्टृ इत्यादिवाक्यशेषोऽन्य
स्य सद्भावं व्यावर्तयन्नस्याक्षरस्य प्रधानभावं प्रत्यगात्मभावं च प्रतिषेधति किं चैतस्य वा अक्षरस्य प्रशासने गा
र्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवा दर्वीं पितरोऽन्वायत्ता इति नाम्नाऽस्मिन्नाऽर्थे च यागदानहोमादिकं सर्वं यस्या

एवेन प्रणवेन ध्यानायतनेन ध्यानपरायणयोरेकमन्वेतीति यथाध्याने ३

३ हि सत्यकाम परं नारायणाख्यमपरं चतुर्मुखाख्यं च यद्ब्रह्म तदेतदेव यो यमोंकारः इत्योंकारस्य परब्रह्मत्वं ... अपरब्रह्मत्वं च ...

तयोश्च मानेन चतुर्मुखस्थाने श्रुतेरुदाहरणं श्लोके इममेव ब्रह्मलोकमधिकृत्य स्मर्यते यत्तत्कवयो वेदयन्त इति कवयः
सूरयः सूरिभिर्दृश्यं च वैष्णवं पदमेव तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः इत्येवमादिभ्यः न चान्तरिक्षात्परश्चतुर्मु-
खलोकः मध्ये स्वर्गलोकादीनां बहूनां सद्भावात् श्रुतेरप्येतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेतेना-
श्लो ५ यतनेनैकतरमन्वेतीति श्रुतिवचने यदपरं कार्यब्रह्मेति निर्दिष्टं तदैहिकामुष्मिकत्वेन द्विधा विभज्यैकमात्रं प्रणवमुपा-
सीनानामैहिकं मनुष्यलोकावाप्तिरूपं फलमभिधाय द्विमात्रमुपासीनानामामुष्मिकमन्तरिक्षाद्युपलक्षितं फ-
लं चाभिधाय त्रिमात्रेण परं ब्रह्मवाचिना प्रणवेन परमपुरुषं ध्यायतां परमेव ब्रह्म प्राप्यतयोपदिष्टमिति सर्व-
समञ्जसं ईक्षतिकर्म परमात्मा श्रीदहर उत्तरेभ्यः इदमाम्नायते छान्दोग्ये अथ यदिदमस्मिन् ब्रह्मपुरे दह-
रं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति तत्र संदेहः किम-
सौ हृदयपुण्डरीकमध्यवर्ती दहराकाशो महाभूतविशेष उत प्रत्यगात्मा अथ परमात्मेति किं युक्तं महाभूतविशे-
५ श ष इति कुतः आकाशशब्दस्य महाभूताकाशे ब्रह्मणि च प्रसिद्धत्वेऽपि भूताकाशप्रसिद्धिप्रकर्षात् अस्मिन्यदन्तस्तद-
न्वेष्टव्यमित्यन्वेष्टव्यान्तरस्याधारतया प्रतीतेश्चेत्येवं प्राप्तेऽभिधीयते श्रीदहर उत्तरेभ्यः दहराकाशः परं
ब्रह्म कुतः उत्तरेभ्यो वाक्यगतेभ्यो हेतुभ्यः एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः
सत्यकामः सत्यसंकल्पः इति निरुपाधिकात्मत्वमपहतपाप्मत्वादिकं सत्यकामत्वं सत्यसंकल्पत्वं चेति दहरा-
काशे श्रूयमाणा गुणा दहराकाशं परं ब्रह्मेति ज्ञापयन्ति अथ य इहात्मानमननुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्ते

रात्परमिति च देहेन्द्रियादिभ्यः परादेहेन्द्रियादिभिः सह घनीभूताज्जीवव्यष्टिपुरुषाद्ब्रह्मलोकवासिनः स
मष्टिपुरुषस्य चतुर्मुखस्य परत्वेनोपपद्यते अतो ऽत्र निर्दिश्यमानः परमपुरुषः समष्टिपुरुषश्चतु
र्मुख एवेति निश्चीयते एवं चतुर्मुखत्वे निश्चिते अजरत्वादयो यथाकथंचिन्नेया इति प्राप्त उच्यते ॥
ईक्षतिकर्मव्यपदेशात्सः ईक्षतिकर्म स परमात्मा कुतः व्यपदेशात् व्यपदिश्यते हीक्षतिकर्म परमात्मत्वे
न तथा हि ईक्षतिकर्मविषयतया [illegible] श्लोके तमोंकारेणैवायनेनान्वेति विद्वान्यत्तच्छान्तमजरममृत
मभयं परं चेति परं शान्तमजरममृतमभयमिति हि परमात्मनः एवैतद्रूपं एतदमृतमभयमेतद्ब्रह्मे
त्येवमादिश्रुतिभ्यः एतस्माज्जीवघनात्परमिति च परमात्मन एव व्यपदेशः न च चतुर्मुखस्य तस्यापि जीवघ
नशब्दगृहीतत्वात् यस्माद्धि कर्मनिमित्तदेहत्वं स जीवघन इत्युच्यते चतुर्मुखस्यापि तल्लक्षणत्वात् यो ब्रह्मा
णं विदधाति पूर्वमित्यादेः यत्पुनरुक्तं अन्तरिक्षलोकस्योपरि निर्दिश्यमानो ब्रह्मलोकश्चतुर्मुखलोक इति प्र
तीयते अतस्तत्रस्थश्चतुर्मुख इति तदयुक्तं यत्तच्छान्तमजरममृतमित्यादिनेक्षतिकर्मणः परमात्मत्वे निश्चि
ते सति क्षितुः स्थानतया निर्दिष्टो ब्रह्मलोको नश्वरस्य चतुर्मुखलोको भवितुमर्हति किंच यथा पादोदरस्त्व
चा विनिर्मुच्यत एवं ह वै पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकमिति सर्वपापविनि[illegible] निर्मुक्तस्य प्राप्य

ध्याने

ना

कर्मनिमित्तदेहत्वं तदधीनत्वं च

मत्वादिस्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणजातं ध्येयमन्वेष्टव्यमित्युपदिश्यते अत्र तदन्वेष्टव्यमिति तच्छ-
ब्देन दहराकाशं तदन्तर्वर्त्तिगुणजातं च परामृश्य तदुभयमन्वेष्टव्यमित्युपदिश्यते यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्ड-
रीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यो दहराकाशो यश्च तदन्तर्वर्त्तिगुणजातं तदुभयमन्वेष्टव्यमिति विधीयते तत्स्वरूपं; दह-
राकाशशब्दनिर्दिष्टस्य परब्रह्मत्वं तस्मिन्यदन्तस्तदिति निर्दिष्टस्य च तद्गुणत्वं तच्छब्देनोभयं परामृश्योभयस्यान्वेष्ट-
व्यत्वविधानं च कथमवगम्यत इति चेदवहितमनाः शृणु यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इ-
ति दहराकाशस्य अतिमहत्त्वमभिधाय उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रम-
सावुभौ विद्युन्नक्षत्राणीति प्रकृतमेव दहराकाशमस्मिन्निति निर्दिश्य तस्य जगदाधारत्वमभिधाय यच्चास्येहास्ति य-
च्च नास्ति सर्वं तदस्मिन्समाहितमिति पुनरप्यस्मिन्निति तमेव दहराकाशं परामृश्य तस्मिन्नस्योपासकस्येह लोके यद्भो-
ग्यजातमस्ति यच्च मनोरथमात्रगोचरमिह नास्ति सर्वं तद्भोग्यजातमस्मिन्नेव दहराकाशे समाहितमिति निरतिशयभोग्य-
त्वं दहराकाशस्याभिधाय तस्य दहराकाशस्य देहावयवभूतहृदयान्तर्वर्त्तित्वेपि देहस्य जराध्वंसादेः सत्वेपि परम-
कारणतया अतिसूक्ष्मत्वेन निर्विकारत्वमुक्त्वा तत एवैतत्सत्यं ब्रह्मपुरमिति तमेव दहराकाशं सत्यभूतं ब्रह्माख्यं
पुरं निखिलजगदाधारभूतमित्युपपाद्यास्मिन्कामाः समाहिता इति दहराकाशमस्मिन्निति निर्दिश्य काम्यभूता-
श्च गुणान् कामा इति निर्दिश्य तेषां दहराकाशान्तर्वर्त्तित्वमुक्त्वा तदेव दहराकाशस्य काम्यभूतकल्याणगुणविशि-
ष्टत्वं तस्यात्मत्वं च एष आत्मापहतपाप्मेत्यादिना सत्यसंकल्प इत्यन्तेन स्फुटीकृत्य यथा ह्येवेह प्रजा अन्वाविशन्तीत्यार-
भ्य तेषां सर्वेषु लोकेषु कामचारो भवतीत्यन्तेन तादृशं गुणाष्टकेनाविशिष्टं दहराकाशशब्दनिर्दिष्टमात्मानं चानुविदुषामेत

षां सर्वेषु लोकेषु कामचारो भवतीत्यादिना यं यं काममं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठते तेन संपन्नो मही-
यत इत्येतेन दहराकाशवेदिनः सत्यसंकल्पत्वं प्रतिपाद्योपमानाद्दहराकाशं परं ब्रह्मेत्यवगमयति यावान्वा अ-
यमाकाशस्तावानेषोऽन्तर्हृदय आकाश इत्युपमानोपमेयभावश्च दहराकाशस्य भूताकाशत्वेनोपपद्यते
हृदयावच्छेदनिबन्धन उपमानोपमेयभाव इति चेन्न तथा सति हृदयावच्छिन्नस्य द्यावापृथिव्यादिसर्वाश्रय-
त्वेनोपपद्यते ननु च दहराकाशस्य परमात्मत्वेऽपि वाह्याकाशोपमेयत्वं न संभवति ज्यायान्पृथिव्या ज्यायान-
न्तरिक्षादित्यादौ सर्वस्माज्ज्यायस्त्वश्रवणात् नैवं दहराकाशस्य हृदयपुण्डरीकमध्यवर्तित्वप्राप्ताल्पत्वनिवृ-
त्तिपरत्वाद्वाक्यस्य [illegible] बृहच्छ्रुतीति वचनं गतिमुख्यानिवृत्तिपरं ज्यायस्त्वम् एष आ-
त्मापहतपाप्मेत्यादिना दहराकाशो न निर्दिश्यते दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यमिति दह-
राकाशान्तर्वर्तिनस्तत्वान्यस्यान्वेष्टव्यत्वेन प्रकृतत्वात् एष आत्मापहतपाप्मेति तस्यैवान्वेष्टव्यस्य निर्देशो युक्तो
स्यादेतदेवं यदि अतिरिक्तं दहराकाशान्तर्वर्तिनं [illegible] तथाहि अथ यदिदमस्मिन्ब्रह्मपुरे
दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यमिति ब्रह्मपुरशब्देनोपास्यतया सन्निहि-
तपरब्रह्मणः पुरत्वेनोपासकशरीरं निर्दिश्य तन्मध्यवर्तिनि चैतदवयवभूतपुण्डरीकाकारमल्पपरिमाणं हृदयं पर-
स्य ब्रह्मणो वेश्मतयाभिधाय [illegible] उपासकानुग्रहाय तस्मिन्वेश्मनि सन्निहि-
तं सूक्ष्मतयाध्येयं दहराकाशपदेन [illegible] निरस्तनिखिलहेयत्वसत्यको-

निषादस्थपतिं याजयेयत्र निषादश्चासौ स्थपतिश्चेति १

मुच्यते २ सर्वदा २

श्री भा. ८१

तत्र निरपेक्षं पर्याप्तमलिंगमित्याह लिंगं चेति निषादस्थपतिन्यायाच्च षष्ठीसमासात्समानाधिकरणसमा
सो न्याय्यः अथ नाम्न्यहरहर्गच्छन्त्य इति न सुषुप्तिविषयं नामनं अपि त्वेतत्रात्मत्वेन वर्तमानस्य दहराकाशस्य
परमपुरुषार्थभूतस्योपर्युपर्यहरहर्गच्छन्त्यः सर्वस्मिन् काले वर्तमानास्तत्प्रजा नैनमस्तेनविदं तिनलभन्ते यथा
हिरण्यनिधिं निहितं तत्रस्थानं प्रजानानास्तदुपरि सर्वदा वर्तमाना अपि न लभन्ते तत्तद्वदित्यर्थः सेयमेव मेतरात्म
त्वेनावस्थितस्य दहराकाशस्योपरि तन्निपतितानां सर्वासां प्रजानां प्रजानतीनां सर्वदा गतिरस्य दहराकाश
स्य परब्रह्मलोकगमयतीति तथाह्यन्यत्र परस्य ब्रह्मणोन्तरात्मतयावस्थितस्य स्वनियम्याभिः स्वस्मिन् वर्तमाना
भिः प्रजाभिरवेदनं दृष्टं यः पृथिव्यामित्यारभ्य य आत्मनि तिष्ठन्नात्मनोन्तरो यमात्मा न वेद यस्यात्मा शरीरं य
आत्मानमन्तरो यमयतीत्युपक्रम्य श्रूयते अतोतिचमाभ्यन्यत्र दर्शने स्वपमेवत्वियं निर्दिष्टेति तावगतप
रमपुरुषार्थभावस्यास्य दहरस्योपरि तदाधारतया अहरहस्सर्वदा सर्वासां प्रजानां प्रजानतीनां गतिरस्य प
रब्रह्मभावेन पर्याप्तेलिंगमित्यर्थः श्री एतेऽस्य महिम्नः स्यास्मिन्नुपलब्धेः अथ य आत्मेति प्रकृतं दहराकाशं निर्दि
श्य स सेतुर्विधृतिरेषां लोकानामसंभेदायेति अस्मिन् जगद्विधरणं रूपं महिमानं दहराकाशस्य परब्रह्मलोकगमय
तिजगद्विधरणं हि परस्यैव ब्रह्मणो महिमा एष सर्वेश्वरः एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरणः एषां लोकाना
मसंभेदायेति एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादिभ्यः एवं चायं परस्य ब्रह्मणोऽस्या
त्मो महिमा अस्मिन् दहराकाशे उपलभ्यते अतो दहराकाशः परं ब्रह्म श्री प्रसिद्धेश्च आकाशशब्दस्य परस्मिन्

एष ४ विधरणां ४

९९

एतस्मिन् ५ ... सामाद्यसंकरनादेतुः विधिसाधृतिर्येन ... असांकर्येण च निखिलधारकत्वमर्थः

असंभेदाय असांकर्याय ३

व्यतिरिक्तभोग्यसिद्धये च कर्म कुर्वतामेतद्वत्फलावाप्तिमसत्यसंकल्पतां चाभिधायाथ य इहात्मानमनुविद्य व्रजंत्येतां
श्च सत्यान्कामान् तेषां सर्वेषु लोकेषु कामचारो भवतीत्यादिना दहराकाशनिर्दिष्टमात्मानं तदंतर्वर्तिनश्च कामांश्च न
तानपहतपाप्मत्वादिकान् गुणान्विज्ञाननामुदारगुणसागरस्य प्रसादादेव सर्वकामावाप्तिः सत्यसंकल्पता चो
च्यते अतो दहराकाशः परं ब्रह्म तदंतर्वर्ति चापहतपाप्मत्वादिकाम्यगुणजातं ध्येयमन्वेष्टव्यं विजिज्ञासितव्यमि त ४
ति चोच्यते इति निश्चीयते तदेवमस्यकारोपित्वस्य तपति तस्मिन् यदंतरित्यन्वेष्टव्यपदे दहराद्यादिना तदेतेभ्यो हे
तुभ्यो दहराकाशः परं ब्रह्म । गतिशब्दाभ्यां तथा हि दृष्टं लिंगं च ॥ इतश्च दहराकाशः परं ब्रह्म तद्यथापि हिरण्य
म निधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरंतो न विंदेयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छंत्य एतं ब्रह्मलोकं न विंदंत्यनृतेन हि
प्रत्यूढा इत्येतस्मिन्प्रकृतदहराकाशनिर्दिष्टे गम्यत्वादहरहस्तेषां सर्वासां प्रजानामहरहर्गमने गंतव्यस्य तस्य दहराकाश
स्य ब्रह्मलोकशब्दनिर्देशेन च दहराकाशस्य परब्रह्मत्वं गम्यते । गतिशब्दयोरस्य परब्रह्मत्वसाधकत्वमित्यत्राह त
था हि दृष्टमिति परस्मिन्ब्रह्मण्येव सर्वेषां चेतनानामहरहः सुषुप्तिकाले गमनमन्यत्राभिधीयमानं दृष्टं एवमेव ख
लु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामहे इति सत आगम्य न विदुः सत आगच्छामहे इति च तथा हि ब्रह्मलो
कशब्दश्च परस्मिन्ब्रह्मणि दृष्टः एष ब्रह्मलोकः सम्राडिति होवाचेति मा भूदन्यत्र ब्रह्मलोकगमनदर्शनं एतदेव तु
दहराकाशस्य सर्वासां प्रजानां प्रलयकाल इव निखिलदुःखानां सुषुप्तिकालेऽस्थानं रूपमानमस्य परब्रह्मत्वे पर्या
प्तं लिंगं तथा ब्रह्मलोकशब्दश्च सामानाधिकरण्येन दहराकाशे प्रयुज्यमानोऽस्य ब्रह्मत्वे प्रयोगात

श्री
भा०
६२

स्याशरीरस्यात्मनोऽधिष्ठानमित्तिशरीरस्याधिष्ठानता आत्मनश्चाधिष्ठातृता अशरीरस्यात्मत
श्रुटिः २

वस्थं जीवात्मानं सशरीरं कर्मणा शुभाशुभयोर्योग्यतां परिच्छिन्नत्वं प्रियाप्रियपरिष्वक्ततत्रभोग्यत्वं पश्यते परिशुद्धात्मस्वरूपोपदेशा
याय तस्मै मघवते मघवन्मर्त्यमेवेदं शरीरमात्तं मृत्युना तदस्यामृतस्य तत्त्वस्वरूपतां चोक्त्वा न ह वै सशरीरस्य सतः प्रिया
प्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति कर्मारब्धशरीरयोगिनस्तदनुगुणसुखदुःखभोगि
८४ त्वरूपानर्थं तद्विमोके च तत्प्रावमभिधायैवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभि
निष्पद्यत इति जीवात्मनः स्वरूपमेव शरीरवियुक्तमुपदिश्य स उत्तमः पुरुषः स तत्र पर्येति जक्षन् क्रीडन् रममा
१० णः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरमिति प्राप्यस्य परस्य ज्योतिषः पुरुषोत्तमत्वं भिन्नतां निरोधा
नस्य परं ज्योतिरुपसंपन्नस्य प्रत्यगात्मनो ब्रह्मलोके यथेष्टभोगावाप्तिं प्रियाप्रियादियुक्तकर्मनिमित्तशरीराद्यनु
सम्बन्धानुसंधानं चाभिधाय स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्त इति यथोक्तस्वरूपस्य संसार
दशायां कर्मतंत्रशरीरयोगं प्रयोग्यदृष्टान्तेनाभिधाय अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो
दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमथ यो वेदेदमभिव्याहराणीति स आत्माभिव्याह
रणाय वागथ यो वेदेदं शृणवानीति स आत्मा श्रवणाय श्रोत्रमथ यो वेदेदं मन्वानीति स आत्मा मनो मनोऽस्य दैवं चक्षुरि च ४
ति चक्षुरादीन्द्रियकरणो रूपादीनां ज्ञाता मनश्च ज्ञातृत्वे प्रदर्श्य तत एव शरीरादिभ्योऽस्य व्यतिरेकमुपपाद्य स एष एतेन दि वा २
व्येन चक्षुषा मनसैतान्कामान्पश्यन् रमते य एते ब्रह्मलोक इति तस्यैव विविक्तस्य कर्मनिमित्तशरीरविधुरस्य मनःशब्दाभिहितेन दि
व्येन चक्षुषा स्वाभाविकेन ज्ञानेन एतेन सर्वकामानुभवमुक्त्वा तं वा एतं देवा आत्मानमुपासते तस्मात्तेषां सर्वे च लोका आत्ताः

यतेर निवं

ब्रह्मणि प्रसिद्धः कोह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् सर्वाणि ह वा इमानि भूतानि
आकाशादेव समुत्पद्यन्ते इत्यादिष्वपहतपाप्मत्वादिगुणस्य नाम्ना प्रसिद्धिर्भूताकाशप्रसिद्धेर्दुर्बलीयसी समभिव्या
हृतत्वाच्च दहराकाशस्य भूताकाशत्वं प्रतिक्षिप्तं अथेदानीं दहराकाशस्य प्रत्यगात्मत्वमाशंक्य निराकर्तुमुप
क्रमते । इतरपरामर्शात्स इति चेन्नासंभवात् ॥ यद्युक्तं वाक्यशेषवशाद्दहराकाशः परं ब्रह्मेति तद्युक्तं वा
क्यशेषेऽपीतरस्य जीवस्यैव साक्षात्परामर्शात् अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंप
द्य स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति यच्चापि दहरोऽस्मिन्नन्तराकाश
इति हृदयपुण्डरीकमध्यवर्तितयोपदिष्टस्याकाशस्योपमानोपमेयभावासंभवात् भूताकाशत्वेन संभ
वति तथापि वाक्यशेषवशात्प्रत्यगात्मत्वेऽपि युक्तमाश्रयितुमाकाशशब्दोऽपि प्रकाशादियोगाज्जीव एव वर्ति
ष्यते इति चेत् अत्रोत्तरं नासंभवादिति नायं जीवः न ह्यपहतपाप्मत्वादयो गुणा जीवे संभवन्ति ॥ उत्तराच्चेदावि
र्भूतस्वरूपस्तु ॥ उत्तरात्प्राजापत्याद्वाक्याज्जीवस्यैवापहतपाप्मत्वादिगुणयोगो निश्चीयते इति चेत् एतदुक्तं भवति
प्रजापतिवाक्ये जीवपरमेवमाह य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः
सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति प्रजाप
ति वचनमेति यत्नेनोपक्रम्य [illegible] प्रजापतिरुपदिष्टो [illegible] एवं वत्ते प्रजापतिर्जागरितस्वप्नसुषुप्त

श्री
भा०

लोकं गत्वा स्वरूपविज्ञानस्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानित्यनन्तरं यथेति जक्षत्क्रीडन्रममाणादिकं प्रजापति
वाक्ये कीर्त्यमानं फलमपि दहरविद्याफलमेव ॥ अथ अल्पश्रुतेरिति चेत्तदुक्तम् ॥ अथ दहरोऽस्मिन्नित्यल्पपरिमाणश्रु
तिराराग्रप्रमितस्य जीवस्यैवोपपद्यते न तु सर्वस्माज्ज्यायसो ब्रह्मण इति चेन्न तत्र यदुक्तं तत्सर्वमेवोक्तं निचाय्यत्वा
देवमित्यनेनापि दहराकाशो नाल्पत्वादिदोषगन्धः स्वाभाविकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजः प्र
भृत्यपरिमितोदारगुणसागरः पुरुषोत्तम एव प्रजापतिवाक्यनिर्दिष्टः स्यादिति चेदाविर्भूतस्वरूपस्तु तत्र जाग्रदादिभिरवगतक
र्मनिमित्तदेहपरिग्रहः पश्चात्परं ज्योतीरूपसंपद्याविर्भूतोऽपहतपाप्मत्वादिगुणकस्वरूप इति न दहराकाश इत्यत
देव ॥ अथ अनुकृतेस्तस्य च ॥ अथ तस्य दहराकाशस्य ब्रह्मानुकारस्य यमपहतपाप्मत्वादिगुणकोऽविमुक्तबन्धः प्रत्यगात्मा न
दहराकाशः तदनुकारस्तत्साम्यं तत्प्राप्तिर्हि प्रत्यगात्मनोऽपि मुक्तस्य परब्रह्मानुकारः श्रूयते यदा पश्यः पश्यते रुक्मव
र्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं तदा विद्वान्पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीति अतोऽनुकर्ता प्रजाप
तिवाक्यनिर्दिष्टः अनुकार्यं ब्रह्म न दहराकाशः ॥ अथ अपि च स्मर्यते ॥ अथ संसारिणोऽपि मुक्तावस्थायां परमसाम्या
पत्तिलक्षणः परब्रह्मानुकारः स्मर्यते इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः सर्गेऽपि नोपजायन्ते प्रलये न
व्यथन्ति चेति केचित्तु अनुकृतेस्तस्य चापि स्मर्यते इति च सूत्रद्वयमधिकरणान्तरं तमेव भान्तमनुभाति सर्वं तस्य भासा
सर्वमिदं विभातीत्यस्याः श्रुतेः परब्रह्मपरत्वनिर्णयाय प्रवृत्तं वदन्ति तत्त्वसहपयत्वादिगुणकोधर्मोक्तेः छायाप
तनं स्वप्रकाशत्वादिष्वधिकरणद्वयेन तस्य प्रकरणस्य ब्रह्मविषयत्वप्रतिपादनादुपेतिश्रवणाभिधानादित्यादिषु परस्य

सर्वेच कामा इत्येवं विधमात्मानेतानिर्वोज्ञातेनेत्यभिधाय सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनु
विद्य विजानातीति प्रजापतिरुवाचेत्येवं विधमात्मानं विदुषः सर्वकामावाप्तुपत्तलितं ब्रह्मानुभवं फलमभिधायउ
पसंहृतं अत एतत्रापहतपाप्मत्वादिगुणकोलातत्वत्वया प्रक्रान्तो जीव एवेत्यवगतः अपतो जीवस्यापहतपाप्मत्वादयः सं
भवंति ततो दहरवाक्यप्रोक्ते अपहतपाप्मत्वादिगुणसंभवात् स एव दहराकाश इति [illegible]यते
इति चेन्नत्राह आविर्भूतस्वरूपस्त्विति पूर्वमनन्तर्गतिरोहितापहतपाप्मत्वादिगुणकस्वरूपः पश्चाद्विमुक्तकर्म
पः शरीरात्समुत्थितः परंज्योतिरूपसंपन्नः आविर्भूतस्वरूपः सन्नपहतपाप्मत्वादिगुणविशिष्टस्तत्र प्रजापतिवा
क्येऽभिधीयते दहरवाक्ये त्वतिरोहितस्वभावापहतपाप्मत्वादिविशिष्ट एव दहराकाशः प्रतीयते आविर्भूतस्व
रूपस्यापि जीवस्यासंभवनीयाः सेतुत्वविधारणत्वादयः सत्यपदनिर्वचनावगतं चेतनाचेतनयोर्नियंतृत्वं दहरा
काशपरब्रह्मतां साधयंति सेतुत्वविधारणत्वादयः आविर्भूतस्वरूपस्यापि न संभवंतीति जगद्व्यापारवर्जमित्यत्रोपपा
दयिष्यामः यद्येवं दहरवाक्येऽप्येष संप्रसादे इत्यादिना जीवप्रस्तावः किमर्थ इति चेत्तत्राह ॥ श्रीअन्यार्थश्च पराम
र्शः ॥ दहराकाशस्यैवापहतपाप्मत्वं जगद्विधरणत्वादिकं जीवानुभूतस्य तदुपसंपत्त्याऽपहतपाप्मत्वादिकल्याणगुणावि
र्भावस्वाभाविकरूपप्राप्तिकथनेन तदनुकृतं परमपुरुषसाधारणं तमुपदेष्टुं प्रजापतिवाक्योक्तस्य जीवस्यात्र परा
मर्शः प्रजापतिवाक्येऽपि जीवात्मस्वरूपयाथात्म्यविज्ञानं दहरविद्योपयोगितयोक्तं ब्रह्म प्रेप्सोहि जीवात्मनः स्वरूप
स्वरूपं च ज्ञातव्यमेव स्वप्र[illegible] कल्याणगुणगणस्य [illegible] ब्रह्मानुभवविषयत्वतः ब्रह्मोपासनफ

च देवादीनां सशरीरत्वे प्रमाणाभावमनुभवंति तथापि देवादीनां विग्रहवत्त्व प्रतिपादनपरं न किंचिदपि वाक्यमुपलभ्यते मं
त्रार्थवादानां कर्मविधिशेषतया न्यपरत्वान्न देवादि विग्रह साधकाभवंति कर्मविधयस्त्वपेक्षितो देवः उपकारक
त्वातिरेकि देवतागतं किमपि न साधयंति अत एव तासामर्थित्वमपि न संभवति अतः सामर्थ्याथित्वयो रभावाद् देवादीनाम
नधिकारः स्वं प्राप्ते अत्र ब्रूमहे ॥ तदुपर्यपि बादरायणः संभवात् ॥ तदुपर्यपि तत् ब्रह्मोपासनमुपरि देवादीनामपि
संभवतीति भगवान् बादरायणो मन्यते तेषामप्यर्थित्वसामर्थ्ययोः संभवादर्थित्वं तावदाध्यात्मिकादि त्रिविध दुःखाभितापात्
परस्मिन् ब्रह्मणि च निरस्त निखिल दोषगंधानवधिकातिशयासंख्येय कल्याणगुणगणे निरतिशय भोग्यत्वादि ज्ञानाच्च संभ
वति सामर्थ्यमपि पटुतर देहेन्द्रियादिमत्तया संभवति देहेन्द्रियादिमत्त्वं च ब्रह्मादीनां सकलोपनिषत्सु सृष्टि प्रकरणेषु श्रूयते तथाहि सदेव सो
म्येदमग्र आसीत् तदैक्षत बहुस्यां प्रजायेयेति तत्तेजो सृजत इत्यारभ्य सर्वमचेतनं तेजोऽबन्नमभुख्यमेवस्या विशेषेव श्रुत्वा कस्यानेनजी
वेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति संकल्प्य ब्रह्मादिस्थावरांत चतुर्विधभूतजाते तत्तत्कर्मानुचित शरीरं तदुचितनाम
रूपभाक् व्याकरोदिति [illegible] सुक्तं एवं सर्वत्र सृष्टिवाक्येषु देवतिर्यङ्मनुष्यस्थावरात्मना चतुर्विधा सृष्टिराम्नायते देवादिभेद
श्च तत्तल्लोके मीनुगुणा ब्रह्मलोकप्रभृति चतुर्दशलोकस्थ सकलभोगयोग्य देहेन्द्रिययोगायत्त आत्मनां च तो देवादित्वाभावात् ॥
तथा तद्ध्ययने देवासुरा अनुबुबुधिरे ते होचुरिन्द्रो वै देवानामभिप्रवव्राज विरोचनोऽसुराणां तौ ह प्रजापतिरुवाचेत्यादिना विस्पष्टमेवश
रीरेन्द्रियवत्त्वं देवादीनां प्रतीयते कर्मविधिशेषभूत मंत्रार्थवादे ष्वपि वज्रहस्तः पुरंदरः इत्येवमाद्युदयस्थ नरत्वादिभिः प्रतीयमानवि
ग्रहादिमत्त्वं प्रमाणान्तराविरुद्धं तत्प्रमेयमेव न चानुष्ठेयार्थप्रकाशनस्त्वाति परत्वात्प्रतीयमानार्थेतरापि विशेषाकृते वक्तुमशक्यं
रूपयोगात् तेन विना स्तुत्याद्यनुपपत्तेश्च गुणकथनेन हि स्तुतिर्गुणानामभावे स्तुतिरेव न सिद्ध्यतेन व्यसाति गुणे कथिते तेन प्रशंसा

संविवदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः तौ ह द्वा

न्यथा प्रजापतिरुवाच

ब्रह्मलोकाभारूपत्वावगतेश्च दहरवेपत्वानुस्यानाम्भ्युक्तं सूत्रात्तस्यैवं रूपात्त्व ॥ शब्दादेव प्रमितः ॥ कठवल्लीषु श्रूयते
अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ईशानो भूतभव्यस्य न ततो विजुगुप्सते एतद्वै तत् अङ्गुष्ठमात्रः पुरुषो ज्यो
तिरिवाधूमकः ईशानो भूतभव्यस्य स एवाद्य स उ श्वः एतद्वै तत् अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निवि
ष्टः तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण तं विद्याच्छुक्रममृतमिति तत्र सन्दिह्यते किमयमङ्गुष्ठमात्रप्र
मितः प्रत्यगात्मा उत परमात्मेति किं युक्तं प्रत्यगात्मेति कुतः जीवस्यैवान्यत्राङ्गुष्ठमात्रत्वश्रुतेः प्राणाधिपः सञ्चरति
स्वकर्मभिः अङ्गुष्ठमात्रो रवितुल्यरूपः सङ्कल्पाहङ्कारसमन्वितो यः इति न चान्यत्र उपासनार्थं तस्यापि परमात्मनोऽङ्गु
ष्ठमात्रत्वं श्रूयते एवं निश्चिते जीवत्वे ईशानत्वं शरीरेन्द्रियभोग्यभोगोपकरणापेक्षया भविष्यतीति प्राप्ते ब्रूमः शब्दादेव प्रमितः अङ्
गुष्ठमात्रप्रमितः परमात्मा कुतः ईशानो भूतभव्यस्येति शब्दादेव न च भूतभव्यस्य सर्वस्येशितृत्वं कर्मवश्यस्य जीवस्योपपद्यते
कथं तस्य परमात्मनोऽङ्गुष्ठमात्रत्वमित्यत्राह ॥ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ परमात्मन उपासनार्थमुपासकहृदयव
र्तिमानत्वात् उपासकहृदयस्याङ्गुष्ठमात्रप्रमितत्वात् तदपेक्षयेदमङ्गुष्ठमात्रप्रमितत्वमुपपद्यते जीवस्याप्यङ्गुष्ठप्रमितत्वं
हृदयान्तर्वर्तित्वात् तदपेक्षमेव न स्वाराग्रमात्रश्रुतेः मनुष्याणामेवोपासकत्वसम्भवेन यथाशास्त्रस्य मनुष्याधिकारत्वात् म
नुष्यहृदयापेक्षया च तत्तदङ्गुष्ठप्रमितत्वात् खरतुरगपारभभुजङ्गमादीनाम् अङ्गुष्ठप्रमितत्वेऽपि न कश्चिद्दोषः स्थिते तावदुत्तरत्र
समाधास्यते ॥ तदुपर्यपि बादरायणः सम्भवात् ॥ परस्य ब्रह्मणोऽङ्गुष्ठमात्रप्रमितत्वोपपत्तये मनुष्याधिकारं ब्रह्मो
पासनशास्त्रमित्युक्ते तत्प्रसङ्गेनेदं भेदब्रह्मविद्यायां देवादीनामप्यधिकारोऽस्ति नास्तीति विचार्यते किं तावत्प्राप्तं नास्ति देवादीनाम
धिकार इति कुतः सामर्थ्याभावात् न [illegible] तवं लोपासनोपसंहार सामर्थ्यमस्ति

दृश्यते हि सौभरिप्रभृतीनां शक्तिमतां युगपदनेकशरीरप्रतिपत्तिः ॥ शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्यां ॥ विरोध
इति चेन्न तेषामपि कर्मणां विरोधोऽनेकशरीरप्रतिपत्तेः शब्दे तु वैदिके विरोधः प्रसज्यते अनित्यार्थसंयोगाद्धि ग्रहवत्त्वे हि साव
यवत्वेनेन्द्रादेरर्थस्यानित्यत्वमनिवार्यं देवदत्तादिशब्दवदिन्द्रादिशब्दार्थजन्मनः प्राग्विनाशादूर्ध्वं चेन्द्रादिशब्दानां वैदिका
नामर्थशून्यत्वमनित्यत्वं वा वेदस्य स्यादिति चेत् नातः प्रभवात् अस्मादिन्द्रादिशब्दादेव पुनः पुनरिन्द्राद्यर्थस्य प्रभवा
त् एतदुक्तं भवति नहि देवदत्तादिशब्दवदिन्द्रादिशब्दा वैदिका व्यक्तिविशेषमात्रसंकेतपूर्वकाः सृष्टा अपि तत्स्वभावत
एव गवादिशब्दवदाकृतिविशेषवाचित्वेन तत्तदाकृतिकस्यापि द्रव्यस्य विनष्टत्वात् अत एव वैदिकादिन्द्रशब्दान्मनसि वर्त्त
मानादेव गतन तद्वाच्यभूतेन्द्राद्यर्थाकारोऽधाता तदाकारमेवापरमिन्द्रं सृजति यथा कुलालो घटशब्दान्मनसि वर्त्तमानात्तदाका
रमेव घटमिति कथमिदमवगम्यते प्रत्यक्षानुमानाभ्यां श्रुतिस्तावद्वेदेन रूपाणि व्याकरोत्सतासती प्रजापतिरिति तथा स भू
रिति व्याहरन् स भूमिमसृजत स भुव इति व्याहरन् सोऽन्तरिक्षमसृजत इत्यादि वाचकशब्दपूर्वकं तत्तदर्थसंस्थानं स्मरंस्तत्तत्संस्था
नविशिष्टं तं तमर्थं सृष्टवानिति स्मृतिः स्मृतिरपि अनादिनिधना ह्येषा वागुत्सृष्टा स्वयंभुवा आदौ वेदमयी दिव्या यतः सर्वाः प्र
सूतयः इति सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे इति संस्थाः संस्थाना
नि रूपाणीति यावत् तथा नामरूपं च भूतानां कृत्यानां च प्रपंचनं वेदशब्देभ्य एवादौ देवादीनां चकार स इति अतो देवानां वि
ग्रहवत्त्वेऽपि न वैदिकशब्दानामानर्थक्यं वेदस्यादिमत्त्वं च प्रसज्यते अत एव चानित्यत्वं अत एव च वसिष्ठादिशब्दानां देवऋषि
वाचिनां तत्तदाकारवाचित्वं न तच्छब्देन तत्तदर्थस्मृतिपूर्विका च तत्तदर्थसृष्टिः तत एव मंत्रकृतो वृणीते नमो ऋषिभ्यो मंत्रकृद्भ्यो
सोऽग्निरिति विश्वामित्रस्य सूक्तं भवतीत्यादिभिर्वसिष्ठादीनां मंत्रसूक्तकाण्डकृत्त्वे ऋषित्वादौ प्रतीयमानेऽपि वेदस्यानादित्वमुपपद्यते

शर्धंतामिति पाठांतरे ७

जायते अतः कर्मप्ररोचयंतो गुणसद्भावं बोधयंतोऽर्थवादाः मंत्राश्च कर्मसु विनियुक्तास्तत्र न तत्र किंचित्करत्वापानुष्ठेयार्थप्र
काशयंतो देवतादिगतविग्रहादिगतगुणविशेषमभिदधत एव तत्र किंचित्कुर्वंति अन्यथाऽऽनर्थक्यादिस्यात्यनुपपत्तेः न च निर्विग्र
हा देवताधियमाधिरोहति तत्र प्रमाणांतरात्प्राप्तान् गुणांस्त्वयमेव बोधयित्वातेः कर्म प्ररोचयंतो गुणविशिष्टं प्रकाशयंतो देवता
गतविग्रहादिगुणविशेषमभिदधत एव तत्र प्राशस्त्यानुप्ररोचनं कापूर्वं कुर्वंति विरुद्धत्वेनु तद्वान्विभिन्नादेर विरुद्धानगु
णानलंकारयित्वा कुर्वंति कर्मविधेश्च देवताधियमधिरोहति तत्र प्रमाणान्तरप्राप्तं तदेवार्थमपेक्षितं भवकाङ्क्षिनः कर्तव्यतया कर्म
विधीयमानं स्वयं स्वर्गप्रध्वंसिकालान्तरभाविफलस्य स्वर्गादेः साधकमपेक्षते मंत्रार्थवादयोः वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन
भागधेयेनोपधावति स एवैनं भूतिं गमयति यदग्ने नरावयाधास्ते तदस्यात्रदधान्त दक्षे दे वाः एधं तामित्यादिषु देवतायाः कर्मणोपि
तयाः फलदायित्वं तदनुगुणोश्चार्थः प्रतीयमानमपेक्षितत्वेन वाक्यार्थे समन्वयते देवपूजाभिधायिनो यजधातोश्च यागाख्यं कर्म स्वारा
ध्यदेवताप्रधानं प्रतीयते तदेवं सकलवाक्यपर्यालोचनया यागाद्देवविध्यपेक्षितं सर्वमवगतमिति नाप्यवादिकं सुसंगतिसमर्पणं च
गतं कर्मविधिश्चाभिधेयतया कल्पनया वा आश्रयितव्यं तथाः सैकीर्तिः प्रालेलमंत्रार्थवादमूलेषु धर्मशास्त्रेतिहासपुराणेषु प्रत्य
दीनां देवासुरप्रभृतीनां देहेन्द्रियादयः स्वभावमेव स्थानानि भोगाः फलानि च इत्येवमादयः सुव्यक्ताः प्रतिपाद्यंते अतो विग्रहादिमत्त्वादे
वादीनामप्यधिकारोऽस्त्येव श्री विरोधः कर्मणीति लिंगेनाने अनेकप्रतिपत्तेर्दृष्टत्वात् श्री देवादीनां विग्रहादिमत्त्वाभ्युपगमे कर्मणि
विरोधः प्रसज्यते बहुषु यागेषु युगपदेकस्यैकस्य विग्रहवतो अग्निमृग्य आवह इहेन्द्र आगच्छ हरिव आगच्छ इत्यादिना आहूतस्य स
न्निधानानुपपत्तेर्दृष्टत्वात् वाग्न्यादीनां तत्र तत्रागमनेऽसमाहदेवायज्ञमागच्छति अस्मिन्नेवाह्न्येनायजमाना नानायज्ञे देवताः
पूर्वमस्ति तत्र सलाति सनाः स्तोमस्ते यदाऽसाविग्रहादिमत्त्वे कर्मणि विरोधः प्रसज्यते इति चेन्न अनेकप्रतिपत्तेर्दृष्टत्वात्

हाभाग वेदवेदांगपारगः ब्रह्मो मन्त्रस्रष्टा ततो नो ऽः प्रजाः सृजामहामते तस्यापरो नारायणो देवस्तस्माज्जातश्चतुर्मुखइति तथाहि स
र्गमहं वक्ष्ये इत्यारभ्योच्यते स... नारं तोयमतं ... स्थितो ह्ययं तस्मान्नाम नारायणेति कल्पे कल्पे तत्र शायी महीरूपः सुप्तस्य
तस्य नाभिजं स्यात्पद्मं ... एवं भूतस्य मे देवि नाभिपद्मे चतुर्मुख उत्पन्नस्तस्मिन्यात्प्रोक्तेः प्रजाः सृजमहामन इति श्रुतेर्देवादीनामप्य
धिकारसामर्थ्ययोगाद्ब्रह्मविद्यायामधिकारोऽस्तीति सिद्धम् ॥ श्री मध्वादिष्वसंभवादनधिकारं जैमिनिः ॥ ब्रह्मविद्यायां देवादीनामन
धिकारोऽस्ति यदुक्तं तदिदानीं चिन्त्यते येषूपासनेषु देवता एवोपास्यास्तेषु तासामधिकारोऽस्ति नेति वा किं प्राप्तं नास्त्यधिकारस्तेषु मध्वा
दिष्विति जैमिनिर्मन्यते कुतः असंभवात् न ह्यादित्यवस्वादिभिरुपास्या आदित्यवस्वादयोऽन्येऽसंभवति न च आदित्यवस्वादीनां स
तां वस्वादित्वं प्राप्यं भवति प्राप्तत्वात् मधुविद्यायाम् ऋग्वेदादिप्रतिपाद्यकर्मनिष्पाद्यस्य रश्मिद्वारेण प्राप्तस्य रसस्याश्रयतयाल
ब्धमधुव्यपदेशस्यादित्यस्यांशानां वस्वादिभिर्भुज्यमानानामुपास्यत्वं वस्वादित्वं च प्राप्यं श्रूयते असौ वा आदित्यो देवमध्वित्यु
पक्रम्य तद्यत्प्रथमममृतं तद्वसव उपजीवन्ति स य एतदमृतं वेद वसूनामेवैको भूत्वाग्निनैव मुखेन एतदेवामृतं दृ
ष्ट्वा तृप्यतीत्यादिना ॥ श्री ज्योतिषि भावाच्च ॥ इतश्च देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमिति ज्योतिषि परस्मिन्ब्रह्म
णि उपासनं देवानां श्रूयते देवमनुष्योभयसाधारणे परब्रह्मोपासने देवानामुपासकत्वकथनं देवानामितरोपास
ननिवृत्तिं द्योतयति अत एव वस्वादीनामनधिकार इति प्राप्तेऽभिधीयते ॥ श्री भावं तु बादरायणोऽस्ति हि ॥ आदित्यवस्वा
दीनामपि तेष्वधिकारभावं भगवान्बादरायणो मन्यते अस्ति ह्यादित्यवस्वादीनामपि ... ब्रह्मोपासनं वस्वादित्व
प्राप्तिपूर्वकब्रह्मप्राप्तिसंभवः इदानीं वसूनां सतामपि कल्पान्तरे वस्वादित्वप्राप्तिश्चोपपद्यते भवति अत्र हि कार्यकारणोभयाव
स्थब्रह्मोपासनं विधीयते असौ वा आदित्यो देवमध्वित्यारभ्य श्रूयते ऊर्ध्व उदेत्यादित्यान्तरं तावत्स्थितकारणावस्थमेव ब्र

नादि २

ऋषिरेवमंत्रकृतो वर्णीत इत्यादिभिर्वेदग्रंथैस्तत्तत्कांडसूक्तमंत्रकृतां नामधेयानामाख्यातिगाक्ष्यादिकं परामृष्यते तत्तदाकारान् तत्तत्सृ
ष्टिपूर्वं व्यसृजत् प्रजापतिस्तानेवतन्मन्त्रादिस्मरतो नियुंक्ते च प्रजापतिनान्हि न शाक्येयस्तदनुगुणतपस्तप्त्वा वीर्यसिद्धान् पूर्वव
द्वसिष्ठादीन् द्रष्टा त्वे त्वादीन् नथीत्येव चरतो नपश्यत स्ववलितान् पश्यति अतश्च वेदानां नित्यत्वमेषां च मंत्रकृत्त्वमुपपद्य
ते ॥ अथ यस्यां नैमित्तिकप्रलयादिविच्छिन्ना पुनश्चो वेदप्रादुर्भावः पूर्ववदादिस्मरतो न प्रजापतिना देवादिसृष्टिरूपपद्यते नाम प्राकृ १
तप्रलये तु स्रष्टुः प्रजापतेर्भर्ता ब्रह्म का रूपपरिणाम प्रादुर्भाव नष्टत्वात् कथं प्रजापतेः प्राक्पूर्विकाः सृष्टिरूपपद्यते कथं तरां
विनष्टस्य वेदस्य नित्यत्वं … श्रुतो वेदनित्यत्ववादिना वेदादीनां विग्रहत्वाभ्युपगमे लोकव्यवहारस्य प्रवाहानादिता अपरीति
ति अत उत्तरं पठति ॥ सू ॥ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॥ कृत्स्नोपसंहारे जगदुत्पत्त्यावृत्तावपि
पूर्वोक्तसमाननामरूपत्वादेव न कश्चिद्विरोधः तथाहि स भगवान् पुरुषोत्तमः प्रलयावसानसमये पूर्वसंस्थानं जगत्स्मरन् बहु स्यामि
ति संकल्प्य भोग्यभोक्तृजातं स्वस्मिन् शक्तिमात्रावशेषं प्रलीनं विभज्य महदादि ब्रह्माण्डं हिरण्यगर्भपर्यन्तं निर्माय यथापूर्वं सृष्ट्वा वेदं
श्च सर्वानुपूर्वीविशिष्टं संस्थितानानाविधसृष्ट्यै हिरण्यगर्भायोपदिश्य पूर्ववदेवादाकारं जगत्सर्गे तं नियुज्य स्वयमपि तदात्मतया वत
स्थितो यथोक्तसर्वमुत्पन्नं एतदेव च वेदस्यापौरुषेयत्वं नित्यत्वं च यत्पूर्वपूर्वोच्चारणक्रमजनितसंस्कारेण तमेव क्रमविशेषं स्मृत्वा
तेनैव क्रमेणोच्चार्यत्वे तदस्मादुत्सर्गे अप्युरे पि समानं रूपानुविशेषः संज्ञामानवेदः स्वयम्भुवानुसंधानपुरुषोत्तमः कुत इदमवगम्यते इ
ति चेत् तत्राह दर्शनात्स्मृतेश्च दर्शनं तावच्छ्रौतलक्षणं … श्रुतिपूर्वे यो वै वेदांश्च प्रहिणोति तस्मा इति स्मृतिरपि मानवी आसीदि
दं तमोभूतमित्यारभ्य सोऽभिध्याय शरीरात्स्वात् सिसृक्षुर्विविधाः प्रजाः अप एव ससर्जादौ तासु वीर्यमपासृजत् तदण्डमभवद्धैम
सहस्रांशुसमप्रभं तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः इति … देवस्य नाभौ पद्ममजायत तस्मिन् ब्रह्म

श्री. भा. च२

विधिसिद्धस्वाध्यायसंपाद्यज्ञानलाभेन कर्मविधयो ज्ञानतदुपायादीनः परान् स्वीकुर्वन्ति तथा ब्रह्मोपासनविधिः त्रुटिः २

नु वैनयिकादिपक्षे नाधिकृतस्योपासनोपसंहारसामर्थ्यं संभवति असमर्थस्य चाप्यर्थित्वसद्भावेऽप्यधिकारो न संभवति असा
मर्थ्यं च वेदाध्ययनाभावात् यथैव त्रैवर्णिकविषयाध्ययनविधयोऽपि अध्ययनविधिसिद्धस्वाध्यायाधिगतज्ञान
स्यैव ब्रह्मोपासनोपायत्वात् शूद्रस्य ब्रह्मोपासनसामर्थ्यं संभवति इतिहासपुराणे पि वेदोपबृंहणं कुर्वन्ति एवोपायभावमनुभवतः
न स्वातन्त्र्येण शूद्रस्येतीतिहासपुराणश्रवणानुज्ञानं पापक्षयार्थं नोपासनार्थं विदुरादयस्तु भवान्तराधिगतज्ञानाः भोगा
र्थमोघाद्ज्ञानवन्तः प्रारब्धकर्मवशाद् इह जन्मयोगिन इति तेषां ब्रह्मनिष्ठत्वं यत्तु संवर्गविद्यायां शुश्रूषोः शूद्रेति संबोध
नं शूद्रस्याधिकारं सूचयतीति तत्रोच्यते श्री शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि शुगस्य जानश्रुतेः पौ
त्रायणस्य ब्रह्मज्ञाने वैकल्येन हंसोक्तानादरवाक्यश्रवणात् तत एव ब्रह्मविदो रैक्वस्य सकाशं प्रत्याद्रवणाच्च शुगस्य संजा
तेति सूच्यते अतः शूद्रेत्यामन्त्रयते न च तु चतुर्थवर्णत्वेन शोचतीति शूद्रः शुचेर्धातोर् प्रत्ययः धातोः दीर्घश्च कारस्य दका
रे शूद्र इति भवति अतः शोचितत्वमेवास्य शूद्रप्रयोगेन सूच्यते न जातियोगः जानश्रुतिः किल पौत्रायणो बहुदाय
प्रदो बहुपाक्य बभूव तस्य धार्मिकाग्रेसरस्य धर्मेण प्रीतयोः कयोश्चिन्महात्मनोरस्य ब्रह्मजिज्ञासामुत्पादयि त्यि
तुं हंसरूपेण निशि विदूरे गच्छतोः इतरः तरमुवाच भो भो भल्लाक्ष भल्लाक्ष जानश्रुतेः पौत्रायणस्य समं
दिवा ज्योतिराततं तन्मा प्रसांक्षीस्तत्त्वा मा प्रधाक्षीरिति एवं जानश्रुतिप्रशंसारूपं वाक्यमुपश्रुत्य परो हंसः प्रत्युवाच
कम्वरमेनमेतत्सन्तं सयुग्वानमिव रैक्वमात्थ गुणश्रेष्ठमेतदात्थ स ब्रह्मज्ञो रैक्व एव लोके गुणवत्तरः महतात्मने
त्वायुक्तस्य जानश्रुतेर्ब्रह्मज्ञस्य को गुणः यद्गुणजनितं तेजो रैक्वतेजः एवमारहेतइ एवमुक्तेनापरेणोक्तोऽसौ
रैक्व इति यथा लोके यत्किंचित्साध्वनुष्ठितं कर्म यच्च सर्वं चेतनगविज्ञानं तदुभयं यदीयज्ञानकर्मान्तर्भूतं स रैक्व

योजयति दिशान्तरं गमयति स्वारूढमिति युग्वा शकटः तेन सह वर्त्तमानमित्यर्थः २

द्युलोकव्यापि तेजः ४

२ सं

९५

एनं

ण्योपास्यमित्युपदिश्यते तदेव कार्यकारणोभयावस्थब्रह्मोपासीनः कल्पान्ते वस्वादित्वं प्राप्य तदन्ते कारणपरं ब्रह्मैव प्राप्नोति न ह वा अस्मा
उदेति न निम्लोचति सकृद्दिवा हैवास्य भवति य एतामेवं ब्रह्मोपनिषदं वेदेति छान्दोग्ये मधुविद्यायां ब्रह्मोपनिषत्त्वश्रव
णात् ब्रह्मप्राप्तिपर्यन्तं वस्वादित्वफलश्रवणाच्च वस्वादिभोग्यभूतादित्याद्युपास्यविधीयमानमुपासनं तद्द्वारकं स्वस्यैव ब्र
ह्मणोऽन्यैवगम्यते अत एवं विधमुपासनमादित्यवस्वादीनामपि संभवति एवं च ब्रह्मण एवोपास्यत्वाच्च देवा ज्योतिषां ज्यो
तिरित्युपपद्यते तदाह इतिकारः श्रुतिस्मृतिषु आदिषु संभवो ब्रह्मण एव निचाय्यत्वात् श्री शुगस्य तदनादरश्रवणा
त्तदाद्रवणात् सूच्यते हि ब्रह्मविद्यायां शूद्रस्याप्यधिकारोऽस्ति न वेति विचार्यते किं युक्तं अस्तीति कुतः अर्थित्वसामर्थ्यप्र
युक्तत्वादधिकारस्य शूद्रस्यापि तत्संभवात् यद्यप्यग्निविद्यासाध्येषु कर्मसु त्रैवर्णिकविषयत्वाच्छूद्रस्यानधिकारस्तथापि मनोवृ
त्तिमात्रत्वाद्ब्रह्मोपासनस्य न तत्राधिकारोऽस्त्येव वर्णाश्रमीयक्रियापेक्षत्वेऽप्युपासनस्य न तत्र वर्णाश्रमोचितक्रियापायेऽप्यवाप
हितत्वाच्छूद्रस्यापि स्ववर्णोचितं न पूर्ववर्णधर्मे क्रियाभावित्वात्तस्माच्छूद्रेऽप्यस्ति न च शूद्रस्यापि विद्याग्निसा
ध्यपवाहादिकर्मानधिकार एव न्यायानुज्ञानुमते न च नधीतवेदस्याश्रुतवेदान्तस्य ब्रह्मस्वरूपतदुपासनप्रकारानभि
ज्ञस्य कथं ब्रह्मोपासनं संभवति उच्यते अनधीतवेदस्याप्यश्रुतवेदान्तस्यापीतिहासपुराणश्रवणेनापि ब्रह्मस्वरूपतदुपा
सनज्ञानं संभवति श्रुतिश्च शूद्रस्यापीतिहासपुराणश्रवणमनुजानाति श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः इत्यादौ संवर्गे चैतिह
मनुरागतो विदुरादयो ब्रह्मनिष्ठाः तस्मात् ब्रह्मविद्यायां शूद्रस्याप्यधिकारः अतो यत्ते शूद्रस्य ज्ञानेऽधिकारमाचार्यो
देशः शूद्रस्याधिकारः तत्संबन्धि इत्यनुपपत्तिः प्राप्त उच्यते अजहाह शूद्र अहो नैव गुरुस्नात्वा पविशपाप इत्यादिना अतः शूद्रस्याधिका
रः संभवतीति प्राप्त उच्यते न शूद्रस्याधिकारः संभवति ... ब्रह्मस्वरूपतदुपासनप्रकारस्यानवगमात् तद्द

काक्षसेनिमभिप्रतारिणः ४ शुनकस्यापत्यं शौनकः कपिगोत्रं कापेयं पुरोहितं अभिप्रतारिणं यजमानं कक्षसेनस्यापत्यं काक्षसेनिः तौ सूपे विष्टौ पाचकेन परिविष्यमाणौ कश्चिद्ब्रह्मचारी बिभिक्षे ॥ चैत्ररथ ४

जनपदाधिपत्याच्च अस्य जानश्रुतेः क्षत्रियत्वप्रतीतेश्च न चतुर्थवर्णत्वं एवमुपक्रमागताख्यायिकायां क्षत्रियत्व
प्रतीतिरुक्ता उपसंहारगताख्यायिकायामपि क्षत्रियत्वमस्य प्रतीयत इत्याह श्री उत्तरत्र चैत्ररथेन लिंगात् श्री ॥
अस्य जानश्रुतेरुपदिश्यमानायामस्यामेव संवर्गविद्यायां उत्तरत्र कीर्त्यमानेनाभिप्रतारिनाम्ना चैत्ररथेन
क्षत्रियेणास्य क्षत्रियत्वं गम्यते कथं अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बि
भिक्षे इत्यादिना ब्रह्मचारिन्नेदमुपास्महे इत्युक्ते तेन कापेयाभिप्रतारिणोर्भिक्ष्यमाणस्य ब्रह्मचारिणश्च संवर्गविद्यासं
बंधित्वं प्रतीयते तेषु चाभिप्रतारी क्षत्रिय इतरौ ब्राह्मणौ अतः स्यां विद्यायां ब्राह्मणस्य तदितरस्य च क्षत्रियस्यैवान्वयो
दृश्यते न शूद्रस्यातोऽस्यां विद्यायामन्विताद्ब्राह्मणादन्यस्य जानश्रुतेरपि क्षत्रियत्वमेव युक्तं न चतुर्थवर्णत्वं न
न्वस्मिन्प्रकरणेऽभिप्रतारिणश्चैत्ररथत्वं क्षत्रियत्वं च न श्रुतं तत्कथं अभिप्रतारिणश्चैत्ररथत्वं कथं वा क्षत्रियत्वं तत्राह ॥
लिंगादिति अथ ह शौनकं च कापेयमभिप्रतारिणं च ह कापेयमाह चर्थ्यालिंगादस्याभिप्रतारिणः कापेयसंबंधः प्रतीयते
अन्यत्र चैतेन वै चैत्ररथं कापेया अयाजयन्निति कापेयसंबंधिनश्चैत्ररथत्वं श्रूयते यथा चैत्ररथस्य क्षत्रियत्वं सचैत्ररथो
नामैकः क्षत्रपतिरजायतेति अभिप्रतारिणश्चैत्ररथत्वं क्षत्रियत्वं च गम्यते तदेवं न्यायविरोधिनि शूद्रस्याधिकारे लिंगं नोपलभ्य
त इदानीं न्यायसिद्धः शूद्रस्यानधिकारः श्रुतिस्मृतिभिरनुगृह्यत इत्याह श्री संस्कारपरामर्शात्तदभावाभिलापाच्च ॥ ब्रह्म
विद्योपदेशप्रदेशेषूपनयनसंस्कारः परामृश्यते यद्धपन्नानेष्ये तं होपनिन्य इत्यादिषु शूद्रस्य चोपनयनादिसंस्काराभावोऽभि
लप्यते न शूद्रे पातकं किंचिन्न च संस्कारमर्हतीत्यादिषु श्री तदभावनिर्धारणे च प्रवृत्तेः नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्या
हरेति सत्यकामो जाबालस्य शूद्रत्वाभावनिर्धारणे सत्येव ब्रह्मविद्योपदेशप्रवृत्तेश्च न शूद्रस्याधिकारः श्री श्रवणाध्ययनार्थप्रति

हिरात्रैणकर्मणा ६

अपहार इति पाठांतरम्. ७

इत्याह तदेतदुक्तं सवाक्यं ब्रह्मज्ञानविधुरतयात्मनिंदागर्भं तद्भक्तया चैवैकप्रशंसारूपं जानश्रुतिरुपश्रुत्य तत्क्षणादेव क्षत्तारं रै-
क्वान्वेषणाय प्रेष्य तस्मिन्विदित्वागते स्वयमपि रैक्कमुपसंपद्य गवां षट्शतानि निष्कमश्वतरीरथं च रैक्कायोप-
हृत्य रैक्कं प्रार्थयामास अनु म एतां भगवो देवतां शाधि यां देवतामुपास्स इति त्वदुपास्यां परां देवतां ममानुशाधीत्यर्थः
स च रैक्कः स्वमहिमविदितलोकत्रयो जानश्रुतेर्ब्रह्मज्ञानविधुरतानिमित्तानादरगर्भहंसवाक्यश्रवणोत्पन्नशोकावि-
ष्टतां तदनन्तरमेव ब्रह्मजिज्ञासया शोकं च विदित्वास्य ब्रह्मविद्यायोग्यतामभिज्ञाय चिरकालसेवां विनापि दाने-
न शुश्रूषमाणायापि अवच्छन्ति प्रदानेन ब्रह्मविद्या प्रतिष्ठिता भवतीति मत्वा तमनुगृह्णन्नस्य शोकाविष्टता-
मुपदेशयोग्यताख्यापिकामहदृष्टादीनामं च लोकेन ज्ञापयन्निदमाह अह हारेत्वा शूद्र तवैव सह गोभिरस्त्विति
सह गोभिरयं रथस्तवैवास्त्वनेनाव तामह्यं दत्तेन ब्रह्मजिज्ञासया शोकाविष्टस्यैव ब्रह्मविद्या प्रतिष्ठिता भवती-
त्यर्थः स च जानश्रुतिर्भूयोऽपि तदभिप्रायानुगुणमेव ग्रामादिकं धनादिकं च प्रदाय उपससाद पुनरपि स रैक्कस्त-
स्य योग्यतां ख्यापयन् अनुदृशादीनामं च आह आजहारेमाः शूद्रानेनैव मुखेनालापयिष्यथा इति इमानि धनानि
शूद्रानुगुणान्याजहर्थ अनेनैव द्वारेणासेव्यापि नापि दत्त्वा दभिलाषितं ब्रह्मोपदेशरूपवाक्यमालापयिष्य-
सि इत्युक्त्वा तस्मा उपदिदेश अतः शूद्रादीनां विद्योपदेशयोग्यताख्यापनार्थं शोक एवात्र सूचितो न चतुर्थव-
र्णत्वम् श्रीस्त्रिपत्यागगने श्री वदतु यदीति दानषष्ठेन तेन बहु वाक्य इत्यादिना सर्वं तत एवमेतदन्नेमत्स्यं ति
स्यैतेन बहुतरपक्षान्नप्रदायित्वप्रतीतेः ... ज्ञानमप्येतदेतावता मुखेनालेतिहासत ... षण्णा ... ग्रामप्रदानावगत

द्वारेऽभ्यासेन वदन्तीति तन्निष्पाद्यं वक्तुं तत्त्वमस्यादिवाक्यावगतब्रह्मात्मभावानां वेदशिरस्सु विवर्त्तमानतया दुर्ग्रस्याखिलाधिका
रत्वेन निषेद्धुमशक्यत्वात् किंचित्करत्वात् अतिक्रान्तनिषेधविधिके श्रीवृन्दावनकाशीपुरादेर्ज्ञानमुत्पद्यते एवं नु वचा
च्य शुक्त्यादौ रजतादिभ्रमनिवृत्तिवत्पौरुषेयवाक्यजन्यतत्त्वज्ञानसमनन्तरं शूद्रस्य जगद्भ्रमो न विवर्त्तते इति
तत्त्वमस्यादिवाक्यश्रवणसमनन्तरं ब्राह्मणस्यापि जगद्भ्रमानिवृत्तेर्निदिध्यासनेन द्वैतवासनायां निरस्तायामेव
तत्त्वमस्यादिवाक्यं निवर्त्तकज्ञानमुत्पादयतीति चेत्पौरुषेयवाक्यमपि शूद्रादेस्तथैवेति न कश्चिद्विशेषः निदि
ध्यासनेनात्मब्रह्मात्मभावाभिधायकवाक्यार्थप्रतिपादनयोग्यतदर्थभावनासैव विपरीतवासनां निवर्त्तयतीति
इत्यर्थं तं निदिध्यासनं विधेयं शूद्रे वेदानुवचनादीनि विविदिषोत्पत्तावेवोपयुज्यन्त इति शूद्रस्यापि विविदिषायां जा
तायां पौरुषेयवाक्यान्निदिध्यासनादिभिर्विपरीतवासनायां निरस्तायां ज्ञानमुत्पत्स्यते तेनैव पारमार्थिको बन्धो नि
वर्त्तिष्यते अथवा तर्कानुगृहीतात् प्रत्यक्षानुमानाच्च निर्विशेषस्वप्रकाशचिन्मात्रप्रत्यग्वस्तुन्यज्ञानसाक्षित्वेन तत्कृत
विविधविचित्रसत्तात्मनो यद्विकल्परूपं तत्त्वं जगज्जाड्यं सत्यमिति निश्चिते एवंभूतपरिशुद्धप्रत्यग्वस्तुन्यनवरतभाव
नया विपरीतवासनां निरस्यतो देवप्रत्यग्वस्तुसाक्षात्कारः स्यात् शूद्रादेर्योगिविमोहनतरः इति मिथ्याभूतविचित्रप्रपञ्चविचि
त्रसंख्याकल्पलौकिकानन्तविशेषाभावत्वं विना वेदान्तवाक्येन न किंचित्प्रयोजनं हि दृश्यते इति शूद्रादीनामेव ब्रह्मविद्याधिका
रः सुशोभनः अनेनैव न्यायेन ब्राह्मणादीनामपि ब्रह्मवेदनसिद्धेरुपनिषदपि दत्तजलांजलिः स्यादनेन च वाच्यं नैसर्गिकलोक

पादसंयुक्तं संचारस्थानमित्यर्थः १

षेधात् श्रोत्रस्य वेदश्रवणात् तदध्ययनतदर्थानुष्ठानप्रतिषेधात् पद्यु ह वा एतत् श्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतव्यं तस्माच्छूद्रो बहुपशुरयज्ञीय इति बहुपशुः पशुसदृशः इत्यर्थः अनुपशृण्वतो ध्ययनतदर्थज्ञानतदर्थानुष्ठानानि न संभवंति अतस्तान्यपि निषिध्यन्त एव श्रीमच्छंकराचार्यः स्मर्यते श्रवणादिनिषेधः अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रपूरणम् उदाहरणे जिह्वाच्छेदो धारणे शरीरभेद इति न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेदिति च। अतः शूद्रस्यानधिकार इति सिद्धं यत्तु निर्विशेषचिन्मात्रं ब्रह्मैव परमार्थः अन्यत्सर्वं मिथ्याभूतं बंधश्चापारमार्थिकः सच वाक्यजन्यवस्तुयाथात्म्यज्ञानमात्रनिवर्त्यः तन्निवृत्तिरेव मोक्ष इति वदंति तैर्ब्रह्मज्ञाने शूद्रादेरनधिकारो वक्तुं न शक्यते अनुपनीतस्यानधीतवेदस्यापि श्रुतवेदान्तवाक्यस्यापि यस्मात्कस्माच्चिदपि निर्विशेषचिन्मात्रं ब्रह्मैव परमार्थः अन्यत्सर्वं तस्मिन्मिथ्याभूतं परिकल्पितमिति वाक्याद्वस्तुयाथात्म्यज्ञानोत्पत्तेस्तावतैव बंधनिवृत्तेश्च न च तत्त्वमस्यादिवाक्येन ज्ञानोत्पत्तिः कार्यान्वितवाक्यान्तरेणेति नियंतुं शक्यं ज्ञानस्य स्वरूपत्वं तन्त्रत्वात् सामग्र्यामनिषेधतो पि ज्ञानोत्पत्तेः न च वेदवाक्यादेव वस्तुयाथात्म्यज्ञाने सति बंधनिवृत्तिर्भवतीति वक्तुं शक्यं येन केनापि वस्तुयाथात्म्यज्ञाने सति बंधनिवृत्तेः पौरुषेयादपि निर्विशेषचिन्मात्रं ब्रह्म अन्यत्सर्वं मिथ्याभूतमिति वाक्याज्ज्ञानोत्पत्तेः तावतैव भ्रमनिवृत्तेश्च यथा पौरुषेयाद्वाक्यात् [illegible] रज्ज्वादिभ्रान्तिर्[illegible] निवर्तते तद्वदेव शूद्रस्यापि वेदवित्संप्रदायागतवाक्याद् वस्तुयाथात्म्यज्ञाने जाते भ्रमनिवृत्तिर्भविष्यति न चास्योपदेशो न धर्ममिसान्ना वेदविदश्शू

द्रस्य

एतानि तस्मात्संजातमहद्भयनिमित्तमेजनं कंपनं श्रूयते तत्र उद्यतो मानानिवृत्तो किं भविष्यतीति महतो भयाद्वज्रादिवोद्यता
त्तेन जगत्कंपते इत्यर्थः भयादस्याग्निस्तपति भयात्तपति सूर्य इत्याद्यन्येषां महद्भयं वज्रमुद्यतमिति पंचम्यर्थे प्रथमा अयं च पर
ब्रह्मस्वभावः एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठतः भीषास्माद्वातः पवते भीषोदेति
सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पंचमः इति परस्य ब्रह्मणः पुरुषोत्तमस्यैवेशितृत्वावगतेः इतश्चांगुष्ठमितः पु
रुषोत्तमः श्री ज्योतिर्दर्शनात् ॥ तयोरेवांगुष्ठप्रमितविषययोर्वाक्ययोर्मध्ये परब्रह्मणोसाधारणं सर्वतेजसां छादकं सर्व
तेजसां कारणभूतमनुग्राहकं चांगुष्ठपरिमितस्य ज्योतिर्दृश्यते न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोय
मग्निः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति अयमेव श्लोक आथर्वणे परब्रह्माधिकृत्य श्रूयते पुरं
ज्योतिष्ट्वं च सर्वत्र परस्य ब्रह्मणः श्रूयते यथा परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते तं देवा ज्योतिषां ज्योतिरायुर्हो
पासतेऽमृतमिति अथ यदतः परो दिवो ज्योतिर्दीप्यते इत्यादिषु अतोंगुष्ठपरिमितः परं ब्रह्म श्री आकाशोऽर्थान्तरत्वादिव्यप
देशात् छांदोग्ये श्रूयते आकाशो ह वै नामरूपयोर्निर्वहिता ते यदंतरा तद्ब्रह्म तदमृतं स आत्मेति तत्र संशयः किमयमाका
शशब्दनिर्दिष्टो मुक्तात्मा उत परमात्मेति किं युक्तं मुक्तात्मेति कुतः अश्व इव रोमाणि विधूय [illegible] चंद्र इव राहोर्मुच्य धू
त्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीति मुक्तस्यानंतरप्रकृतत्वात् ते यदंतरेति च नामरूपविमुक्तस्य तस्या
भिधानात् नामरूपयोर्निर्वहितेति च स एव पूर्वावस्थायां पलिलतदयिषितः स एव वेदादिरूपाणि नामानि पूर्वमनुभवंस्तस्यैव ना
मरूपविमुक्तस्य सांप्रतिकस्य ब्रह्म तदमृतमित्युच्यते आकाशशब्दस्तस्मिन्नप्यसंकुचितप्रकाशयोगादुपपद्यते ननु दहरवा

ते नामरूपे संज्ञामूर्ती यस्याकाशस्यान्तरा मध्येऽस्तः मध्ये ते देयदन्तरायद्विना
ता [illegible] ५

मुखात्प्र ५

व्यवहारेऽभ्यासतोऽस्यैव नचिदयं लोकव्यवहारोऽभ्रमः परमार्थस्त्वेवमिति समर्थिते सत्येव प्रत्यक्षानुमानवचनं बुभुत्सा जायत इति तस्य
मर्थिका श्रुतिरप्यास्थेयेति यतो भवभयभीतानां संसारात् य एव प्रत्यक्षानुमानाभ्यां वस्तुनिरूपणं कुर्वन्तः प्रत्यक्षानुमान
वचनं बुभुत्सां जनयति बुभुत्सायां जातायां प्रत्यक्षानुमानाभ्यामेव विविक्तस्वभावाभ्यां नित्यशुद्धस्वप्रकाशाद्वितीयं कूटस्थचैत
न्यमेव सत् अन्यत्सर्वं तस्मिन्नध्यस्तमिति सुविवेचं एवंभूते स्वप्रकाशे वस्तुनि श्रुतिसमधिगम्यविशेषान्तरं नाभ्युपगम्यते
अध्यस्तानन्दरूपनिवर्तनी श्रुतिरपि त्वन्मते न च मत आत्मन आनन्दरूपताज्ञानायोपनिषदास्यापि तद्रूपताया एव सक
लेतरव्यावर्तापायत्वेनरूपत्वात् यस्य तु मोक्षसाधनतया वेदान्तवाक्यैर्विहितं ज्ञानमुपासनरूपं तच्च परब्रह्मभूतपरमपुरुष
प्रीणनं तद्द्वारा स्वर्गैकसमधिगम्यं उपासनाङ्गश्चोपनयनादिसंस्कारसंस्कृताधीतस्वाध्यायजनितज्ञानं विवेकविमोकादि
साधनसप्तकानुगृहीतमेव स्वोपायतया स्वीकरोति एवंरूपोपासनाप्रीतः पुरुषोत्तम उपासकस्याभाविकात्मयाथात्म्यज्ञानदा
नेन कर्मजनिताज्ञानं नाशयन् बन्धान्मोचयतीति विशेषः तस्माद्यथोक्तेभ्यो लिङ्गेभ्यः शूद्रादेरनधिकार उपपद्यते तदेवं प्रसक्तानुप्रस
क्तानुप्रसक्तमधिकारकथापरिसमाप्य प्रकृतस्याङ्गुष्ठप्रमितस्य भूतभव्येशितृत्वावगतपरब्रह्मभावे हेत्वन्तरमा
ह॥ श्री कंपनात् श्री अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति अंगुष्ठमात्रः पुरुषोऽन्तरात्मेत्यनेन यो वीक्ष्यमाणो यदिदं किंचि
जगत्सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति भयादस्याग्निस्तपति सूर्यः भयादिन्द्रश्च वायुश्च
मृत्युर्धावति पंचमः इति कृत्स्नस्य जगतोऽस्मिन् अंगुष्ठमात्रे पुरुषे प्राणशब्दनिर्दिष्टे स्थितानां सर्वेषां तेनाग्नि

श्री
भा
१०१

देशात् द्वैतप्रतिषेधाच्च सुषुप्त्यवस्थ एव हि प्रत्यगात्मा परं ब्रह्म परमेश्वर इति व्यपदिश्यते अतः प्रकृतान्मुक्तात्मनोऽभिसंभवितुर्नोऽर्थां
तरमभिसंभाव्यो ब्रह्मलोकोऽतो नामरूपयोर्निर्वहिताऽकाशोऽपि स एव भवितुमर्हतीति अत उत्तरं पठति श्री सुषुप्त्युत्क्रान्त्योर्भेदे
न व्यपदेशादित्यनुवर्त्तते सुषुप्त्युत्क्रान्त्योः प्रत्यगात्मनोऽर्थान्तरत्वेन परमात्मनो व्यपदेशात् प्रत्यगात्मनोऽर्थान्तरभूतः
परमात्मा तथा हि वाजसनेयके कतम आत्मा योऽयं विज्ञानमयः प्राणेष्विति प्रकृतस्य प्रत्यगात्मनः सुषुप्त्यवस्थायामकिं
चिज्ज्ञस्य सर्वज्ञेन परमात्मना परिष्वंगोऽवसीयते प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति तथोत्क्रांताव
पि प्राज्ञेनात्मनान्वारूढः उत्सर्जन्यातीति न च स्वप्नउत्क्रामतोऽप्यकिंचिज्ज्ञस्य तदानीमेव स्वेनैव सर्वज्ञेन सता परिष्वं
गान्वारोहौ संभवतः न च स्वेनैवात्मान्तरेण तस्यापि सर्वज्ञत्वासंभवात् ततश्च प्रत्यगात्मनोऽर्थान्तरभूतः परमात्मेत्याह श्रीप
त्यादिशब्देभ्यः अयंपरिछेजकः परमात्मान्तरत्वपत्यादिशब्दैर्व्यपदिश्यते सर्वस्याधिपतिः सर्वस्य वशी सर्वस्येशानः स न साधु
कर्मणा भूयान्नो एवाऽसाधुना कर्मणा कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदा
य तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति तमेव विदित्वा मुनिर्भवति एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति स वा एष म
हानज आत्मान्नादो वसुदानः अजरोऽमृतोऽभयो ब्रह्मेति एते च पतित्वजगद्विधरणत्वसर्वेश्वरत्वादयः प्रत्यगात्मनो मुक्ता
वस्थायामपि न कथंचित्संभवन्ति अतो मुक्तात्मनोऽर्थान्तरभूतो नामरूपयोर्निर्वहिताकाशः ऐकोपदेशात्क सर्वस्य चिदचिदात्मकस्य जगतः
ब्रह्मणः ब्रह्मकार्यत्वेन तदात्मकत्वापत्तः इति सर्वं खल्विदं ब्रह्म तज्जलानित्यादिभिर्वाक्यैः प्रतिपाद्यत इति पूर्वमेवोक्तं द्वैतप्रति
षेधश्चातत एव सनवद्यम् ॥ इति श्रीभगवद्रामानुजाचार्यविरचिते शारीरकमीमांसाभाष्ये प्रथमस्याध्यायस्य तृती
यः पादः ॥ श्री आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च उक्तं परमपुरुषार्थलक्षणा

ए६
९९

क्ष्यमाणत्वात् तस्य स एव च दहराकाशो ध्येय इति प्रतीयते तस्य परमात्मत्वं निर्णीतं नैवं प्रजापतिवाक्यव्यवधानात् प्रजापति...
च प्रत्यगात्मनो मुक्तावस्थस्य पुंस्यान्तरं रूपमभिहितमनन्तरं च विधूतपाप्मेति स एव मुक्तावस्थः प्रस्तुतः अतो आकाशो मु
क्तात्मेति प्राप्त उच्यते ॥ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ आकाशः परं ब्रह्म कुतः अर्थान्तरत्वादिव्यपदेशात् अर्थान्तर
१७२ त्वव्यपदेशो आकाशो ह वै नामरूपयोर्निर्वहितेति नामरूपयोर्निर्वोढृत्वं बद्धमुक्तोभयावस्थात् प्रत्यगात्मनोऽर्थान्तरत्वमाकाश
स्योपपादयति बद्धावस्थः स्वयं कर्मवशान्नामरूपे भजमानो न नामरूपे निर्वोढुं शक्नुयात् मुक्तावस्थस्य जगद्व्यापारासंभ
वान्न नामरूपनिर्वोढृत्वं ईश्वरस्य तु निखिलजगन्निर्माणधुरंधुरस्य नामरूपयोर्निर्वोढृत्वं अनेन जीवेना
त्मनानुप्रविश्य नामरूपे व्याकरवाणि यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते सर्वाणि
रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन् यदास्ते इत्यादिषु [illegible] निर्वोढृत्वं नामरूपास्पृष्टत्वं प्रत्यगात्मनो नामरूपयोर्निर्वोढृत्वमाका
शोऽर्थान्तरभूतः परमेव ब्रह्म तदेवोपपादयति ते यदन्तरेति यस्माद्दहराकाशो नामरूपे तरान्तराभ्यामस्य अर्थान्तरभूतस्तस्मा
न्नयोर्निर्वोढः अपहतपाप्मत्वात्सत्यसंकल्पत्वाच्च लिंगाहिते सर्वः आदिशब्देन ब्रह्मत्व आत्मत्वामृतत्वादीनि गृह्यन्ते निरूपा
धिकब्रह्मत्वादयो हि परमात्मन एव संभवन्तीति नाकाशः परमेव ब्रह्म [illegible] मुक्तात्मा शरीरमिति मुक्तो नन्तरं प्रकृतं इति
न ब्रह्मलोकमभिसंभवानीति परस्यैव ब्रह्मणः अनन्तरं प्रकृतत्वात् प्रकृतं अभिसंभवितुर्मुक्तस्याभिसंभाव्यतया परब्रह्म निर्दि
ष्टं तस्याभिसंभवितुर्मुक्तस्य नामरूपनिर्वोढृत्वाद्यसंभवादभिसंभाव्यं परमेव ब्रह्मात्र प्रतिपत्तव्यं किं चाकाशशब्देन प्रकृतस्य द
हराकाशस्य प्रत्यभिज्ञानात् प्रजापतिवाक्यस्याप्युपासकस्य रूपकथनार्थत्वात् [illegible] एवं दहराकाशः प्राणनत्वोपसंहृतः इति सूत्रे ।
आकाशशब्दः प्रत्यगात्मनि [illegible] अर्थान्तरभूतं मात्मानन्तरमेव नास्तीत्येवाप

श्रीः
१२
श्री
राम०

येभ्यः परा ह्यर्था इत्यादिना तत्र हेयत्वेन रूपितेभ्य इन्द्रियेभ्यो गोचरत्वेन रूपिता विषया वशीकार्यत्वेन पराः वश्येन्द्रिय
स्यापि विषयसन्निधानादिन्द्रियाणां दुर्निग्रहत्वात्तेभ्यः परं प्रग्रहत्वरूपितं मनः मनसि विषयप्रवणे विषयास
न्निधानस्याप्यकिंचित्करत्वात्तस्मादपि सारथित्वरूपिता बुद्धिः परा अध्यवसायादौ मनसोप्यकिंचित्करत्वात् तस्या
अपि रथित्वरूपित आत्मा कर्तृत्वेन प्राधान्यात्परः सर्वस्य चास्यात्मायत्तत्वादात्मैव महानिति विशिष्यते तस्मादपि र
थ्यादिरूपितं शरीरं परं तदायत्तत्वाज्जीवात्मनः सकलपुरुषार्थसाधनप्रवृत्तीनां तस्मादपि परः सर्वान्तरात्मभूतो
न्तर्यामी अध्वनः पारभूतः परमपुरुषो यथोक्तस्यात्मपर्यन्तस्य समस्तस्य तच्छेषत्वात्तदायत्तप्रवृत्तित्वात्सर्वत्वं तर्यामित
योपासकस्यापि निर्वर्तकः "परात्तु तच्छ्रुतेः" इति हि जीवात्मनः कर्तृत्वं परमपुरुषायत्तमिति वक्ष्यते वशीकार्यत्वेपा
सननिर्देश्योपायकाष्ठाभूतः परमप्राप्यश्च स एव तदिदमुच्यते पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति तथा
चान्तर्यामिब्राह्मणे य आत्मनि तिष्ठन्नित्यादिभिः सर्वं साक्षात्कुर्वन्सर्वं नियमयन्नीमुक्तो नान्योऽतोऽस्ति द्रष्टेत्या
दिना नियन्त्रन्तरं निषिध्यते भगवद्गीतासु च अधिष्ठानं तथा कर्ता करणं च पृथग्विधं विविधाश्च पृथक्चेष्टा दैवं चा
त्र पंचममिति दैवमत्र पुरुषोत्तम एव सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं चेति वचनात् तस्य च
वशीकरणं तच्छरणागतिरेव यथाह ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया तमेव
शरणं गच्छ सर्वभावेन भारतेति तदेवमात्मानं रथिनं विद्धीत्यादिना रथ्यादिरूपविन्यस्ता इन्द्रियादयः इन्द्रियेभ्यः परा ह्यर्था
इत्यत्रस्वप्रदेशे एव प्रत्यभिज्ञायते रथरूपितशरीरमिति परिशेषादव्यक्तशब्देनोच्यत इति निश्चीयते अतः कापिलतंत्रप

100

मोक्षसाधनं तु याज्ञिकशास्त्रं जगत्कारणं ब्रह्मोपदिष्टवत्तत्वतः प्रधानादेश्चेतनाच्छब्दवद्भुक्तो भयात्तस्माद्विलक्षणं निरस्तसमस्त
हेयगंधं सर्वज्ञं सर्वशक्तिं सत्यसंकल्पं समस्तकल्याणगुणात्मकं सर्वान्तरात्मभूतं निरंकुशैश्वर्यमिति इदानीं कापिलतंत्रसि
द्धः प्रसिद्धप्रधानपुरुषादिप्रतिपादनमुखेन प्रधानकारणत्वप्रतिपादनच्छायानुसारी एष विकानि विवाक्यानि कासुचि
च्छाखासु संदृश्यमानानि तेषां व्याख्यानेन कारणत्वस्य तानि निराक्रियन्ते कठवल्लीष्वाम्नायते इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं
मनः मनसस्तु परा बुद्धिः बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा सा परा गति
रिति तत्र संदेहः किं कापिलतंत्रसिद्धमव्यक्तं प्रधानमिह अव्यक्तशब्देनोच्यते उत नेति किं युक्तं प्रधानमिति कुतः महतः
परमव्यक्तमव्यक्तात्पुरुषः परः इति तन्त्रप्रक्रियाप्रत्यभिज्ञानेन तस्यैव प्रतीतेः पुरुषान्न परं किंचित्सा काष्ठा सा परा गति
पंचविंशकपुरुषातिरिक्ततत्त्वनिषेधाच्च श्रुतेः व्यक्तकारणमिति प्राप्तं तदिदमुक्तम् आनुमानिकमप्येकेषामिति चे
त् एकेषां शाखिनां शाखासु महतः परमव्यक्तमिति अव्यक्तकारणमाम्नायत इति चेत् अत्रोत्तरं नेति नाव्यक्तशब्देना
नुमानिकं प्रधानमिहाभिधीयते कुतः शरीररूपकविन्यस्तगृहीतेः शरीरस्य रूपकविन्यस्तस्याऽव्यक्तशब्देन ग्र
हीते आत्मशरीरबुद्धिमनइन्द्रियविषयेषु रथिरथादिभावेन रूपितेषु रथरूपेण विन्यस्तस्याऽव्यक्तशब्देन ग्रहणा
दित्यर्थः एतदुक्तं भवति पूर्वत्र आत्मानं रथिनं विद्धि शरीरं रथमेव तु बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च इन्द्रिया
णि हयानाहुर्विषयांस्तेषु गोचरान् इत्यादिना सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति संते न संसाराध्वनः
पारं वैष्णवं पदं प्रेप्सुं तमुपासकं रथित्वेन तद्वशीकार्याणि च शरीरादीनि रथत्वादिना रूपयित्वा प्रस्तुतेषु रथादिषु योऽवशी तिष्ठति सएवा
ध्वनः पारभूतं वैष्णवं पदमाप्नोति शरीरादिषु कार्यं तत्प्राधान्यानि तान्युच्यन्ते इन्द्रि

योजनं साधयंति अस्मत्साम्यस्वरूपस्थितिप्रवृत्तिभेदास्तेषां नृसुः तथा न भुवनमादेश्वरहितं तु सिद्धं अव्यक्तपानिरसनमिति प्रकृतिस्तस्यो हि
जगदुत्पत्तिप्रलयमादेषु परमपुरुषमहिमवादेषु च प्रकृतिविकृतिपुरुषास्तदात्मकाः संकीर्त्यंते यथा पृथिव्यप्सु लीयतेऽस्मात्स्य
तत्स्मात्र्याति भूतादौ लीयंते भूतादिर्महति लीयते महानव्यक्ते लीयते अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते तमः परे देव
एकीभवति तथा यस्य पृथिवी शरीरं यस्यापः शरीरं यस्य तेजः शरीरं यस्य वायुः शरीरं यस्याक्षरं शरीरं यस्य मृत्युः शरीरं एष सर्वभूतां
तरात्मापहतपाप्मा दिव्यो देव एको नारायणस्तथा भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च अहंकार इतीयं मे भिन्ना प्रकृतिर
ष्टधा अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूतां महाबाहो ययेदं धार्यते जगत् एतद्योनीनि भूतानि सर्वाणीत्युपधार
य अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा मत्तः परतरं नान्यत्किंचिदस्ति धनंजय मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवेति
व्यक्तं विष्णुस्तथाव्यक्तं पुरुषः काल एव चेति प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी पुरुषश्चाप्युभावेतौ लीयेते परमा
त्मनि परमात्मा स सर्वेषामाधारः पुरुषोत्तमः विष्णुनामा स वेदेषु वेदान्तेषु च गीयते अज्ञेयत्ववचनाच्छ्रूयदि तत्र सिद्धमि
हाव्यक्तमविवक्षितमिति तदास्य ज्ञेयत्वमवस्थितं व्यक्ताव्यक्तविज्ञानान्मोक्षं वदद्भिः तांत्रिकैः तेषां सर्वेषां ज्ञेयत्वाभ्युपगमात्
न चास्य ज्ञेयत्वमुच्यत इति अतोनंतवसिद्धस्येत्युदाहरणम् श्रीवदतीति चेन्न प्राज्ञो हि प्रकरणात् अशब्दमस्पर्शमरूपमव्ययं तथा
ऽरसं नित्यमगंधवच्च यत् अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यत इत्यव्यक्तस्य ज्ञेयत्वमनेन रूपे
ण वदतीयं श्रुतिरिति चेन्न प्राज्ञः परमपुरुष एव ह्यत्र श्लोके निचाय्यत्वेन प्रतिपाद्यते विज्ञानसारथिर्यस्तु मनः प्रग
हवान्नरः सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदं एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सू
क्ष्मदर्शिभिरिति प्रांतस्यैव प्रकृतत्वात् अत एव पुरुषान्न परं किंचिदिति न पंचविंशक पुरुषातिरिक्तत्वनिषेधः तस्म

10)

सिद्धस्य प्रधानस्य प्रसंग एवेह नास्ति न चाव्यक्तं तत्र सिद्धम् प्रक्रियाप्रत्यभिज्ञा इन्द्रियेभ्यः परा ह्यर्था इति इन्द्रियेभ्यो ह्यर्थानां शब्दादी
नां परत्वकीर्त्तनात् अहिंसाद्यदयइन्द्रियाणां कारणभूतास्तद्रूपी अर्थेभ्यश्च परं मनइत्यपि न तत्र संगतं अकारणत्वादेव त
थाबुद्धेरात्मा महान्परइत्यपि संगतं नहि महतो महान्परइति संभवति महत आत्मपदे न विशेषितानसंगच्छते अतो रूपकवि
न्यस्तानामेवेह ग्रहणं दर्शयति च तदेवं ए[illegible]भ्भूते बुद्धेमान प्रकाशते इत्यते वस्यश्चाम्भस्मयात्मन्यदश्य शामि
यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञानआत्मनि ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनीति अजितबाह्येन्द्रियान्तःकर
णोरस्य परमपुरुषस्य दुर्लभत्वमभिधाय तद्याप्तिरूपितानामिन्द्रियादीनां वशीकरणप्रकारोपमुच्यते यच्छेद्वाङ्मनसी वाचं म
नसि नियच्छेत् वाक्पूर्वकानि कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि च मनसि नियच्छेदित्यर्थः वाक्[illegible]द्वितीयायाः सुपांसुलुगिति
लुग्मनसी इति सप्तम्या छान्दसो दीर्घः तद्यच्छेज्ज्ञानआत्मनि तन्मनो बुद्धौ नियच्छेत् ज्ञानपदेनात्र एव बोधक बुद्धिरभिधीयते ज्ञान
आत्मनीति व्यधिकरणसमस्या ज्ञानमात्मनि वर्त्तमाने ज्ञाने नियच्छेदित्यर्थः ज्ञानमात्मनि महति नियच्छेत् बुद्धिं कर्तरि महत्यात्मनि यच्छेत्तद्य
च्छेच्छान्त आत्मनि तं कर्त्तारं परस्मिन्प्रत्येति सर्वान्तर्यामिणि नियच्छेत् ज्ञानस्य नाद्दिति नपुंसकलिङ्गता एवंभूतेन रथिना वैष्ण
वं पदं गन्तव्यमित्यर्थः अथ कश्चिदेकं बन्धं स्वशरीरस्याभिज्ञानं तत्राहुः भोक्तृत्वं तदेहत्वात् तत्र भूतसूक्ष्मस्य व्याकृतस्य एव स्या विशे
षमापन्नं शरीरं भवति तदव्याकृतमिह शरीरवस्था मध्यरूपादेनोच्यते तदेहत्वात् तस्याव्याकृतस्य अविद्यक्षणं विकारमापन्नं
स्वरूपवत्पुरुषार्थसाधनप्रवृत्तिहेतुत्वात् यदि न तत्सूक्ष्मम व्याकृतं मध्युपगम्यते कापिलतन्त्रसिद्धो पादत्वे कः प्रद्वेषस्तत्रापि भूतकारण
स्यैव तत्पुरुषार्थसाधनप्रवृत्तिहेतुत्वात् यदि तत्सूक्ष्मम व्याकृतं नमभ्युपगम्यते कापिलतन्त्र सिद्धोपादत्वे कः प्रद्वेष एतदुक्तं भवति
मेवाव्यक्तमित्युच्यते तत्राह श्रीमदधीनत्वात् अर्थवत् परमकारणभूत परमपुरुषाधीनत्वात् प्रयोजनवद्भूतसूक्ष्मं एतदुक्तं भवति
न हीदम[illegible]व्यक्तं तत्र महिम्नाम विशेषतां [illegible]

श्री भा० १०४

तर्गतं च प्रत्यगात्मस्वरूपं वाचकस्वरूपं चोपायं तु स्फोरपि समासेन व्याख्यायन प्रणवं तावदुपदिदेश सर्वे वेदा यत्पदमामनन्ति
तपांसि सर्वाणि च यद्वदन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतदित्येवमुपदिश्य पुनरपि प्राप्य
प्रत्यगात्मस्वरूपमेतावत्स्मातुः प्रत्यगात्मनः स्वरूपमाह न जायते म्रियते वा विपश्चिदित्यादिना प्राप्यस्य परस्य ब्रह्मणो विशेषः स्व
रूपमणोरणीयान्महतो महीयानित्यादिना कस्तं वेद यत्र स इत्यन्तेनोपदिश्यानु मध्ये नायमात्मा प्रवचनेन लभ्य इत्यादिनोपायभूत
स्योपासनस्य भक्तिरूपतामप्याह ऋतं पिबन्ताविति चास्योपासकेन सह वस्थानात् तस्य प्राप्यतामुक्त्वा आत्मानं रथिनं वि
द्धीत्यादिना दुर्गं पथस्तत्कवयो वदन्तीत्यन्तेनोपासनप्रकारमुपासीनस्य वैसव परमपदप्राप्तिमभिधायाऽऽह महतः परमित्या
दिनोपसंहृतं अतस्त्रयाणामेवात्र ज्ञेयत्वेनोपन्यासः प्रश्नश्च तस्मान्नेह तान्त्रिकस्याव्यक्तस्य ग्रहणं श्रीमद्वचः ॥ यथा
बुद्धेरात्मा महान्परः इत्यत्रात्मशब्देन सामानाधिकरण्यान्न तन्त्रसिद्धं महत्तत्त्वं गृह्यते एवमव्यक्तमप्यात्मनः परत्वेनाभिधा
नान्न कापिलतन्त्रसिद्धं गृह्यत इति स्थितं श्रीचमसवदविशेषात् अत्रापि तन्त्रसिद्धप्रक्रियानिरस्तत्वेन ब्रह्मात्मकानां
प्रकृतेर्हि कारादीनां स्वरूपं श्रुतिस्मृतिभ्यां ब्रह्मात्मकानां तेषां प्रतिपादनात् यथाऽऽथर्वणिकाः अधीयते विकारजननी
मज्ञाममष्टरूपामजां ध्रुवां ध्यायतेऽध्यासिता तेन तन्यते प्रेर्यते पुनः सूयते पुरुषार्थं च तेन वाधिष्ठिता तं जगत् गौरनाद्य
न्तवती सा जनयित्री भूतभाविनी सिता चासिता च रक्ता च सर्वकामदुघा विभोः पिबन्त्येनामविषमामविज्ञाताः कुमारका एकस्तु पिबते दे
वः स्वच्छन्दो वशानुगां ध्यानक्रियाभ्यां भगवान् भुङ्क्तेऽसौ प्रसभं विभुः सर्वसाधारणीं दोग्ध्रीं पीयमानां तु यज्वभिः
चतुर्विंशतिसंख्याकमव्यक्तं व्यक्तमुच्यत इति पञ्च प्रकृत्यादीनां स्वरूपमभिहितं यदात्मकाश्चेते प्रकृत्यादयः स परमपु
रुषस्तु पुरुषं तु पञ्चविंशकमित्याहुः सप्तविंशकमथापरे पुरुषं निर्गुणं सांख्यमथर्वशिरसो विदुरिति प्रतिपाद्यते गौरेषा

102 महदृ६ ऽ सिता यज्वभिः पाठा० २

च परमपुरुषस्याशरत्वाद् योऽयमर्थः यत्तदद्रेश्यमग्राह्यमित्यादिश्रुतिप्रसिद्धः महतः परमित्यपि बुद्धेरात्मा महान् परः
इति पूर्वप्रकृतात् जीवात्मनः परत्वमेवोच्यते त्रयाणामेव चैवमुपन्यासः प्रश्नश्च प्रसिद्धप्रकरणे ह्युपायोपेयोपेत
णां त्रयाणामेवैवमुपन्यासोऽत्र यत्नेनोपन्यासस्तद्विषयश्च प्रश्नो दृश्यते नान्यस्याव्यक्तादेः तथाहि नचिकेता ना
ममृत्युः सन्नमृत्युं वरत्रयेण प्रथमेन वरेणात्मनः पुरुषार्थयोग्यतापादिनीमात्मनि पितुः सुमनस्कतामप्रति
लभ्य द्वितीयेन वरेणात्मसाधनभूतां नचिकेताग्निविद्यां वव्रे स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेण इति
महीयस्वर्गलोका अमृतत्वं भजन्ते एतद्द्वितीयेन वरेण वरये इति स्वर्गपदेनात्र परमपुरुषार्थलक्षणमोक्षोऽभिधीयते
अमृतत्वं भजन्ते इति तत्रस्थस्य जन्ममरणाभावश्रवणादुत्तरत्र त्रिणाचिकेत इति त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं
त्रिकर्मकृत्तरति जन्ममृत्यू इति च प्रतिवचनान्तरं तृतीयेन वरेणात्मस्वरूपप्रश्नद्वारेणोपेयस्वरूपमुपेय
स्वरूपमुपायभूतानुष्ठितकर्मानुगृहीतोपासनस्वरूपं च वव्रे येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायम
स्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय इत्येवं मोक्षे पृष्टे तदुपदेशयोग्यतां परीक्ष्यापदिदेश तं दु
र्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति तदेव सामा
न्येनोपदिष्टे नचिकेताः प्रीतः सन् दृष्टं मत्वेत्युपासनप्राप्यमात्मस्वरूपं तस्य देवस्याध्यात्मयोगाधिगमेनेति वेदित
व्यं नोपदिष्टं तस्य ब्रह्मोपासनस्य च स्वरूपशोधनाय पुनः प
प्रच्छ अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति एवं च सकलेतर
रातीताः गतं वर्तमानसाध्यसाधनसाध्यकेविलक्षणे त्वेऽमोपदिष्टे प्रथमं प्रणवं प्रशंस्य तदालम्बनमाप्यस्वरूपं तद

श्वे०
भा०
१०५

मात्रं तत्र सिद्धा प्रकृतिरभिधीयते कुतः १
त्यजो २

तेषां प्रायेण च चमसे हे चमसस्य दर्विशेषः इति न ज्ञायते त्यजेत्त्वमात्रप्रतिपादनात्तत्र सिद्धाऽप्रसात्मिकाऽजाग्रहणे विशे
षाप्रतीयते चमसवत् यथाऽर्वाग्बिलश्चमस ऊर्ध्वबुध्न इत्यस्मिन्मन्त्रे चमसस्य भक्षणसाधनत्वमात्रे चमसशब्देन
प्रतीयते इति न तावन्मात्रेण चमसविशेषप्रतीतिः यौगिकशब्दानामर्थप्रकरणादिभिर्विना ग्रहविशेषनि
श्चयायोगात् तत्र यथेदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इत्यादिना वाक्यशेषेण शिरसश्चमस
त्वं श्रयः तथात्राप्यर्थप्रकरणादिभिरेवाजा निर्णीतव्या न चात्र तत्र सिद्धाऽजाग्रहणे हेतवोऽर्थप्रकरणादयो द
दृश्यन्ते न चास्याः स्वातन्त्र्येण सृष्टृत्वं प्रतीयते बह्वीः प्रजाः सृजमाना इति सृष्टृत्वमात्रप्रतीतेः अतोऽनेन मन्त्रेण प्रसात्मि
काऽजाभिधीयते आत्मात्मिकाजाग्रहणे विशेषहेतुरस्तीत्याह श्री ज्योतिरुपक्रमा तु तथा ह्यधीयत एके श्रीगुरु
देः व्याधारणार्थः ज्योतिरुपक्रमैवैषाजा ज्योतिरुपलक्षिते देवा ज्योतिषां ज्योतिः अथ यदतः परो दिवो ज्योतिर्दीप्यते
इत्यादि श्रुतिप्रसिद्धं ज्योतिरुपक्रमा ब्रह्मकारणिकेत्यर्थः तथा ह्यधीयत एके हि हेतौ यस्मादस्या अजाया ब्रह्मकारण
कत्वमेके शाखिनः श्वेताश्वतरीया अधीयते अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोरिति हृदयगुहाया
मुपास्यत्वेन सन्निहितं ब्रह्माभिधाय सप्त प्राणाः प्रभवन्ति तस्मादित्यादिना सर्वे वा लोकानां ब्रह्मादीनां च ततोत्पत्तिम
धाय सर्वकारणाभूतां जातत उत्पन्नामधीयते अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपां अजो ह्येको जुष
माणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति सर्वस्य तत्र व्यतिरिक्तस्य वस्तुजातस्य तत उत्पन्नत्वात्मकत्वोपदेशो क्रियमाणे
ऽभिधीयमानत्वात्प्राणसमुद्रपर्वतादिवदेषाप्यजा बह्वीनां पाणां प्रजानां स्रष्ट्री कर्मवशेन आत्मना भुज्यमाना नामे

५ नि

103

ध्वेणिका गुणक्षोभकेयः पोऽषुणा विकाराऽभ्यधीयते श्वेताश्वतराः ॐ अयं प्रकृतिपुरुषयोः स्वरूपमामनन्ति संयुक्तमेतत्क्षरमक्षरं
च व्यक्ताव्यक्तं भरते विश्वमीशः अनीशश्चात्मा बध्यते भोक्तृभावाज्ज्ञात्वा देवं मुच्यते सर्वपाशैः ज्ञाऽज्ञौ द्वावजावीशानीशावजा ह्ये
का भोक्तृभोगार्थयुक्ताऽनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विन्दते ब्रह्ममेतत् क्षरं प्रधानममृताक्षरं हरः क्षरात्मा
नावीशते देव एकस्तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरिति तथा छन्दांसि यज्ञाः क्रतवो व्र
तानि भूतं भव्यं यच्च वेदा वदन्ति अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः मायां तु प्रकृतिं वि
द्यान्मायिनं तु महेश्वरं तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगदिति तथोत्तरत्रापि प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमो
क्षस्थितिबन्धहेतुरिति स्मृतिरपि प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान्
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजा
न्गुणान्कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः निबध्नन्ति महाबाहो देहे देहि
नमव्ययं तथा सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकां कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहं प्रकृतिं स्वामवष्टभ्य
विसृजामि पुनः पुनः भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् मयाध्यक्षेण प्रकृतिः सूयते सचराचरं हेतुनानेन कौ
न्तेय जगद्विपरिवर्तते इति तस्माद्ब्रह्मात्मकत्वेन कापिलतन्त्रसिद्धाः प्रकृत्यादयो निरस्यन्ते श्वेताश्वतरोपनिषदि श्रू
यते अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपां अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगा
मजोऽन्य इति तत्र संदेहः किमस्मिन्मन्त्रे केवलात्तन्त्रसिद्धा प्रकृतिरभिधीयते उत ब्रह्मात्मिकेति किं युक्तं केवलेति कुतः अजामेका
[illegible]स्याः प्रकृतेरजात्वश्रवणात् बह्वीः प्रजाः सृजमाना [illegible] बह्वीनां प्रजानां [illegible]

तन्मते सकलएवैतमन्वस्थाते स्वन्तेनएकत्वः एकत्वभावः अतोनेनमंत्रेण ब्रह्मात्मिकैवाजाभिधीयते नकापिलतंत्रसिद्धेतिसि
द्धं अन्ये त्वस्मिन्मंत्रे तेजोवन्नलक्षणाजैकाभिधीयत इति ब्रुवते ते प्रष्टव्याः किं तेजोवन्नान्येव तेजोवन्नात्मिकाजैकाऽत
तेजोवन्नरूपं ब्रह्मैव किं वा तेजोवन्नकारणभूता काचिदिति प्रथमे कल्पे तेजोवन्नानामनेकत्वादजामेकामिति
विरुध्येत नच मन्त्रे तेजोवन्नानामनेकत्वेपि त्रिवृत्करणेनैकतापत्तिरिति त्रिवृत्करणेपि वहुत्वानपगमात् हंत
इमास्तिस्रो देवताः तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति प्रत्येकं त्रिवृत्करणोपदेशात् द्वितीये कल्पेपि विकल्पः
किं तेजोवन्नरूपेण विकृतं ब्रह्मैवाजैका किं वा स्वरूपेणावस्थितमविकृतमिति प्रथमः कल्पो वहुत्वानपगमादेव
निरस्तः द्वितीयेपि लोहितशुक्लकृष्णामिति विरुध्यते स्वरूपेणावस्थितं ब्रह्म तेजोवन्नलक्षणमिति व्युत्क्रमपि न
घटते तृतीये कल्पेप्यजाप्र... तेजोवन्नानि निर्दिश्यन्ते तत्कारणावस्थोपस्थापनीयेत्यास्थेये ततो वरमजा
शब्देन तेजोवन्नकारणावस्थायाः श्रुतिप्रसिद्धाया एवाभिधानम् यत्तु नरस्याः प्रकृतेरजाशब्देन छागत्वपरिक
ल्पनमुपदिश्यत इति तदसंगतं निष्प्रयोजनत्वात् यथात्मानं रथिनं विद्धीत्यादिषु ब्रह्मप्राप्त्युपायतारव्यापनाय
शरीरादिषु रथादिरूपत्वं क्रियते यथा दिव्यवस्त्रादीनां भोग्यत्वख्यापनाय मधुत्वकल्पनं क्रियते तद्वदस्याः प्रकृतेश्छा
गत्वकल्पने कोपयुज्यते नकेवलमुपयोगाभाव एव विरोधश्च कृत्स्नजगत्कारणभूता यास्त्वस्मिन् न
कालसंबद्धानां सर्वेषामेव चेतनानां निखिलसुखदुःखोपभोगापवर्गसाधनभूतायाश्चेतनाया अल्पप्रजा
ऽऽगन्तुकसंगमचेतनविशेषैकरूपाल्पप्रयोजनसाधनस्वपरित्यागहेतुभूतस्वसंबंधपरित्यागसमर्थ...
शेषरूपच्छागतास्वरूपख्यापनाय तद्रूपत्वकल्पने विरुद्धमेव अजामेकां अजो ह्येकः अजोन्यस्त्वजा...
रिकल्पने च नप्रीभमं सर्वं त्वच्छागत्वपरिकल्पत इति चेत् जहात्येनां भुक्तभोगामजोन्य इति विदुष आसेतिक... मुख्यता

नविद्युत्सनातनत्वेनाभिमतानामजाशब्देन उक्तानां बुध्यात्मिकावगतत्वेऽत्यर्थः अतो वाक्यशेषाच्चमसविशेषवच्चरमहरं जा

यादेतत्सरूपास्त्वभिध्यायमानार्था वाक्यान्नियमिताः जा बुध्यात्मिकेतिनिश्चीयते इहापि प्रकरणोपक्रमे लोहि

तशेषारभ्यते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामिति परब्रह्मशक्तिरूपाया अजायाश्च वर्णनमा

रिप्याच्च अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं यो योनि

निमधितिष्ठति एक इति च तस्या एव प्रतीतेनास्मिन्मन्त्रे तेजोऽबन्नलक्षणप्रकृतिप्रतिपत्तिर्गंधः कथं तर्हि ज्योतिरुपक्रमा माया लो

हितशुक्लकृष्णरूपाया अस्याः प्रकृतेरजात्वे अजायाश्च कथं ज्योतिरुपक्रमात्वमत्राह श्री कल्पनोपदेशाच्च मध्वादिवदवि

रोधः श्री प्रसक्ताशंकानिरासार्थश्चशब्दः अस्याः प्रकृतेरजात्वं ज्योतिरुपक्रमात्वं च न विरुध्यते कुतः कल्पनोपदेशात् कल्पने

नोक्तिः सृष्टिः जगत्सृष्ट्युपदेशादित्यर्थः यथा सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति कल्पनेः सृष्टिः अत्राप्यस्मान्मा

यी सृजते विश्वमेतदिति जगत्सृष्टिरूपदिश्यते तेनाविभक्तादस्मात्सूक्ष्मावस्थात्कारणान्मायी सर्वेश्वरः सर्वं जगत्सृजती

त्यर्थः अनेन कल्पनोपदेशेनास्याः प्रकृतेः कार्यकारणरूपेणाऽवस्थाद्वयमवगम्यते सृष्टिप्रलयवेलायां अस

तापन्ना विभक्तनामरूपा [illegible] सृष्टिवेलायां चोद्भूतसत्त्वादिगुणा

विभक्तनामरूपाव्यक्तादिशब्दवाच्या तेजोऽबन्नरूपेणापरिणता लोहितशुक्लकृष्णाकारा चावतिष्ठते अतः कारणाव

स्थाजा कार्यावस्था च ज्योतिरुपक्रमेति न विरोधः मध्वादिवत् यथाऽसावादित्यस्य कारणावस्थायामेकस्यैवादित्य

स्य कार्यावस्थायाम् ऋग्यजुस्सामाथर्वप्रतिपाद्यकर्मनिष्पाद्यरसाश्रयतया वस्वादिदेवताभोग्यत्वायमधुकल्प

नमुदयास्तमयकल्पने च न विरुध्यते [illegible] मारभ्य अथ तत ऊर्ध्व उदेत्य नैवोदेता ना

मधुव्यपदेशानर्हस्य तस्य नास्तमयेति कारणावस्थायां

एतेसंज्ञायामेवसमस्येतिसप्तकर्मधारयः तत्र संज्ञामध्ये दिक्संख्या
दिक्षणाग्निः संख्यायां यथा सप्तर्षयः विप्राः ५

दः सर्वतत्त्वाश्रयभूतस्सर्वेश्वरः परमपुरुषो ह्यभिधीयते न संख्योपसंग्रहादपीत्यपिशब्दः पंच पंचजना इत्यत्रापं
चविंशतितत्त्वप्रतीतिरेव न संभवतीत्यभिप्रायः कथं पंचभिः शब्दसमूहे पंच काशभावात् नहि त्रसिद्धतत्त्वेषु पंचसु
पंचस्वनुगतं तत्त्वसंख्यानिवेशनिमित्तं जात्यादि अस्ति न च वाच्यं पंच कर्मेन्द्रियाणि पंच ज्ञानेन्द्रियाणि पंच महाभूतानि
पंच तन्मात्राणि एवं विशिष्टाः पंचेत्यवान्तरसंख्यानिवेशनिमित्तमस्त्येवेति आकाशस्य पृथग्निर्देशेन पंचभिः शब्दमहा
भूतसमूहाः सिद्धः अतः पंचजनाः स्वयं समासो न समाहारद्विगुः यः अयं तु दिक्संख्ये संज्ञायामिति संज्ञाविशेषविषय
यः अन्यथा पंचजनाः इति लिंगव्यत्ययः अत्र पंचजना नाम केचित्सन्तीति तेषां च संख्या पाविशेष्यन्ते पंच पंचजना इति स
प्तसप्तर्षय इतिवत् के पुनस्ते पंच पंचजना इत्यत आह श्री प्राणादयो वाक्यशेषात् श्री प्राणस्य प्राणमुत चक्षुषश्चक्षुः
श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मनो ये विदुरिति वाक्यशेषात् व्रह्म अथ्याः प्राणादय एव पंच पंचजना इति विव
यन्ते अथ स्यात्काण्वानां माध्यंदिनानां च यस्मिन्पंच पंचजना इत्ययं मन्त्रः समानः प्राणस्य प्राणमित्यादिवाक्यशेषे का
ण्वानामन्नस्य पाठो न विद्यते तेषां पंच पंचजनाः प्राणादय इति न प्राप्त्यते वक्तुमित्यत आह श्री ज्योतिषैकेषामसत्य
न्ने श्री एकेषां काण्वानां पाठे असत्यन्ने ज्योतिषा पंचजना इन्द्रियाणीति विवक्ष्यन्ते तेषां वाक्यशेषः संख्यापूर्णार्थः एतदुक्तं भ
वति यस्मिन् चपंचजनाः तस्मात्पूर्वस्मिन्मन्त्रे तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमिति ज्योतिषां ज्योतिः पदेन ब्रह्म
णाभिधीयमानं ब्रह्माधीनस्वकार्याणि काानि चिज्ज्योतींषि प्रतिपन्नानि तानि च विषयप्रकाशकानीन्द्रियाणीति यस्मिन्पंच
पंचजना इत्यत्र निर्धारितविशेषनिर्देशेनावगम्यन्त इति प्राणादिवेदनस्पर्शेन्द्रियसंघे ते वायुसंबंधित्वात्स्पर्शेन्द्रियस्य मुख्यप्राण

कुर्वतोऽनेन वाक्येन वायुनरपि संबंधयोग्यत्वागलपरिकल्पनमसंतविरुद्धं ॥ श्री न संख्योपसंग्रहादपि नानाभावादतिरे
काच्च ॥ श्री वाजसनेयिनः समामनन्ति यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः तमेव मन्य आत्मानं विद्वान्ब्रह्म
मृतोऽमृतमिति किमयं मंत्रः कापिलतंत्रसिद्धतत्त्वप्रतिपादनपर उतनेति संदिह्यते किं युक्तं तंत्रसिद्धतत्त्वप्रतिपादनप
र इति कुतः पंचपदविशेषितायां पंचजनपदाख्यायां संख्यायां विंशतितत्त्वप्रतीतेः एतदुक्तं भवति पंचजना इति समासः समाहारवि
षयः पंचजनाः पञ्चानां जनानां समूहः पञ्चपूल्य इतिवत् पंचजना इति लिंगव्यत्ययश्छान्दसः तेषां समूहः कतीत्य
पेक्षायां पंचजनशब्दविशेषितेन प्रथमेन पञ्चशब्देन समूहाः पञ्चेति प्रतीयंते यथा पञ्च पञ्चपूल्य इति अतः पंच
पंचजना इति पंचविंशतिपदार्था अवगतौ ते कतम इत्यपेक्षायां मोक्षाधिकारान्मुमुक्षुभिर्ज्ञातव्यतयाम्नातास्तंत्रसिद्धाः प्रकृ
त्यादय एवाम्नायंते मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकश्च विकारो न प्रकृतिर्नो विकृतिः
पुरुष इति हि कापिलानां प्रसिद्धिः अतस्तंत्रप्रसिद्धतत्त्वप्रतिपादनपर इति प्राप्ते प्रचक्ष्महे न संख्योपसंग्रहादपीति पंचपं
चजना इति पंचविंशतिसंख्योपसंग्रहादपि न तंत्रसिद्धतत्त्वप्रतीतिः कुतः नानाभावात् एषां पंचसंख्याविशेषितानां पंचजना
नां तंत्रसिद्धेभ्यस्तत्त्वेभ्यः पृथग्भावात् यस्मिन्पंच पंचजना आकाशश्च प्रतिष्ठित इत्यत्र यच्छब्देन निर्दिष्टब्रह्माश्रयत
या ब्रह्मात्मकत्वं हि प्रतीयते तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतमित्यत्र तमिति परामर्शेन यच्छब्देन निर्दिष्टब्र
ह्मैत्यवगम्यते अतस्तेभ्यः पृथग्भूताः पंचपंचजना इति न तंत्रसिद्धा एते अतिरेकाच्च तंत्रसिद्धेभ्यस्तत्त्वेभ्योऽतिरेकत्वातिरे
कोऽपि भवति यच्छब्दनिर्दिष्ट आकाशश्चातिरिच्येत अतस्तंत्रप्रसिद्धिप्रकल्पितम्याहुः स सर्वविद्याकमपायपर इति श्रुतिप्रसि

ब्रह्मैव समाके ष्यत कथं तस्मा ... आनन्दमयं ब्रह्म सत्यसंकल्पं त्रुटि: ७

नुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवदित्यादिना

भा

१०८

आकाशादिषु कारणत्वेन यथा व्यपदिष्टोक्तेः सर्वज्ञत्वादिविशिष्ट
रस्माद्ब्रह्मण एव जगदुत्पद्यते इति निश्चेतुं शक्यते कुतः यथाव्यपदिष्टमित्युच्यते तस्यैकस्यैवाकाशादिषु कारणत्वेनोक्तेः तस्मा
त्वेन जन्माद्यस्य यतः सेवमादिषु प्रतिपादितं ब्रह्म यथाव्यपदिष्टं सर्वज्ञं ब्रह्मैव कारणत्वेनोच्यते तथाहि सत्यं ज्ञानमनन्तं ब्रह्म
तस्माद्वा एतस्मादात्मन आकाशः संभूतः तत्तेजोऽसृजत इत्यादिषु सर्वज्ञं ब्रह्मैव तस्माद्वा एतस्मादिति परामृश्यते तथा तदैक्षत
सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति प्रकृतं विपश्चिद्ब्रह्म तस्माद्वा एतस्मादिति परामृश्यते अतो ब्रह्मैक कारणं जगदिति नि
श्चित्यामिति निर्दिष्टं सर्वज्ञं ब्रह्मैव तत्तेजोऽसृजतेति परामृश्यते एवं सर्वत्र सृष्टिवाक्येषु दृष्टव्यं अतो ब्रह्मैक कारणं जगदिति
श्रीयते नन्वसद्वा इदमग्र आसीदित्यसदेव कारणत्वेन व्यपदिश्यते तत्कथमिव सर्वज्ञस्य सत्यसंकल्पस्य ब्रह्मण एव का ॥
रणत्वं निश्चीयते इत्यत आह श्रीसमाकर्षात् श्री असद्वा इदमग्र आसीदित्यत्रापि विपश्चिदानन्दमयं सत्यसंकल्पं
सर्वस्य सृष्टं सर्वानुप्रवेशेन सर्वात्मभूतमभिधाय तदप्येष श्लोको भवतीत्युक्तस्यार्थस्य सर्वस्य साक्षित्वेनोदाहृतोऽयं श्लोकः
असद्वा इदमग्र आसीदिति तथोक्तरत्र भीषास्माद्वातः पवते इत्यादिना तदेव ब्रह्म समाकृष्य सर्वस्य प्रशासितृत्वं निरतिश
यानन्दत्वाद्यभिधीयते अतोऽयमेत्रस्तद्विषय एव तदानीं नामरूपविभागाभावेन तत्त्वेनाघ्रितयास्तित्वाभावाद्ब्रह्मैवास
दित्युच्यते असदेवेदमग्र आसीदित्यत्राप्ययमेव निर्वाहः यदुक्तं तद्धेदं तर्ह्यव्याकृतमासीदित्यत्र प्रधानमेव ज्ञातव्यो
रणत्वेनाभिधीयत इति तन्नेत्युच्यते अत्राप्यव्याकृतपूर्वेणाव्याकृतशरीरं ब्रह्मैवाभिधीयते स एष इह प्रविष्ट आनखाग्रेभ्यः
पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मन आत्मेत्येवोपासीतेत्यत्र स एष इति तच्छब्देनाव्याकृतशब्दनिर्दिष्टस्यातः प्रविश्य प्रशासितृ
त्वेनानुकर्षात् तत्सृष्ट्वा तदेवानुप्राविशत् अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति स्रष्टुः सर्वज्ञस्य परस्य ब्रह्मणः
कार्यानुप्रवेशेन नामरूपव्याकरणप्रसिद्धेश्च अन्तःप्रविष्टः शास्ता जनानां सर्वात्मेति नियमनार्थत्वादनुप्रवेशस्य प्रधानस्याचेतन

आत्मनः ३

४ य

स्य ज्योतिषा पृथक्कृतेन प्रदर्शनायोगात् चक्षुष इति चक्षुरिन्द्रियं श्रोत्रस्येति श्रोत्रेन्द्रियमन्नस्येति घ्राणरसनयोः तेन तेषां पादा
नाम् अन्नशब्दो हि पृथिवीसंबंधित्वात् घ्राणेन्द्रियमनेन गृह्यते अद्यतेऽनेनेत्यन्नमिति रसनेन्द्रियमपि गृह्यते मनस
इति मनः घ्राणरसनयोस्तेन तेषां पादानामिति पंचत्वमप्यविरुद्धं प्रकाशकानि मनःपर्यन्तानीन्द्रियाणि पंचजनशब्दनिर्दिष्टानि
तद्विरोधात् घ्राणरसनयोस्तेन तेषां पादाने तदेवं यस्मिन् पंच पंचजना आकाशश्च प्रतिष्ठित इति पंचजनशब्दनिर्दिष्टानीन्द्रिया
णि आकाशशब्दप्रदर्शितानि महाभूतानि च ब्रह्मणि प्रतिष्ठितानीति सर्वं सत्त्वानां ब्रह्मण्येव तु प्रतिपादनान्न तत्र सांख्यपंच
विंशतितत्त्वप्रसंगः अतस्सर्वज्ञं वेदान्ते संख्योपसंग्रहे तदभावे चानकापिलत्वे ... श्रुतत्वप्रतीतिरस्तीति स्थितं श्रीकारण
त्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः श्री पुनः प्रधानकारणवादी प्रत्यवतिष्ठते न वेदान्तेष्वेकरूपा सृष्टिराम्नायते इति ज
गतो ब्रह्मैककारणत्वं न युज्यते चेदुक्तं तथाहि सदेव सोम्येदमग्र आसीदिति सत्पूर्विका सृष्टिराम्नायते असद्वा इदमग्र आसीदि
त्यसत्पूर्विका चान्यत्रासदेवेदमग्र आसीदिति तत्सम्भवदिति च अतो वेदान्तेषु सृष्टेरव्यवस्थितेर्जगतो ब्रह्मैककारणत्वं न
निश्चेतुं शक्यं प्रस्तुतप्रधानकारणत्वमेव निश्चेतुं शक्यते तद्धेदं तर्ह्यव्याकृतमासीदित्यव्याकृते प्रधाने जगतः प्रलयमभिधाय तन्
नामरूपाभ्यां व्याक्रियतेति तस्मादव्याकृतादेव जगतः सृष्टिरभिधीयते अव्याकृतं अव्यक्तं नामरूपाभ्यामव्याक्रियतेन यत्र तेऽसर्वः
अव्यक्तं प्रधानमेव अस्य च रूपनिरूपत्वेन परिणामयत्वेन च जगत्कारणवादिवाक्यगतो सदसच्छब्दो ब्रह्मण्यनिश्चिते अविरोधे
एवमव्याकृतकारणत्वे निश्चिते सतीतरेषां कारणगताः सदसच्छब्दा मुख्याभिप्रायेण ... ब्रह्मात्मशब्दा ...
हत्वव्यापित्वाभ्यां प्रधान एव वर्तन्ते अतः स्मृतिन्यायप्रसिद्धं प्रधानमेव जगत्कारणं वेदान्तवाक्येषु ... अतः ...
कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ... सर्वेषु ... समस्त ... निखिल ...

श्रेष्ठी प्रधानभूतः पुमान् स्वैर्भृत्यैर्भोगोपकरणभूतैर्भुंक्ते भृत्याश्च भोजनाच्छादनादिना
प्रधानं तमुपजीवंति एवं जीवः आदित्यादिभिः प्रकाशाद्याभोगोपकरणभूतैर्भुंक्ते आदित्या
दयोपिह विग्रहणादिना भृत्यवज्जीवमुपजीवंतीति जीवोत्र भोक्ता सिद्ध इति १

तद्यथा श्रेष्ठी स्वैर्भुंक्ते यथा स्वाः श्रेष्ठिनं भुंजंति एवमेवैष प्रज्ञात्मा एतैरात्मभिर्भुंक्ते एवमेवैत आत्मान एतमात्मानं भुंजंतीति तथा क्वैष
एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत् कुत एतदागादिति यच्च मध्यमजानते तस्मै स्वयमेवाजातशत्रुरुवाच हिता नाम नाड्यः तासु
तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यति अथास्मिन्प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्ये
ति स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन् एवमेवैतस्मादात्मनः प्राणाः यथायतनं विप्रतिष्ठंते प्राणेभ्यो
देवा देवेभ्यो लोका इति सुषुप्त्याधारतया स्वप्रसुप्तिजागरितावस्थासु वर्त्तमाने वागादिकरणाध्यायोऽस्य स्वप्ने मेनमेव जीवात्मान
मथास्मिन्प्राण एवैकधा भवतीत्युक्तवान् अस्मिन् जीवात्मनि प्राणभृत्त्वनिबंधनो यं प्राणशब्दः स यदा प्रबुध्यत इति प्राणशब्दनिर्दि
ष्टस्य प्रबोधश्रवणात् मुख्यप्राणस्य स्वप्नस्य च सुषुप्तिप्रबोधयोरसंभवात् अथवास्मिन्प्राण इत्यधिकरणसप्तम्योः प्रसिन्नात्म
निवर्त्तमाने प्राण एकधा भवति वागादिकरणग्राम इति प्राणप्राधान्यमुख्यप्राणपरत्वेऽपि जीव एवास्मिन्प्रकरणे प्रतिपाद्यते स्वतः
प्राणस्य जीवोपकरणत्वात् अतो वक्तव्योपक्रांतब्रह्मपुरुष एवेति तद्व्यतिरिक्तेश्वरासिद्धिः कारणगताश्रवणात् यश्चेतनध
र्मा अस्मिन्नेवोपपद्येत इत्येतदधिष्ठितप्रधानमेव जगत्कारणमित्येवं प्राप्ते प्रचक्ष्महे जगद्वाचित्वात् अत्र पुण्यापुण्यपरवशः सुखदुः
खेतरः स्वस्मिन् प्रकृतिधर्म्माध्यासेन तत्परिणामहेतुभूतः पुरुषो नाभिधीयते अपितु निरस्तसमस्ताविद्यादिदोषगंधो नवधिकाति
शयासंख्येयकल्याणगुणगणनिधिः निखिलजगदेककारणभूतः पुरुषोत्तमोऽभिधीयते कुतः यस्य चैतत्कर्मेत्यत्र एतच्छब्दान्वि
तस्य कर्मशब्दस्य परमपुरुषकार्यभूतजगद्वाचित्वादेतच्छब्दो हि अर्थप्रकरणादिभिरसंकुचितवृत्तिरविशेषेण प्रत्यक्षादिप्रमाणोपस्था
पितनिखिलचिदचिन्मिश्रजगद्विषयः न च पुण्यापुण्यलक्षणं कर्मात्र कर्मशब्देनाभिधेयं ब्रह्मत्वेन वालाकिनोपक्रम्य ब्रह्मत्वेन वाला
किना निर्दिष्टानामादित्यमंडलाद्यधिकरणानां पुरुषाणामब्रह्मत्वेन मृषावादित्वं खलु मा संवादयिष्ठा इति तमब्रह्मवादिनमपोद्य स्वे
नाविदितब्रह्मज्ञापनाया जातशत्रुणोदितवाक्यमवतारितं यो वै बालाक इत्यादि पुण्यापुण्यकर्मसंबंधिन आदित्याद्यधिकर

स्यैवं रूपेणानुप्रवेशान्न संभवति अतो व्याकृतमव्याकृतशरीरं ब्रह्म तन्नामरूपाभ्यां व्याक्रियत इति तदेवाविभक्तनामरूपं
ब्रह्म सर्वज्ञं सत्यसंकल्पं स्वेनैव विभक्तनामरूपं स्वयमेव व्याक्रियत इत्युच्यते एवं सतीक्षणादयो मुख्या एव भवंति ब्रह्मात्म
शब्दावपि निरतिशयबृहत्त्वनियमनार्थव्यापित्वाऽभावेन प्रधाने न कथंचिदुपपद्येते अतो ब्रह्मैककारणं जगदिति
स्थिते श्री जगद्वाचित्वात् श्री पुनरपि सांख्यः प्रत्यवतिष्ठते यद्यपि वेदांतवाक्यानि चेतनं जगत्कारणत्वेन प्रतिपादयं
ति तथापि तंत्रसिद्धप्रधानपुरुषातिरिक्तं वस्तु जगत्कारणं वेद्यतयानेनाभ्यः प्रतीयते तथाहि भोक्तारमेव पुरुषं कारणं
वेद्यतयाभिधीयते कौषीतकिनो बालाक्यजातशत्रुसंवादे ब्रह्म ते ब्रवाणीत्युपक्रम्य यो वै बालाक एतेषां पुरुषाणां कर्त्ता य
स्य चैतत्कर्म स वै वेदितव्य इति उपक्रमे वक्तव्यतया बालाकिनोपदिष्टं ब्रह्माऽजानंतं स्मा एव अजातशत्रुणा स वै वेदितव्य इति
ब्रह्मोपदिश्यते यस्य चैतत्कर्मेति कर्मसंबंधात्मकस्याध्यक्षो भोक्ता पुरुषो वेदितव्यतयोपदिष्टं ब्रह्मेति निश्चीयते नार्थान्तरं
तस्य कर्मसंबंधानभ्युपगमात् कर्म च पुण्यपापलक्षणं चेतनस्यैव संभवति न च वाच्यं क्रियत इति कर्मेति व्युत्पत्त्या प्रत्य
क्षादिप्रमाणोपस्थापितं जगदेतत्कर्मेति निर्दिश्यते यस्यैतत्कृत्स्नं जगत्कर्म स वेदितव्य इति हेतुत्वादर्थान्तरमेव प्रतीयत इति
यो वै बालाक एतेषां पुरुषाणां कर्त्ता यस्य चैतत्कर्मेति पठ्यते [illegible] वेपर्य्यात् कर्मशब्दस्य च लोकवेदयोः पुण्यापुण्यरूप
एव कर्मणि प्रसिद्धेः तत्प्रोक्तविकर्मनिमित्तत्वाज्जगदुत्पत्तेः एतेषां पुरुषाणां कर्त्तेति च भोक्तुरेवोपपद्यते तदयमर्थः एते
षामादित्यमण्डलाद्यधिकरणानां चेतनभोग्यभोगोपकरणभूतानां पुरुषाणां यः कारणभूतः एतत्कारणभावहेतुभूतं पुण्यापु
ण्यलक्षणं च कर्म यस्य स वै वेदितव्यः तत्स्वरूपं प्रकृतेर्विविक्तं वेदितव्यमिति तथोत्तरत्र तौ ह सुप्तं पुरुषमाजग्मतुः तं यष्टि
ना विलेपेति सुसुप्तपुरुषागमनयष्टि [illegible] गानीति तथापरिहारादपि भक्तैव प्राणपाद्यते

प्राणसंकीर्त्तनं लिंगं युज्यते जीवलिङ्गानां ब्रह्मपरत्वं पुनः कथमित्यत आह श्री अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्याम
पि चैवमेके श्री तुशब्दो जीवसंकीर्त्तनेन वाक्यस्य तत्परत्वं हि भावनाभ्यावच्छनत्यर्थः अन्यार्थं जीवसंकीर्त्तनं जीवातिरिक्त ब्रह्मस्वरूपप्रतिबोधना
र्थमिति जैमिनिराचार्यो मन्यते कुतः प्रश्नव्याख्यानाभ्यां प्रश्नस्तावत् तौ ह सुप्तं पुरुषमाजग्मतुरित्यादिना सुप्तस्य प्रतिबुद्धस्य प्राण
स्यैव प्राणनामभिरामंत्रणाश्रवणयष्टिघातोत्थापनाभ्यां प्राणादिव्यतिरिक्तं जीवं प्रतिबोध्य पुनर्जीवव्यतिरिक्तब्रह्मप्रति
बोधनपरो दृश्यते क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत् कुत एतदागादिति व्याख्यानमपि यदा सुप्तः स्वप्नं न कंचन पश्यति
अथास्मिन् प्राण एवैकधा भवति एतस्मादात्मनः प्राणाः यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका इति जीवार्थान्तरभू
तं परमात्मपरमेव सुप्तस्य हि जीवस्य यत्रोषितस्य जागरितस्वप्नदशासंबंधिविचित्रसुखदुःखानुभवकालुष्यविरहेण
सुप्तस्य स्वस्थतापत्तिः पुनरप्यस्य यस्माद्रोगायनिः क्रमणं सोऽयं परमात्मा तथा हि सता सोम्य तदा संपन्नो भवति प्राज्ञेनात्म
ना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति सुषुप्त्याधारतया प्रसिद्धो जीवादर्थान्तरभूतः प्राज्ञः परमात्मा अतः प्रश्नप्र
तिवचनाभ्यां जीवसंकीर्त्तनं जीवादर्थान्तरभूतपरमात्मप्रतिपादनार्थमिति निश्चीयते यदुक्तं प्रश्नव्याख्याने जीवपरे सुषुप्ति
स्थाने च नाड्य एव करणग्रामस्य प्राणशब्दनिर्दिष्टे जीव एवैकधा भवतीति तदयुक्तं नाडीनां स्वप्नस्थानत्वादुक्तरीत्या ब्रह्म
ण एव सुषुप्तिस्थानत्वाच्च प्राणशब्दनिर्दिष्टे ब्रह्मण्येव जीवस्य तदुपकरणभूतवागादिकरणग्रामस्य चैकतापत्तिविभागव
चनाच्च अपि चैवमेके वाजसनेयिनोऽस्मिन्नेव बालाक्यजातशत्रुसंवादे सुषुप्त्याधिष्ठानमयाद्रेदेन तदाश्रयभूतपर
मात्मानमामनंति य एष विज्ञानमयः पुरुषः क्वैष तदाभूत् कुत एतदागात् यत्रैष एतत्सुप्तोऽभूत् य एष विज्ञानमयः पुरुषस्तदेषां
प्राणानां विज्ञानमादाय य एषोऽन्तर्हृदय आकाशः तस्मिन् शेते इति आकाशशब्देन परमात्मनि प्रसिद्धः दहरोऽस्मिन्नंतर
आकाश इति श्रुतौ तत्र जीवसंकीर्त्तनं तस्मादर्थान्तरभूतस्य प्राज्ञस्य परस्य ब्रह्मणः प्रतिबोधनार्थमित्यवगम्यते तस्मादस्मिन् वाक्ये

णांस सजातीयाश्च पुरुषास्तैनैव विदिता इति तदविदितपुरुषविशेषज्ञापनाय योऽयं कर्म्मशब्दो न तु स्पन्दमात्रवाची क्रिया
वाची वा अपि तु कृत्स्नस्य जगतः कार्यत्ववाची एवमेव खल्वविदितार्थ उपदिष्टो भवति पुरुषस्य कर्म्मसंबंधोपलक्षितस्याभा
विकस्वरूपस्याज्ञातस्य वेदितव्यतयोपदेशोपलक्षणो कर्म्मसंबंधित्वमात्रस्य वेदितव्यस्वरूपोपलक्षणत्वात् यस्य कर्म्मसवेदितव्य
इत्येतावत्येव सिद्धेः यस्य चैतत्कर्म्मेत्येतदपरं द्वैयर्थ्यं च य एतेषां कर्ता यस्य चैतदविदितस्वरूपोपलक्षणत्वाभिप्रायः ॥ ये त
या ब्रह्मत्वेन निर्दिष्टाः पुरुषास्तेषामयः कर्त्तारस्ते च यत्कार्यभूताः किं विशेषाभिधीयते कृत्स्नं जगद्यस्य कार्यमुक्तं चान्य
प्रत्यक्षा अचेतनाश्च सर्वे पदार्थाः यत्कार्यत्वेन तुल्याः सपरमकारणभूतः पुरुषोत्तमो वेदितव्य इति जगद्वाचित्वे जीवकर्म
निबंधनत्वेपि न जीवस्य भोग्यभोगोपकरणादेः स्वयमुत्पादकः अपि तु स्वकर्मानुगुण्येनेश्वरसृष्टं सर्वं भुंक्ते अतो न
तस्य पुरुषान्प्रति कर्त्तृत्वमुपपद्यते अतः सर्व्ववेदान्तेषु परमकारणतया प्रसिद्धं परं ब्रह्मैवात्र वेदितव्यतयोपदिश्य
ते ॥ जीवमुख्यप्राणलिंगान्नेति चेत्तद्व्याख्यातम् ॥ अथ यदुक्तं जीवलिङ्गान्मुख्यप्राणसंकीर्तनाच्च लिङ्गात्प्रकृते वास्मिन्प्र
करणे प्रतिपाद्यते न परमात्मेति तद्व्याख्यातं तस्य निर्वाहः प्रतर्दनविद्यायामभिहितः एतदुक्तं भवति यत्रोपक्रमोपसंहारपर्यालोच
नया ब्रह्मपरं वाक्यमिति निश्चितं तत्रान्यलिंगानि तदनुरोधेन वर्णनीयानीति तत्र प्रतिपादितं अत्राप्युपक्रमे ब्रह्म ते ब्रवाणीत्यु
क्ते उपसंहारे च सर्वान्पाप्मनोऽपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेदेति ब्रह्मोपासनेऽकारणे सर्वपापा
पहतिपूर्वकस्वाराज्यपञ्चफलश्रुतेः अतोस्य वाक्यस्य ब्रह्मपरत्वनिश्चयेन जीवमुख्यप्राणलिंगान्यपि तत्परतया वर्णनीयानी
ति प्रातर्दने ह्युपासनत्रैविध्येन जीवमुख्यप्राणलिंगानां ब्रह्मपरत्वमुक्तं अत्राप्युपास्तित्रैविध्यादेकवाक्यं भवतीति सामाना
धिकरण्यसंभवे वैयधिकरण्यस्यायोगात् ब्रह्मण्येव प्राणशब्दप्रयोगनिश्चयेन च प्रातःप्रभृति ब्रह्मोपासनार्थे

देवाद्याकाराणाम् अनात्माकारत्वात्संबंधितं परार्धादिवाप्तिमात्रसत्त्वनिषेधकत्वयुक्तं हि द्वैतमिव भवतीति नानात्वनिषेधेनैकस्वरूपेह्या
त्मनि देवादिप्रकृतिपरिणामभेदेन नानात्वमित्युच्यते तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादि सर्ववि
कर्तृत्वादिश्रुत्या तस्यैव पुरुषनिमित्तत्वाज्जगदुत्पत्तेरुच्यते एवमखिलात्मकपुरुषपरे निश्चिते सति तदेकार्थ्यात्सर्ववेदान्ता
नां तत्त्वमसि पुरुष एवेदं सर्वमिति प्रतीतिस्तद्द्योतिका । तां प्रकृतिरेव जगदुपादानं नेश्वर इत्येवं प्राप्ते ब्रह्म एवाकाशेत्यादि ।
सर्वेश्वर एवाखिलात्मकोऽप्रतीयते कुतः एवमेव हि यावत्तानाम ... भवति अतस्तत्त्वस्य तु नाश
स्ति विरोधेनेति यान्तवल्कोपनामिहिते येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीत्युक्तस्तत्त्वानु
पायतयाऽविद्यायामनादरेणामृतत्वप्राप्त्युपायमेव प्रार्थयमानायै मैत्रेय्यै तदुपायतयाऽऽत्मा वा अरे द्रष्टव्यस्तद्योपादिष्टो य आत्मा तं परमात्मे
व तमेव विदित्वातिमृत्युमेति तमेवं विद्वानमृत इह भवति नान्यः पन्था इत्यादिभिरमृतत्वस्य परमपुरुषवेदनैकोपायतया प्र
तिपादनात्परमपुरुषविभूतिभूतस्य प्राकृतात्मनः स्वरूपयाथात्म्यविज्ञानमपवर्गसाधनपरमपुरुषवेदनोपयोगितया
वगन्तव्यं न स्वत एवोपायत्वेन श्रुतौ च परमात्मैवात्मा तत्त्वोपायतयाऽऽत्मा वा अरे द्रष्टव्य इत्यादिनोपदिश्यते तथा तस्य ह वा एतस्य महतो
भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिनाऽखिलस्य जगतः कारणत्वमुच्यमानेन परमपुरुषादन्यस्य कर्मपरवशस्य मुक्तस्य वा
जीवात्मनः स्वरूपमात्रस्य न संभवति तथा आत्मनो वा अरे दर्शनेनेत्यादिनैकविज्ञानेन सर्वविज्ञानमभिधीयमानं स
र्वात्मभूते परमात्मन्येवावकल्पते सर्वैकरूपत्वात् आत्मा मे ... आत्मविज्ञानेन सर्वात्मविज्ञानमुच्यते इति तदुक्तं श्रुतेर्चेतन
प्रपंचज्ञानाभावे न सर्वविज्ञानाभावात् प्रतिज्ञोपपादनाय चेदं ... सर्वं यदयमात्मेति अत्यन्तादि
द चिदचिन्मिश्रप्रपंचमिदमिति निर्दिश्यैतदयमात्मेत्यैकात्म्योपदेशात्परमात्मन एवोपपद्यते नहीदं पावन ... चिरस्थिति

109

पुरुषादर्थान्तरभूतस्य निखिलजगत्कारणस्य परस्यैव ब्रह्मणो वेदितव्यतयाभिधानान्न तेन सिद्धस्य पुरुषस्य तदधिष्ठितस्य वा प्र
धानस्य कारणत्वं कैश्चिदपि वेदान्तेषु प्रतीयत इति स्थिते श्रीरामानुजयातश्री अत्र कापिलतन्त्रसिद्धपुरुषतत्त्ववेदनपरं वाक्यं कैश्चिदुच्यते
च्यत इति तद्व्यतिरिक्त ईश्वरो नाम न कश्चित्संभवतीत्याशंक्य निराकरोति वृहदारण्यके मैत्रेयीब्राह्मणे श्रूयते न वा अरे
पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवतीत्यारभ्य न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति
आत्मनस्तु कामाय सर्वं प्रियं भवति आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः मैत्रेय्यात्मनि खल्वरे दृ
ष्टे श्रुते मते विज्ञात इदं सर्वं विदितमिति तत्र संशयः किमस्मिन्वाक्ये द्रष्टव्यतयोपदिश्यमानः तन्त्रसिद्धः पुरुष एवाथ
वा सर्वज्ञः सत्यसंकल्पः सर्वेश्वर इति किं युक्तं पुरुष इति कुतः आदिमध्यावसानेषु पुरुषस्यैव प्रतीतेः उपक्रमे तावत्पति
जायापुत्रवित्तपश्वादिप्रियत्वयोगाज्जीवात्मैव प्रतीयते मध्येऽपि विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवा
नुविनश्यति न प्रेत्य संज्ञास्तीत्युत्पत्तिविनाशयोगात्स एवावगम्यते तथान्ते च विज्ञातारमरे केन विजानीयादिति स एव
ज्ञाता चेतन एव प्रतीयते नेश्वरः अतस्तन्त्रसिद्धपुरुषप्रतिपादनपरमिदं वाक्यमिति निश्चीयते ... तस्य तु
नाशायत्तिश्रुतिनेनोपक्रमात् अमृतत्वप्राप्त्युपायोपदेशपरमिदं वाक्यमित्यवगम्यते तत्कथं पुरुषप्रतिपादनपरत्व
मस्य वाक्यस्योच्यते अतएव ह्यत्र पुरुषप्रतिपादनं नेत्र ... तन्त्रसिद्धपुरुष ... याथात्म्यविज्ञा
नमेवामृतत्वहेतुत्वेनोच्यते अतो जीवात्मनः प्रकृतिवियुक्तं स्वरूपमिहामृतत्वायात्मा वा अरे द्रष्टव्य इत्यादिनोपदिश्य
ते सर्वेषामात्मनां प्रकृतिवियुक्तं स्वरूपमेकरूपमिति प्रकृतिवियुक्तस्यात्मयाथात्म्यविज्ञानेन सर्वे एवात्मानो विदिता भवन्ती
त्यात्मज्ञानेन सर्वविज्ञानमुपपन्नं देवादिस्थानामात्मनां ... एकाकारत्वादिदं सर्वं यदयमात्मेत्यैक्योपदेशः

देहरूपेण परिणतेभ्यः प्राकृतेभ्यो भूतेभ्यः सम्यगुत्थाय देवादिमनुष्यत्वे तान्येव भूतानि
... देवमानवादिसंज्ञानभवती ...

नियतदेशकालस्वरूपपरिमाणमसमानमाराधकानां तत्तद्वस्तुगतं प्रियत्वमापादयति एष ह्येवानन्दयातीति श्रुतेः नहि तत्तद्वस्तुस्व
रूपेण प्रियमप्रियं वा यद्योक्तं तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते तद्देवकोपाय यतः प्रसादाय च जायते तस्मात् दुःखात्मकं नास्ति
न च किंचित्सुखात्मकमिति आत्मनस्तु कामायेत्यस्य जीवात्मपरत्वेपि आत्मा वा अरे द्रष्टव्य इति तु परमात्मविषयमेव तत्राप्ययम
र्थः यस्मात्पत्यादीनामिष्टसंपत्तये तत्परवशेन पत्यादयः प्रियत्वेनोपादीयन्ते अपि त्वात्मेष्टसंपत्तये स्वतन्त्रेण स्वप्रिय
त्वेनोदीयन्ते तस्माद्य एवात्मनो निरुपाधिकनिर्दोषनिरवधिकप्रियः परमात्मा स एव हि द्रष्टव्यः न दुःखमिश्रात्मसुखदुःखो
दर्काः परायत्तस्वभावाः पतिजायापुत्रवित्तादयो विषया इति अस्मिंस्तु प्रकरणे जीवात्मशब्देनापि परमात्मन एवाभि
धानादात्मनस्तु कामाय आत्मा वा अरे द्रष्टव्य इति पूर्वोक्तमन्त्रद्वयोर्भयत्रात्मशब्दावेकविषयौ मतान्तरेणापि जीवशब्देन परमा
भिधानोपपादनायाह श्री प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ एकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धेरिदं लिङ्गं यज्जीवात्मशब्देन प
रमात्मनोभिधानमित्याश्मरथ्याचार्यो मन्यते स्म यद्यपि जीवः परमात्मकार्यं तथापि परमात्मैव न भवेत्तदा तद्व्यतिरिक्तस्य
परमात्मविज्ञानादेतद्विज्ञानं न सेत्स्यति आत्मा वा इदमेक एवाग्र आसीदिति प्राक्सृष्टेरेकत्वावधारणात् यथा सुदीप्तात्पावका
द्विस्फुलिंगाः सहस्रशः प्रभवन्ते सरूपाः तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्तीत्यादिभिर्ब्रह्मणो जीवानामु
त्पत्तिश्रवणात्तस्मिन्नेवाप्ययश्रवणाच्च जीवानां ब्रह्मकार्यत्वेन ब्रह्मणैक्यमवगम्यते अतो जीवशब्देन परमात्मन एवाभिधान
मिति श्री उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ यद्युक्तं जीवस्य ब्रह्मकार्यत्वं तथा ब्रह्मणैक्येनैकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपा
दनार्थं ब्रह्मणो जीवशब्देन प्रतिपादनमिति तदयुक्तं न जायते म्रियते वा विपश्चिदित्यादिनाजत्वश्रुतेर्जीवानां प्राचीनकर्मफल
भोगाय जन्मास्य ह्यभ्युपगमाच्च अन्यथाविषमसृष्ट्यनुपपत्तेश्च ब्रह्मकार्यस्य जीवस्य ब्रह्मतापत्तिलक्षणो मोक्ष आकाशा

श्रं जगत्सु रूपेणाभिव्यक्तिसंस्पृष्टेन तद्वियुक्ते चात्मस्वरूपे एतावदवस्थिते नच्चैकमनुपाच्छति अतएव सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेति अति
रिक्तत्वेन सर्वं वेदन निंदा च तथा ग्रन्थमेव च मैत्रेयी ब्राह्मणे महद्भूतमनन्तमपारमिति श्रुता महत्त्वादयो गुणाः परमात्मन एव
संभवंति अतः स एवात्र प्रतिपादनात्तद्विषयमेवेदं वाक्यमिति तदयुक्तं आत्मनस्तु कामायेत्यात्मपदेन जीवात्मसंशब्दनेत
स्यात्मा वा अरे द्रष्टव्य इत्यनेनानन्वयप्रसंगात् आत्मा वा अरे द्रष्टव्य इत्यात्मनो द्रष्टव्यत्वोपयोगितयात्मनस्तु कामायेत्युपदिष्ट
मिति प्रतीयते आत्मनस्तु कामाय आत्मनः कामसंपन्नये काम्यन्त इति कामाः आत्मन इष्टसंपन्न इति यावत् नच जीवात्मन
इष्टसंपन्नये पत्यादयः प्रिया भवंतीत्युक्ते तस्य जीवस्य स्वरूपमन्वेष्टव्यं भवति प्रियमेव त्वन्वेष्टव्यं ननु प्रियं प्रति शेषिणः प्रिय
वियुक्ते स्वरूपे यस्मादात्मन इष्टसंपन्नये पत्यादयः प्रिया भवन्ति तस्मात्स सोऽप्रियं परित्यज्य तद्वियुक्तमात्मस्वरूपमन्वेष्टव्य
मित्युक्तं भवति प्रस्तुतनपत्यादिशेषतया पत्यादीनां प्रियत्वे अपि त्वात्मनः शेषतया पत्यादीनां प्रियत्वमित्युक्ते स शेष
तया तदेवोपादेयः स्तु आत्मनस्तु कामाय सर्वं प्रियं भवतीत्यस्य परेण नान्वये वाक्यभेदः प्रसज्यते अभ्युपगम्यमाने एवा
क्यभेदे पूर्वस्य वाक्यस्य न किंचित्प्रयोजनं दृश्यते अतः पत्यादिसर्वप्रियं परित्यज्यात्मन एवान्वेष्टव्यत्वं यथा प्रतीयते तथा वाक्यार्थो व
र्णनीयः सोऽपमुच्यते अमृतत्वस्य तु नाशास्ति वित्तेनेति विनाशी ऽनित्यनिर्दोषनिरतिशयानंदरूपामृतत्वप्राप्त्यनुपायत्वमुक्त
वित्तपुत्रजायादीनां सातिशयदुःखमिश्रकादाचित्कप्रियत्वमनुभूयमाने न पत्यादिस्वरूपप्रयुक्तं अपि तु निरतिशयानंदस्वभावप
रमात्मप्रयुक्तं अतएव स्वयं निरतिशयानंदः सन्नन्येषामपि प्रियत्वलेशस्य दत्वमापादयति स परमात्मैव द्रष्टव्य इत्युपदिश्यते तद्यथा
न वा अरे पत्युः कामाय पतिः प्रियो भवति नहि पतिर्जायापुत्रवित्तादयोऽमतप्रयोजना वा स्वस्य प्रियः स्यामिति स्वसंकल्पात्प्रियो भवंति अपि
त्वात्मनः कामाय परमात्मनः स्वात्मधर्मकप्रियप्रतिलंभनरूपेष्टनिर्वृत्तये परमात्मा हि कर्मभिराराधितस्तत्तत्कर्मानुगुणं प्रति

यथाऽग्नेः काष्ठमुक्तो दृश्यते ... मावस्कूर्जमाज्ञुञ्चरन्ति एवमस्माद्देवादयो निष्क्रामितरूपाणि ... नाहरिमेव गत्वा ... नमतो ... करणस्यमस्तु तदुपयोगित्वेन ...

श्री

हरिरेव सर्वेन्द्रिय यथा पापाश्रयस्तु ... विधेयमिति सर्पः ७ ... प्रादुर्भवंति स परमात्मेत्यर्थः यथा सर्वासामपां समुद्र एकायनं यथा च सर्वेषां स्पर्शानां त्वगेकायनं ...

देव एको नारायणः अन्तः प्रविष्टः शास्ता जनानां सर्वात्मेति स्वशरीरभूते जीवात्मन्यात्मतयावस्थितेः जीवशब्देन ब्रह्म प्रतिपादनमिति
कोपास्त्यं तत्र आचार्यैरभ्यनेतस्मिन् जीवशब्दस्य जीवस्य परमात्मपर्यन्तस्यैव वाचको न जीवमात्रस्येति पूर्वमेवोक्तं नामरूपे व्याकरवाणीत्यत्र
एवमात्मशरीरभावेन तादात्म्योपपादने परस्य ब्रह्मणो ऽपहतपाप्मत्वसर्वज्ञत्वादिगोचराः जीवस्याविदुषः शोच्यतो ब्रह्मोपासनान्मोह
वादिन्यो जगत्सृष्टिप्रलयाभिधायिन्यो जगतो ब्रह्मतादात्म्योपदेशपराश्च सर्वाः श्रुतयस्सम्यगुपपादिता भवन्तीति काशकृत्स्नी
यमेवमतं सूत्रकारः स्वीकृतवान् अयमत्र वाक्यार्थः अमृतत्वोपाये मैत्रेय्याः पृष्टे याज्ञवल्क्ये आत्मा वा अरे द्रष्टव्य इत्यादिना
परमात्मोपासनममृतत्वोपायमुक्त्वा आत्मनि खल्वरे दृष्टे इत्यादिना उपास्यलक्षणं दुन्दुभ्यादिदृष्टान्तैश्चोपासनोपकरणभूत
मनः प्रभृतिकरणनियमनं च सामान्येनाभिधाय स यथार्द्रैधाग्नेरित्यादिना स यथा सर्वासामपां समुद्र एकायनमित्या
दिना चोपास्यभूतस्य परस्य ब्रह्मणो निखिलजगदेककारणत्वं सकलविषयप्रवृत्तिमूलकरणग्रामनियमनं च विस्तीर्णमु
पदिश्य स यथा सैन्धवघन इत्यादिनामृतत्वोपायप्रवृत्तिप्रोत्साहनाय जीवात्मस्वरूपेणावस्थितस्य परमात्मनोऽपरिच्छिन्न
ज्ञानैकाकारतामुपपाद्य तस्यैवापरिच्छिन्नज्ञानैकाकारस्य संसारदशायां भूतपरिणामानुवृत्तिं विज्ञानघन एवैतेभ्यो भूतेभ्यस्स
मुत्थाय तान्येवानुविनश्यतीत्यभिधाय न प्रेत्य संज्ञास्तीति मोक्षदशायां स्वाभाविकापरिच्छिन्नज्ञानसंकोचाभावेन भूतसंघाते
नैकीकृत्यात्मनि देवादिरूपज्ञानाभावमुक्त्वा पुनरपि यत्र हि द्वैतमिव भवतीत्यादिना ब्रह्मात्मकत्वेन नानाभूतवस्तुदर्शनमज्ञा
नकृतमिति निरस्तनिखिलाज्ञानस्य ब्रह्मात्मकैकरसं जगदनुभवतो ब्रह्मव्यतिरिक्तवस्त्वन्तराभावे भेददर्शनेन निरस्य येनेदं सर्वं वि
जानाति तं केन विजानीयादिति च जीवात्मात्मतयावस्थितेन परमात्मना हितज्ञानः सन्निदं सर्वं विजानाति अयं
तं केन विजानीयान्न केनापीति परमात्मनो दुरवगमत्वमुपपाद्य स एष नेति नेत्यादिना यस्सर्वेश्वरः सेतरसमस्तचिदचिद्वस्तुविलक्ष
णरूप एव सर्वशरीरः सर्वस्यात्मतयावस्थित इति स्वशरीरभूतचिदचिद्वस्तुगतदोषैर्न संस्पृश्यत इत्यभिधाय विज्ञा

द्विवर्जनीय इति तदुपायविधानानुष्ठानानर्थक्याच्च घटादिवत्कारणप्राप्तिर्विनाशरूपत्वेन मोक्षस्यापुरुषार्थत्वाच्च ॥
जीवात्मन उत्पत्तिप्रलयवादोपपत्तिः सूत्रकृता प्रपञ्चयिष्यते अत एव संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसं-
पद्य स्वेन रूपेणाभिनिष्पद्यते यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः प-
रात्परं पुरुषमुपैति दिव्यमित्युक्तमिष्यतः परमात्मभावाज्जीवस्याभेदेन परमात्मनोऽभिधानमिति सोऽडुलोमिराचार्यो मन्यते स्म
श्री अवस्थितेरिति काशकृत्स्नः श्री यदुक्तमिष्यतो जीवस्य ब्रह्मभावाद्ब्रह्मणस्तच्छब्देनाभिधानमिति तदयुक्तं विकल्पा-
सहत्वात् अस्य जीवात्मन उत्क्रान्तेः पूर्वमनेवंभावः किं स्वाभाविकः उतौपाधिकः तत्रापि पारमार्थिकोऽपारमार्थिको वेति
स्वाभाविकत्वे ब्रह्मभावो नोपपद्यते भेदस्य स्वरूपप्रयुक्तत्वेन स्वरूपे विद्यमाने तदनपायात् अभेदेन सह स्वरूपम-
प्यपैतीति तथात्वे विनष्टत्वादेव तस्य न ब्रह्मभावः अपुरुषार्थत्वादिदोषप्रसंगश्च पारमार्थिकौपाधिकत्वेऽपि प्रागपि
ब्रह्मत्वे सूक्तमिष्यत एवंभावादिति विशेषणं न युज्यते वक्तुं अस्मिन्पक्षे ह्युपाधिब्रह्मव्यतिरेकेण वस्त्वन्तराभावान्निरवयवस्य
ब्रह्मण उपाधिना छेदासंभवात् उपाधिगत एव भेदः स्यात् उत्क्रान्तेः प्रागपि ब्रह्मत्वेन औपाधिकस्य भेदस्यापारमार्थिकत्वे
दृश्यायमुत्क्रान्तौ ब्रह्मभाव इति चेत् ब्रह्मण एवाविद्योपाधितिरोहितस्वस्वरूपस्येति चेन्न नित्यमुक्तस्वप्रकाश-
ज्ञानस्वरूपस्याविद्योपाधितिरोधानासंभवात् तिरोधानं नाम वस्तुस्वरूपे विद्यमाने तत्प्रकाशनिवृत्तिः प्रकाश एव व-
स्तुस्वरूपमिति संगीकारे तिरोधानाभावः स्वरूपनाशो वा स्यात् अतो नित्याविर्भूतस्वस्वरूपत्वात्तस्योत्क्रान्तौ ब्रह्मभावेन कश्चि-
द्विशेषः स्यादित्युक्तमिष्यत इति विशेषणं व्यर्थमेव अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्येति पूर्वमनेवंरूपस्य न तद्-
नीभवनतापत्तिमाह अपि तु पूर्वसिद्धस्य स्वस्वरूपस्याविर्भावं तथा हि वक्ष्यते संपद्याविर्भावः स्वेनशब्दादिसूत्रादिभिः अतो नेत्थं जी-
वेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो
यमयति एष त आत्मान्तर्याम्यमृतः योऽक्षरमन्तरे संचरन् यस्याक्षरं शरीरं यमक्षरं न वेद एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो

रूपं नश्यति

प्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्येकविज्ञानेन सर्वविज्ञानविषयमाह यथा सोम्य एकेन मृत्पि-
ण्डेन सर्वं मृन्मयं विज्ञातं स्यात् यथा सोम्यैकेन लोहमणिना यथा सोम्य एकेन नखनिकृन्तनेनेति कारणविज्ञानात्कार्य्यविज्ञान-
विषयः यदि निमित्तकारणमेव जगतो ब्रह्म तदा तद्विज्ञानात्समस्तजगद्विज्ञातं स्यात् नहि कुलालादिविज्ञानेन घटादिविज्ञा-
नं अतः प्रतिज्ञादृष्टान्तयोरविरोध एव ब्रह्मण एवोपादानत्वे उपादानभूतमृत्पिण्डलोहमणिनखनिकृन्तनविज्ञानेन घ-
टमणिककटकमुकुटवास्यपरश्वधादितत्कार्य्यविज्ञानवत् निखिलजगदेककारणभूते ब्रह्मणि विज्ञाते तत्कार्य्यं जग-
द्विज्ञातमेव स्यात् कारणमेवावस्थान्तरमापन्नं कार्य्यं न द्रव्यान्तरमिति कार्य्यकारणरूपेणावस्थितमन्त्रे दृष्टान्ता-
दिनिदर्शनेन प्रतिज्ञासमर्थनात् ब्रह्मैव जगदुपादानं चेति निश्चीयते यत्तु निमित्तोपादानयोर्भेदः श्रुत्यैव प्रतीयत इति तन्न
दसत् निमित्तोपादानयोरैक्यप्रतीतेः उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवतीत्यादिश्रुते प्रशिष्यतेऽनेनेत्यादेशः॥

एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादिश्रुतेः साधकतमत्वेन कर्त्ता विवक्षितः तमादेश-
मप्राक्ष्यः येनाश्रुतं श्रुतं भवतीति येनादेशाधिष्ठात्राश्रुतेनाश्रुतमपि श्रुतं भवतीति निमित्तोपादानयोरैक्यं प्रतीयते सदेव सोम्ये-
दमग्र आसीदेकमेवेति प्राक्सृष्टेरेकत्वावधारणाद्द्वितीयपदे नाधिष्ठात्रन्तरनिषेधाच्च नन्वेवं सति विकारजननीमोरनाद्यन्ते
वदिरहेणाखिलस्य जगदुपादानत्वं च श्रूयमाणं कथमुपपद्यते तदुच्यते तत्राप्यविभक्तनामरूपैकारणावस्थं ब्रह्मैव प्रकृति
प्राधनामभिधीयते ब्रह्मव्यतिरिक्तवस्त्वन्तराभावात् तथाहि श्रुतयः सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद यत्र त्वस्य सर्वमिति
कार्य्यावस्थं कारणावस्थं च सर्वं जगद्ब्रह्मात्मकमिति श्रवणाच्च एतदुक्तं भवति यः पृथिवीमन्तरे संचरन् यस्य पृथिवी श-
रीरं यं पृथिवी न वेदेत्यारभ्य योऽव्यक्तमन्तरे संचरन् यस्याक्षरं शरीरं यमक्षरं न वेद यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं
पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयतीत्यारभ्य यश्चात्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्या-
त्मा [illegible] तेनकं पश्येत्तेन विजानीयात् सा ह्योः सर्वं खल्विदं ब्र-
ह्म एतदात्म्यमिदं सर्वम् श्रुतिः ४

वीक्षते भगवानिति चेन्न तेनेश्वरेणाधिष्ठिता सती कार्याणि सूते इति कार्याणि प्रसूयते ८

तस्मै रैकेन विज्ञानीयादित्युक्तामनुशासनानि मैत्रेय्येतावदरे खल्वमृतत्वमिति समस्तवस्तुविसजातीयं निरस्तनिखिलजग
देककारणभूतं सर्वस्याधिष्ठातारं पुरुषोत्तममुक्तप्रकारादुपासनार्हं तेकेन विजानीयादितीदमेवोपासनममृतत्वोपायो ब्रह्मप्रा
प्तिरेव चामृतत्वमभिधीयत इत्युक्तवान् अतः परं ब्रह्मैवास्मिन् वाक्ये प्रतिपाद्यत इति परमेव ब्रह्म जगत्कारणं न पुरुषः तदधिष्ठि
ता च प्रकृतिरिति स्थितं ॥ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ एवं निरीश्वरसांख्ये निरस्ते सति सेश्वरसांख्यः प्रत्यवतिष्ठ
ते सत्त्वपौरुषणादिगुणयोगात्सर्वज्ञमीश्वरं जगत्कारणत्वेन वेदान्ताः प्रतिपादयन्ति तथापि वेदान्तैरेव जगदुपादानतया प्रधा
नमेव प्रतिपाद्यत इति प्रतीयते नहि वेदान्ताः सर्वज्ञस्यापरिणामिनो निर्विकारस्येश्वरस्याधिष्ठेयेनाचेतनेन परिणामिना प्रधानेन
विना जगतः कारणत्वमवगमयन्ति तथाह्यपरिणामिनमेवेनं प्रकृतिं चेतनदधिष्ठितां परिणामिनीमधीयते निष्कलं निष्क्रियं शान्तं
निरवद्यं निरंजनं स वा एष महानज आत्माजरोऽमरः अविकारं जननीं भूतानां प्रकृत्यामजां ध्रुवां [illegible] धीयते अस्मिन्नानन्ते [illegible]
पुरुषार्थं स्वतन्त्रे नाधिष्ठिता जगतो गौरनाद्यन्तवती सा जननी भूतभाविनीति तथा प्रकृतिमुपादानभूतामधिष्ठायैवेश्वरो विश्वं जगत्स
जतीति सूयते अस्मान्मायी सृजते विश्वमेतत् मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति स्मृतिरपि मयाध्यक्षेण प्रकृतिः सूयते स
चराचरमिति एवमश्रुतेऽपि प्रधानोपादानत्वे ब्रह्मणो जगत्कारणत्वश्रुतमन्यथानुपपत्त्यैव प्रधानस्वरूपेतस्येश्वराधिष्ठितस्य जगदुपा
दानकारणत्वं सिध्यति एवमेव हि लोके निमित्तोपादानयोरत्यन्तभेदो दृश्यते मृत्सुवर्णादेरचेतनस्य घटकटकादावुपादानत्वं
चेतनस्य कुलालसुवर्णकारादेश्च निमित्तत्वं च नियतमुपलभ्यते कार्यनिष्पत्तिश्च नियमेनानेककारकसव्यपेक्षा दृष्टा एवं निमि
त्तोपादाने निमित्तं च प्रतिपादयितुं न प्रभवन्ति वेदान्तवाक्यानि अतो ब्रह्म निमित्तकारणमेव नोपादानं उपादानं तु तदधिष्ठितं प्रधा
नमेवेत्येवं प्राप्ते अभिधीयते प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधादिति प्रकृतिश्च उपादानं च निमित्तकारणमात्रं ब्रह्म उपादानका
रणं च ब्रह्मैव सर्वः कुतः प्रतिज्ञादृष्टान्तानुपरोधात् एवं सर्वत्र प्रतिज्ञादृष्टान्तौ नोपरुध्येते प्रतिज्ञा तावत् ... आदेशमुत तमादेशम

निमित्तोपादानयोर्भेदनियमः कार्यनिष्पत्तावनेककारकसव्यपेक्षत्वनियमश्चाति कस्यचित् एकमेव चुटिः ६

त्मा शरीरं यस्यात्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृत इति च सर्वैश्चिदचिद्वस्तुशरीरतया सर्वदा सर्वात्मभूतं परं ब्रह्म
कदाचिद्विभक्तनामरूपं कदाचिच्चाविभक्तनामरूपं यदा विभक्तनामरूपं तदा तदेव बहुत्वेन कार्यत्वेनोच्यते यदा चाविभक्तनाम
रूपं तदैकमद्वितीयं कारणमिति च एवं सर्वदा चिदचिद्वस्तुशरीरस्य परस्य ब्रह्मणो विभक्तनामरूपाया कारणावस्थायाः सा गौरनाद्यन्त
वती विकारजननी तमोऽजामेकामित्यादिभिरभिधीयते ननु च महानव्यक्ते लीयते अव्यक्तमक्षरे लीयत इति प्रलयश्रुतिः अव्यक्तस्यो
त्पत्तिप्रलयौ प्रतीयेते तथा च महाभारते तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयत इति नैष दोषः
अचिद्वस्तुशरीरस्य ब्रह्मणो व्यक्तप्रायावस्थायाः त्रिगुणावस्थायाः कार्यत्वात् यदा तमस्तन्न दिवा न रात्रिरिति कृत्स्नप्रलयश्रुत्या
मपि ब्रह्मात्मकस्यातिसूक्ष्मस्याचिद्वस्तुनः स्थित्यभिधानाज्जगत्कारणस्य परस्य ब्रह्मणः प्रकारभूतमतिसूक्ष्मं चिदचिद्वस्तु नित्यमेवेति त
त्प्रकारे ब्रह्मण्येव गौरनाद्यन्तवतीत्यादिभिरभिधीयते अत एव चाक्षरं तमसि लीयते तमः परे देव एकीभवतीति तमस एकीभावमात्र
मेव श्रूयते न तु लयः एकीभाव इति तमोऽभिधानातिसूक्ष्माचिद्वस्तुप्रकारस्य ब्रह्मणो विभक्तनामरूपतयावस्थानमभिधीयते तम आसी
त्तमसा गूढमग्रे प्रकेतं तमसस्तन्महिना जायतैकमित्याद्यप्येतदेव वदति तथा च मानवं वचनं आसीदिदं तमोभूतमप्रज्ञातमलक्षणं
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः इति अस्मान्मायी सृजते विश्वमेतदित्याद्यनन्तरमेवोपपादयिष्यते ब्रह्मणोऽपरिणामित्वं
श्रुतयश्च यत्त्वेकस्य निमित्तत्वमुपादानत्वं च न संभवति एककारकनिष्पाद्यत्वं च कार्यस्य लोके तथानियमदर्शनाच्च
अतोऽन्निनासिद्धेदितिवद्वेदान्तवाक्यान्येकस्मादेवोत्पत्तिं प्रतिपादयितुं न प्रभवन्तीति अत्रोच्यते सकलेतरविलक्षणस्य प
रस्य ब्रह्मणः सर्वशक्तेः सर्वज्ञस्यैवं सर्वमुपपद्यते मृदादेरचेतनस्य ज्ञानाभावेनाधिष्ठातृत्वायोगाद्धिष्ठातुः कुला
लादेर्विचित्रपरिणामशक्तिविरहाद्सत्यसंकल्पतया चैतत्प्रापदर्शननियमः अतो ब्रह्मैव जगतो निमित्तमुपादानं च

रूपार्थोऽस्य विचित्रचिदचिन्मिश्रप्रपंचरूपेणात्मनो बहुभवनसंकल्पपूर्वकं बहुभवनं कथमुपपद्यत इत्याशंक्याह श्री
परिणामात् । श्रीपरिणामस्वाभाव्यान्नात्रोपदिश्यमानस्य परिणामस्य परस्मिन्ब्रह्मणि दोषावहत्वं स्वभावः प्रस्तुतमि
रं तु पुरुषार्थावहत्वमेवेत्यभिप्रायः एवमेव हि परिणाम उपदिश्यते अशेषहेयप्रत्यनीककल्याणैकतानं स्वेतरसम
स्तवस्तुविलक्षणं सर्वज्ञं सत्यसंकल्पमवाप्तसमस्तकाममनवधिकातिशयानंदं स्वलीलोपकरणभूतसमस्तचि
दचिद्वस्तुजातशरीरतया तदात्मभूतं परं ब्रह्म स्वशरीरभूते प्रपंचे तन्मात्राहंकारादिकारणपरंपरया तमःशब्दवाच्या
तिसूक्ष्माचिद्वस्त्वेकशेषे सति तमसि च स्वशरीरतयानिर्देशानर्हे इति सूक्ष्मदशापन्नस्यास्मिन्नेकतामापन्ने तथाभूत
तमश्शरीरं ब्रह्म पूर्ववद्विभक्तनामरूपचिदचिन्मिश्रप्रपंचशरीरं स्यामिति संकल्प्य क्रमेण जगच्छरीरतयात्मानं
परिणमयतीति सर्वेषु वेदान्तेषु परिणामोपदेशः तथैव बृहदारण्यके कृत्स्नस्य जगतो ब्रह्मशरीरत्वं ब्रह्मणस्तदात्मकत्वं
चाम्नायते यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आ
त्मान्तर्याम्यमृत इत्यारभ्य यस्यापश्शरीरं यस्याग्निः शरीरं यस्यान्तरिक्षं शरीरं यस्य वायुः शरीरं यस्य द्यौः शरीरं यस्या
दित्यः शरीरं यस्य दिशः शरीरं यस्य चंद्रतारकं शरीरं यस्य तमश्शरीरं यस्य तेजः शरीरं यस्य सर्वाणि भूतानि शरीरं यस्य
प्राणश्शरीरं यस्य वाक्शरीरं यस्य चक्षुः शरीरं यस्य श्रोत्रं शरीरं यस्य मनश्शरीरं यस्य त्वक्शरीरं यस्य विज्ञानं शरीरं य
स्य रेतश्शरीरमित्येवमन्तेन काण्वपाठेन माध्यंदिनेतु पाठे विज्ञानस्य स्थाने यस्यात्मा शरीरमिति विशेषः लोकयज्ञवेदा
नां परमात्मशरीरत्वमधिकं सुबालोपनिषदि च पृथिव्यादीनां तत्त्वानां परमात्मशरीरत्वमभिधाय वाजसनेयके

वैपरीत्ये

114

॥ अभिध्योपदेशाच्च ॥ श्री ॥ तत्रोभयं ब्रह्मैव सोऽकामयत बहु स्यां प्रजायेयेति तदैक्षत बहु स्यां प्रजायेयेति स्रष्टुर्ब्रह्मण एव
स्यैव बहुभवनसंकल्पोपदेशात् क्षिति त्रि चिदचिद्रूपेणाहमेव बहु स्यां तथा प्रजायेयेति संकल्पपूर्विका सृष्टिरूप
दिश्यते ॥ श्री ॥ साक्षाच्चोभयाम्नानात् ॥ श्री ॥ न केवलं प्रतिज्ञादृष्टान्ताभिध्योपदेशादिभिरयमर्थो निश्चीयते ब्रह्म
ण एव निमित्तत्वमुपादानत्वं च साक्षादाम्नायते किंस्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षु
र्मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावा
पृथिवी निष्टतक्षुर्मनीषिणो मनसा विब्रवीमि वः ब्रह्माध्यतिष्ठत् भुवनानि धारयन्निति ॥ अत्र हि स्रष्टुर्ब्रह्मणः
किमुपादानं कानि चोपकरणानीति लोकदृष्ट्या पृष्टे सकलेतरविलक्षणस्य ब्रह्मणः सर्वशक्तियोगो न विरुध्यते
इति ब्रह्मैवोपादानमुपकरणानि चेति परिहृतं ॥ अतश्चोभयं ब्रह्म ॥ श्री ॥ आत्मकृतेः ॥ श्री ॥ सोऽकामयत बहु स्यां प्रजायेये
ति सिसृक्षुत्वेन प्रकृतस्य ब्रह्मणस्तदात्मानं स्वयमकुरुतेति सृष्टिः कर्मत्वं कर्तृत्वं च प्रतीयत इत्यात्मन एव बहुत्व
करणात्तस्यैव निमित्तत्वमुपादानत्वं च प्रतीयते ॥ अविभक्तनामरूप एव आत्मा कर्त्ता स एव विभक्तनामरूपः कार्यमिति कर्तृ
त्वकर्मत्वयोर्न विरोधः स्वयमेवात्मानं तथाकुरुतेति निमित्तमुपादानं च सत्यं ज्ञानमनन्तं ब्रह्म आनन्दो ब्रह्मेति अपहतपा
प्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनं स वा एष महानज आत्मा अजरो
मर इति स्वभावतो निरस्तसमस्तचेतनाचेतनवर्तिदोषगंधस्य निरतिशयानन्दैकतानस्य ब्रह्मणो विचित्राऽनन्तापु

रूपं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवदिति अत्र तपश्शब्देन प्राचीनजगदाकारपर्या
लोचनरूपं ज्ञानमभिधीयते यस्य ज्ञानमयं तप इति श्रुतेः प्राक्सृष्टेर्जगत्संस्थानमालोच्येदानीमपि तत्संस्थानं जगत्स्रज
दित्यर्थः तथैव हि ब्रह्म सर्वेषु कल्पेष्वेकरूपमेव जगत्सृजति सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् दिवं च पृथिवीं च
अन्तरिक्षमथो सुवः यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये दृश्यन्ते तानि तान्येव तथा भावा युगादिष्विति श्रुतिस्मृति
भ्यः तदयमर्थः स्वयमपरिच्छिन्नज्ञानानन्दैकस्वभावोऽप्येतत्सूक्ष्मतया सत्त्वे कल्पस्वलीलोपकरणचिदचिद्वस्तुशरीरतया
तन्मयः परमात्मा विचित्रानेतक्रीडनकोपादित्सया स्वशरीरभूतप्रकृतिपुरुषसमष्टिपरे परया महाभूतपर्यन्तमा
त्मानं तच्छरीरकं परिणमय्य तन्मयः पुनस्स्वतनुभावं च तच्चिदचिन्मिश्रदेवादिस्थावरान्तजगद्रूपोऽभवदिति तदेवानु
प्राविश्यान्तदनुप्रविश्येति कारणावस्थायामात्मतयावस्थितः परमात्मैव कार्यरूपेण विक्रियमाणद्रव्यस्याप्यात्मतया
अवस्थयान्तस्तदभवदित्युच्यते एवं परमात्मा चिदचित्संघातरूपजगदाकारपरिणामि परमात्मशरीरभूतचिदंशगताः
सर्वे एवापुरुषार्थाः तथाभूताचिदंशगताश्च सर्वे विकाराः परमात्मनि कार्यत्वे तदवस्थयोस्तयोर्नियन्तृत्वेनात्म
मात्मा तन्नियाम्यस्य शरीरभूतयोर्नियन्ततयात्मभूतः तद्गतापुरुषार्थैर्विकारैश्च न स्पृश्यते अपरिच्छिन्नज्ञा
नानन्दस्वैकरूप एव जगत्परिवर्तनलीलया वर्तते तदेतदाह सत्यं चानृतं च सत्यमभवदिति विचित्रचि
दचिद्रूपेण विक्रियमाणमपि ब्रह्म सत्यमेवाभवन्निरस्तनिखिलदोषगन्धमपरिच्छिन्नज्ञानानन्दैकरूपमेवाभ

115

116

ऽनुस्यूतानामपि तत्त्वानां शरीरत्वं ब्रह्मण आत्मत्वं च श्रूयते यस्य बुद्धिः शरीरं यस्याहंकारः शरीरं यस्य चित्तं शरीरं यस्याऽव्यक्तं श
रीरं यस्याक्षरं शरीरं योऽक्षरमन्तरे संचरन् यस्य मृत्युः शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारा
यण इत्यत्र मृत्युशब्देन परमसूक्ष्ममचिद्वस्तु तमःशब्दवाच्यमभिधीयते अव्यक्तमक्षरे लीयते इति तस्मिन्नेवोपनिषदि अक्ष
[illegible]स्यभिन्नानां सर्वेषामात्मनो ज्ञानावरणाऽनर्थमूलत्वेन तदेव हि तमो मृत्युशब्दव्यपदेश्यं सुबालोपनिषद्येव ब्र
ह्मशरीरतया तदात्मकानां तत्त्वानां ब्रह्मण्येव प्रलय आम्नायते पृथिव्यप्सु लीयते आपस्तेजसि लीयन्ते ते
जो वायौ लीयते वायुराकाशे लीयते आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ लीयन्ते भूतादि
र्महति लीयते महानव्यक्ते लीयते अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते तमः परे देव एकीभवतीति अ
विभागापत्तिदशायामपि चिदचिद्वस्त्वतिसूक्ष्मं सत्कर्मसंस्कारं तिष्ठतीत्युत्तरत्र वक्ष्यति न कर्माविभागादिति चे
न्नानादित्वादुपपद्यते चाप्युपलभ्यते चेति एवं स्वस्माद्विभागव्यपदेशाऽनर्हतया परमात्मनैकीभूतायतनसूक्ष्म
चिदचिद्वस्तुशरीरादेकस्मादेवाद्वितीयान्निरतिशयानन्दात् सर्वज्ञात् सत्यसंकल्पाद्ब्रह्मणो नामरूपविभागार्हस्थू
लचिदचिद्वस्तुशरीरतया बहुभवनसंकल्पपूर्वको जगदाकारेण परिणामः श्रूयते सत्यं ज्ञानमनन्तं ब्रह्म तस्मा
द्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमयः एष ह्येवानन्दयाति सोऽकामयत बहु स्यां प्रजायेयेति स तपोऽतप्यत
स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंच तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् निरुक्तं चानि